पत्र

न्यायसिद्धांतमुक्तावली मुक्तावली
प्रकाशाख्या दिनकरीया

१२ षद्

दिनकरीमुक्तावलीटीकेयम्

प० ७० श्लो २७०

...तु॥ स्तु। विधोः कि... ते चूडामणीकरणं किमर्थं वा सुके... वलयीकरणं ... ...र्या निराकांक्षा प्रतिपत्तिर्न भवतीति लीलावत्यादिविशेषणा...
...वसितान्वयबोधाभावान्नायमत्र दोषः। उत्थाप्याकांक्षया विशेषणान्वय एतस्य सार इति ५

॥ ६०॥ श्रीगणेशाय नमः॥ श्रीसांबमवलंबे॥ श्रीमहालक्ष्म्यै नमः॥ श्रीमद्भट्टभास्करजन्महादेवचरणसरोरुहेभ्यो नमः॥ लक्ष्मी
पादयुगं प्रणम्य पितरं श्रीबालकृष्णं ... सिद्धं भास्करजन्मकुलांबुधौ विधुमिव श्रीगौरचंद्रात्मजात॥ ज्ञात्वा येषमतं मितेन वचसा
सिद्धांतमुक्तावलीरत्नकार्यात्मनुते यथामति महादेवः परे बांकृते॥१॥ तत्र तावद्ग्रंथापरिच्छेदव्याख्यानं चिकीर्षुः श्रीविश्वनाथ
पंचाननो निर्विघ्नपरिसमाप्तिसिद्धये कृतस्येश्वरनिर्देशरूपमंगलस्य शिष्यशिक्षायै ग्रंथे वंकुर्यादिति शिष्यशिक्षायै निबंधं कुर्वन्न
ग्रंथं प्रणिपद्यते। चूडामणीकृतेति। लीलेति॥ लीलाताण्डवपंडित इति विशेषणात्ः समासः पुनरात्रत्वदोषः। लीलया तांडवं न
र्तनं तत्र पंडितो निपुण इत्यर्थः। अनेन नटत्वविशिष्टतया स्तुतिविषयत्वात्प्रार्थिता श्रयो भवंत्येवेति सूचितं। नन्वाभरणत्वेन कथं
न्यस्यं तत्राह। चूडामणीकृतेति॥ अभूततद्भावे कृभ्वस्तियोगे संपद्यकर्तरि च्विरिति सूत्रेणात्र च्विप्रत्ययः। तथा चाचूडामणिः चूडा
मणिः संपद्यत इति चूडामणीकृतश्चूडामणीकृतो विधुर्येन स तथेत्यर्थः। वलयीकृतेति। शिष्यावधानाय प्रतिज्ञानीते। निजनि
र्मितेति। निजेन स्वेन निर्मिता रचिता या कारिकावली तां श्रुतिसिद्धांतसंक्षेपः ... संक्षेपो यासु ताः श्रुतिसंहिताः ...
रत्ननानाकरणादप्रवृत्तिर्नोपात्तं ... यो वदंति स्वचः प्रतिपाद्याप्यक्तयस्ताभिः कृत्वा सुविशदीकरवाणि प्रकटीकरोमीत्यर्थः। ननु
लीलावत्यादिप्राचीननिबंधाध्ययनेनैव कारिकावली प्रतिपादितार्थाचेत्तदवसाति किमनेन भवत्कृतविशदनिबंधनेनेत्यत
आह मतिसांहिसेति। तथा च लीलावत्यादिप्राचीननिबंधेषु ग्रंथबाहुल्येन दुरुतरत्वः स्वल्पे तु प्रतिपत्तिकतया न वालानां राम
प्रवृत्तिरिति भावः। श्लोके दामलकतां प्रयुक्तानां दर्शणीयेता निरमितं। चिरंतनेत्यस्मो नन्वित्यवधारणे तथा च कुलकादेवे १

ह... ...मेय... ...

त्यर्थः। एतेन स्वस्य ग्रंथकरणे प्रागभावः सूचितः। स्वस्य ग्रंथकरणप्रवृत्तौ निमित्तमाह। राजीवेति राजीवेयादयाङ्कयातपावर्णवद
त्सदर्चीनरस्यर्थः। प्रियवमोचदः स्वजित्यनेनात्ररवत्र भूपर्छिषद जंतस्यमुमितिमुमागमस्य॥ ननु ग्रंथादौ श्रोतृप्रवृत्त्यर्थं प्रयोजनादि
वक्तव्यं भवति तस्य वेसानुक्तत्वादुपेक्षणीयतैतत् ग्रंथस्यस्यादित्याशंक्य विषयप्रयोजनसंबंधाधिकारिणः सूचयन्। अतिसंक्षिप्त
त्वादेतत् ग्रंथस्य सकलपदार्थाप्रतिपादकतया कथं बालव्युत्पत्तिरितीमाचाशंकामेतद्ग्रंथस्य सकलपदार्थप्रतिपादकत्वप्रदर्शि
नेन परिहरन् स्वतःकरोति यदस्मा कियज्जनो सिद्दासियत। यत्र परस्यासिकौतेयतत्कुरु श्रमदर्पणमिति श्रीमद्भगवद्गीतेर्मुक्तावली
समस्त कीयग्रंथ श्री भगवति चार्पयन् शिष्याणां स्वस्मिन् प्रामाणिकताबोधाय ग्रंथस्य स्वस्य च नामनी निवध्नाति। सद्रव्येति। द्र
व्यैः सहिता ये मुक्ता प्रतिपादकतया गुणैरपि गुंफिता ये मुक्तास्तामुक्तैः च पदार्थानां पञ्चानां कर्मणां ज्ञापिका बोधिका सज्जातिस्तपसा
मान्यं विशेषाः नित्यः समवायस्तैर्मिलिता भावस्य प्रकर्षः प्रागभावादिभेदेन वैलक्षण्यं यतस्य उज्ज्वलताप्रकाशिका एषा बुद्धिस्था सिद्धा
न्तमुक्तावली सिद्धान्ताः एव मुक्तास्तासां आवली पंक्तिर्विहमोनारायणस्य वक्षसि वक्षस्थले विन्यस्ता विशेषतोर्पिता सुकृतिनां पं
डितानां मनसः मुदं संतोषं चिरं बहुकालं वितनुतां विस्तारयतु इत्यर्थः। ननु मुक्तानामत्रासत्वात् कथं विदुषां संतोषस्तत्राह। सद्
रिति। सत्यो युक्तयोपपत्त्यासा तया। मुक्तावलीसा द्रव्यपंचगुणद्रव्यादिपदार्थवत्तया। यथा मुक्तावली नानाविधद्रव्यवती गु
णान् सूत्रेण गुंफिता निर्मिता सुकृतिनां पुण्यवतां या निसंतिसमीचीनानि भगवद्भजनादिरूपाणि कर्माणि तेषां बोधिका सत्सामा
न्यसमीचीनज्ञातिर्विशेषो महत्वनिमित्तत्वादिस्ताभ्यां नित्यमनवरतं मिलिता संबद्धा भावे तेजोभावे ध्वकारे सति प्रकर्षेणोज्ज्वला।

... ध्वंसपूर्वकसमाप्तीत्यर्थः। नचैतत्रजन्मांतरीयमं ... ।नत्वर्थीमत्वार रात्र१। ... ...कात्मानो ...नार...

भवात्।२।१०व्यभिचारसंदेहस्य ग्राह्यसंशयरूपतया कारणतापत्तेस्तु एव प्रतिबंधकत्वं नत्वनुमितौ। ...स्यानुकूलत्वादित्यभिप्रायेणेन्द १०

र्थप्रकाशिकेति द्रव्यादिसकलपदार्थवर्तीति तथायं ग्रंथोपीति। अत्र च मुक्तावलित्वोक्त्या निर्दोषत्वं सूचितं। अत्र द्रव्यादिपदार्थप्रतिपा
दकत्वप्रदर्शनेन द्रव्यादयो विषया उक्ताः। पदार्थतत्त्वावधारणं च प्रयोजनं सूचितं संबंधश्च प्रतिपाद्यप्रतिपादकभावः। पदार्थत
त्त्वावधारणकामोधिकारीति। इतिशब्दो कार्थाः। ग्रंथारंभसमये कृतस्य मंगलस्य तान्निबंधनस्य चवैयर्थ्यमाशंक्य फलं दर्शयति। वि
घ्नविघातायेति। प्रारब्धस्येष्टस्य ग्रंथस्येति शेषः। यद्यप्यत्र घातपदस्योत्पत्तिमद्भावपरतया विपदमनर्थकमिति प्रतिभातित
थापि विशिष्टवाचकानां पदानां सति विशेष्ये विशेषणवाचकपदसमवधाने विशेष्यमात्रपरतायाः सर्वान्वकैर्मान्ततशरीर
धृरित्यत्र वाचकत्वेन वस्ते सुर्ये स्वनेत्यनेन लोहिता इति कोशान्मातत शरीरं धृत्वविशिष्टचेष्टाबोधकवाचकपदवतिहं
त्वात् घातपदमभावमात्रपरं द्रष्टव्यं। न तनेत्यादीति तु स्फुटतीयांतं। तथा च नत्तनेत्यादिना ग्रंथेनेत्यर्थः। ननु निष्फलत्वान्मं
गलाचरणमयुक्तं। न च निष्फलत्वमेवासिद्धं। तस्य फलविशेषस्य अन्यत्वस्वरूपहेतुनासाधनादित्यभिप्रायेणाशंकते। न
न्विति। मंगलस्य कारणत्वाभावे व्यतिरेकव्यभिचाररूपहेतुमाह। विनापीति। अत्र कादंबर्यादिग्रंथे मंगलसत्त्वेपि समाप्तेरद
र्शनेनान्वयव्यभिचारोपि दोषो बोध्यः। मंगलं समाप्तिफलकं समाप्त्यन्याफलकत्वे सति सफलत्वादिति परिशेषानुमानें
न मंगलस्य समाप्तिफलकता व्यवस्थापयिष्यन् प्रथमतो विशेष्यासिद्धिनिरासाय फलवत्त्वं साधयत्सविनीतेति। विषयत
च सत्तानविषयसुखेत्ति प्रसक्तमतश्चाचारेति। आचारस्यात्र यद्यपि क्रियैवं तथापि विषयतवश्रुतेः कृतिरेव विवक्षितात
विषयत्वं च विधेयतया बोध्यं। तेन न फले व्यभिचारस्तस्योद्देश्यतया कृतिविषयत्वात्। विधेयतया कृतिविषयत्वं चैतत्पदे

...फलत्वात् ततः सम्भवतीति। तथा च नञ्...दृष्टासंभवेनादृष्टकल्पनात् इति भावः। ४।५ यथा प्रकृतानुरूपकामनाविषयत्वेन पारिशेष्यानुमानप्रवृ...
...सन्नस्य प्रकृते व्यभिचारसंशयस्य कारणतानुमितौ च प्रतिबन्धकत्वाद् व्यभिचारनिर्णयस्य चाभावादिति भावः ९।१० वेजात्वं ९

दनादावपीष्यतः शिष्टेति। शिष्टत्वं च फलसाधनताभ्रान्तिरहितत्वं न तु वेदप्रामाण्याभ्युपगन्तृत्वं तेन बुद्धक्रमेण कृते दर्शादौ
२ निष्फलत्वे व्यभिचारः शिष्टाचारविषयत्वं श्येनयागादावप्यस्त्यतो विगीतेति। अविगीतत्वं च बलवदनिष्टाननुबन्धित्वं तेन श्ये
नादौ प्रवृत्तस्यापि पुंसः बलवदनिष्टाननुबन्धीष्टसाधनत्वरूपसाध्याभावेऽपि न व्यभिचारः। सिद्धे। अनुमिते। तत्र। मंगले। फलजि
ज्ञासायां विशेषतः फलजिज्ञासायां ननु तथापि विघ्नध्वंसजिज्ञासायाः स्वर्ग एव दृष्टकल्पतामत आह उपस्थितत्वादिति। मंगला
चारप्रवृत्तस्य पुरुषस्य आरब्धं कर्म मे निर्विघ्नं समाप्यतामिति कामनाविषयत्वेनोपस्थितत्वादित्यर्थः। कल्प्यते। अनुमी
यते अनेन च मंगलस्य समाप्तिहेतुत्वेऽनुमानमेव प्रमाणं न तु शिष्टाचारानुमिता श्रुतिरिदानीमानुपूर्वीविशेषनिर्ण
याभावेन तस्या अवबोधकत्वादिति सूचितं। व्यापकत्वघटितकारणताग्रहप्रतिबन्धकज्ञानविषयव्यतिरेकव्यभिचारमु
द्धरति। इत्थं चेति। मंगलस्य समाप्तिफलकत्वे चेत्यर्थः। तत्रापि। नास्तिकादिकृतेऽपि। तत्र। मंगले। कल्प्यते। अनुमीयते।
कार्यरूपसमाप्त्येति शेषः। नन्वेवं कारणताया अन्वयव्याप्तिघटि[illegible]तया अन्वयव्यभिचारज्ञानं कारणताग्रहे सति विरोधिभावविषय
त्वेन तस्याप्रश्नरान्वयव्यभिचारं निरस्यति। यत्र चेति। तत्र कादम्बर्यादौ [illegible]तावत्रत्वं महत्त्वं समाप्तिप्रतिबन्धकतयेति शेषः। न
न्वेवं कादम्बर्यादौ कृते न विघ्नध्वंस इत्यत आह। प्रचुरस्येति। प्रचुर[illegible]स्यैव मंगलस्येत्यर्थः। तथा च मंगलस्य विघ्नसमसंख्यमं
गलत्वेन नाप्रकर्तया न तत्र विघ्ननाश इति भावः। ननु तथापि कादम्ब[illegible]दौ विघ्नध्वंसो मा जायतां समाप्तिस्तु जायतां मंगल
रूपहेतोः सत्त्वादित्यत आह। विघ्नध्वंसस्येति। तथा च स्वजन्यविघ्न[illegible]ध्वंससम्बन्धेन मंगलाभावान्न तत्र समाप्तिरिति भाव

न्यसप्रा।जनकत्वो ... ःसिद्धं ... हवतात।विघ्नात्यंताभाववता।

M.S. 1246

१० आकुरित्यस्वरसोऽङ्गावनंतत्त्वबीजंतु विघ्नध्वंसस्यकारणतावच्छेदकसंबंधतयासमाप्तिजनकतानस्यात्। नचेष्टापत्तिः मंग
लजन्यजनकत्वस्वरूपकारणत्वबोधकोयोविघ्नध्वंसस्तद्धेतुरमितिग्रंथस्तद्विरोधापत्तेरिति। किंचविघ्नध्वंसस्यकारणत्वमिष्टं ताव
च्चामतेपिविघ्नध्वंसस्यकार्यत्वावच्छेदकतयाऽत्रविघ्नोमाभूदितिकामनास[?]स्यहेतुत्वनियामकत्वेनतत्संबंधावच्छिन्नप्र
तियोगितयाऽप्रसिद्धत्वेनहेतुत्वंचनतथाचमंगलाचरणेविघ्नध्वंसएवफलमितिवदताचिंतामणिकृतामतमपास्तं। नव्या
स्त्विति। विघ्नध्वंसस्यैवेत्येवकारेणसमाप्तिरूपव्यवच्छेदःफलत्वप्रवच्छेदस्य। ननुसमाप्तेस्तर्हिमाकस्मिकीस्यादित्यतआह।।
समाप्तिरिति। प्रतिभादीत्यादिनाविघ्नसंसर्गाभावपरिग्रहः। अनयैवरीत्याकारीरीस्थलेपिअवग्रहनिवृत्तिरेवफलं। प्रति
स्तुस्वकारणादेवेतिबोध्यं। ननुनिष्फलेप्रवृत्तिरेवकथमतआह। विघ्नध्वंसकयेति। संशयनिश्चयसाधारणविघ्नज्ञान
मेवप्रवर्तकमितिभावः। तदाचरणात्मंगलाचरणात्। ननुविघ्नसंशयेमंगलाचरणमेवासिद्धमित्यत्राहतत्त्वेनेतिविघ्नप्र
चारादिति। विषयतासंबंधेनमंगल[illegible]तिभावः। ननुनिर्विघ्नप्रचुरप्रत्यवायसत्त्वमंगलस्थलेऽन्वयव्यभिचारेणविघ्नध्वंसप्रति
मंगलस्यकारणतावाधितातथाच[illegible]धितार्थबोधकत्वाद्वेदस्याप्रामाण्यमितिमीमांसकृतेः कारणताबोधकत्वमंगलकर्तव्यताप्र
कानिरस्यति। नचेति। तस्यनिर्विघ्न[illegible]रूपानुष्ठितमंगलस्यतद्बोधकोरि। मंगलविघ्नध्वंसयोः कार्यकारणभावबोधकेत्य
र्थः। सतिविघ्नइति। तथाचोपपद्य[illegible]तस्यतेप्रतियोगिस्वरूपकारणाभावेनविघ्नध्वंसस्वरूपकार्यानुदयोपपत्तौकारणता
तायाअवाधितत्वेननकारणताबोधकवेदाप्रामाण्यमितिभावः। अतएव। नाप्यप्रतिप्रतियोगिनः कारणत्वादेवतत्वे

धतस्यपाप० नाश... भवराप्रामाण्यमित्यर्थः २४९ त। विनायकस्तवस्य मंगलत्वेपि तदनुकूलकंठाभिधानरूपस्य तत्पाठस्य मंगलत्वाभावात्। नच पा...
...मनाशकः। सच... नैवेति नव्यभिचार इति वाच्यं। सर्वे विघ्नाः शमं यांति इत्यादिना तत्पाठस्यापि विघ्ननाशकत्वबोधनात्। प्रायश्चित्तजन्यविघ्नध्वंसे व्यभिचारात् चे १
...दित्यादिना प्रायश्चित्तादिसंग्रहः २ १ कथा १ ३ विजातीयविघ्नध्वंसत्वं वा २ २ विजातीयविघ्नध्वंसत्वं वा २। ३ नव्यभिचार इति ३

धकेति प्रायश्चित्तबोधकेत्यर्थः। ननु मंगलं न विघ्नध्वंसे कारणं विनायकस्तवपाठादिजन्यविघ्नध्वंसे व्यभिचारादित्यत आ
हमंगलत्वेति। तथा च मंगलस्य स्वाव्यवहितोत्तरक्षणोत्पत्तिकत्वसंबंधेन मंगलत्वविशिष्टविघ्नध्वंसत्वं कार्यतावच्छेदकं। एवं वि
नायकस्तवपाठस्यानुपदर्शितसंबंधेन विनायकस्तवपाठविशिष्टविघ्नध्वंसत्वं कार्यतावच्छेदकमिति भावः। ननु समाप्तिं प्रति
विघ्नध्वंसस्य न कारणता। स्वतःसिद्धविघ्नविरहस्यत्वे समाप्तेर्दर्शनादित्याशंकां निरस्यति ह्यचिदिति। विघ्नसंसर्गाभाव
त्वेन रूपेण हेतुत्वान्न व्यतिरेकव्यभिचारस्फूर्तिभावः। तेन रूपेण कारणत्वे बीजमाह। प्रतिबंधकेति। अत्र च तत्तद्विघ्नाभाव
त्वेन हेतुता न तु विघ्नाभावकूटत्वेन विघ्नप्रागभावादीनामसंभवेन समाप्तिर्न स्यादिति बोध्यं। यत्र च मंगलं विना विसमा
प्तिस्तत्र विघ्नध्वंसाभाववति समाप्तेर्दर्शनाद्व्यतिरेकव्यभिचारमाशंक्य निषेधति। इत्थं चेति॥ यत्र च मंगले सत्यपि न
समाप्तिस्तत्र मंगलादिविघ्नध्वंसोत्पत्तेरेव समाप्त्यभावस्तत्र विघ्नस्य स्वाव्यहितमंगलानंतरोत्पन्नविघ्नादेस्तत्प्रतिबंधकत्वेन। न
नु मंगलस्य विघ्नध्वंसत्वं न कार्यतावच्छेदकं प्रायश्चित्तादिजन्यविघ्ननाशे व्यभिचारादिति चेन्न। विजातीयविघ्ननाशत्
त्वावच्छिन्नं प्रति मंगलस्य हेतुताया विवक्षितत्वात्। विघ्ननिष्ठवैजात्यं च मंगलनाश्यतावच्छेदकतयैव सिद्धं तदेव च
मंगलस्य कार्यतावच्छेदकं स्वाश्रयप्रतियोगिकत्वसंबंधेन विघ्नध्वंसे विद्यमानं। अथ समाप्तिविघ्नध्वंसयोराकाशात्म
निष्ठयोः केन रूपेण कार्यकारणभावः। न च तयोः सामान्यकार्यकारणभावमानाभावः। अन्विष्याणीयापत्तिवारण
यतज्ञत्समाप्तित्वावच्छिन्नं प्रति तत्तद्विघ्नध्वंसव्यक्तित्वेन हेतुत्वस्याव्यवस्थापकत्वादिति वाच्यं। यद्धि शापयोः कार्यकारण

४ भावे सति बाधके तत्सामान्ययोरपीति न्यायेन तत्सिद्धेः। विशिष्यकार्यकारणभावस्य प्रवृत्तेः सर्वमत्र हेतुप्रवृत्तेश्चाव
यानीयापत्तौ मानाभावाच्च। अत्रोच्यते। समाप्तित्वेन कार्यता विघ्नध्वंसत्वेन कारणता यत्र स्वप्रतियोगि
[illegible] कालत्वसंबंधेन चरमवर्णध्वंसरूपसमाप्त्युत्पत्तिस्तत्र विशेषणतासंबंधेन विघ्नध्वंस इति सामानाधिकरण्यप्रत्
५ सत्तिः। अत्रके चित्। निर्विघ्नं समाप्यतामिति कामनयेष्टविघ्नो मा भूदिति कामनया च मंगलमाचरंतीति निर्विवादं। तत्रा
द्यावा कामनाफलविषयिणी द्वितीयाल्पायविषयिणी न्त्ववक्तितायेव कामनाफलविषयिणी आद्यापि कामनास्वविशेष
णेऽन्यायेन विघ्नाभावस्यैव फलत्वबोधिकेति वर्द्धमानोक्तं प्रावंच। तन्न्यायस्य सति विशेष्ये बाध एव प्रवृत्तेः। न चोपायवि
षयिणी कामनानन्वयेति वाच्यं। पुत्रो मे जायतामिति तेन त्वयापि श्येनादौ यागसाधनीभूतपुत्रविषयिण्याः कामनायाः दृष्टत्वा
त्। आद्या तु कामनानोपायविषयिणीति फलविषयिण्येव न चोभयविषयिणी आद्यकामनातत्कार्यसमाप्तिरेव फलमि
ति वाच्यं विघ्नत्वादौ व्यभिचारेण कामनाविषयत्वस्य फले विनिगमकत्वाभावात्। विघ्नाभावस्य फलतावच्छेदकत्वेन का
मनायाश्च विषयत्वाच्च। न च प्रतियोगितायाः स्वरूपसंबंधात्मिकाया भेदाद्धेतुताभेदः तस्यातिरिक्तत्वात्। न च वृत्त्यनि
यामकसंबंधस्य प्रतियोगितानवच्छेदकत्वेन तत्संबंधावच्छिन्नाया कारणताया अप्रसिद्धिरिति वाच्यं वृत्त्यनियामक
संबंधस्यापि प्रतियोगितावच्छेदकत्वांगीकारात् अत एव संयोगेन गगनाभावादिनाकेवलान्वयित्वमुपपद्यते इत्याहुः। अन्य
त्वेन्तरं तेनेत्यादि। नतनोयोजत्तधरामेघास्तस्य रुचिरिव रुचिर्दीप्तिर्यस्य तस्मै। एतेन यथा न्नतन्नजलधरः श्यामांग इति प्रदत्त

थांयमपि स्वाभिलषितफलप्रदातेति सूचितं । नमस्कार्यस्य भगवतः संतुष्टतां सूचयितुं विशेषणमाह गोपेति । गोपानां वध्वो
मुग्धस्त्रियः तासां दुकूलेति वस्त्रं तस्य चौरायेत्यर्थः । तस्मा इति तच्छब्दः सामान्यतः सकलजनप्रसिद्धसूचनाय श्रीकृष्णाय नम
इत्यनेन भगवतो नमस्कारप्रकारतापकर्षो व्यावर्धितस्तत्त्वमस्य त्वमुक्तं । तदयुक्तं भावं विना भावाद्भगवतीत्याशंक्य नैयायिकाभि
मतेश्वरसाधकानुमानसूचनाय तत्रैव संसारमहीरुहस्य बीजायेत्युक्तं तत्र च संसारस्य महीरुहत्वं निरूपितमुरुषपत्रमत्या
वर्णयितुं कर्मधारयसमासमाह संसार एवेति । बीजत्वं समवायिकारणत्वं तच्चेश्वरे बाधितमतस्त्वाह निमित्तेति संसारमही
रुहस्य बीजायेत्यनेन सूचितमनुमानं प्रदर्शयति । एतेनेति । क्षितिः सकर्तृका कार्यत्वादित्यनुमानं प्रमाणमित्यर्थः । सकर्तृक
त्वं च ज्ञानेच्छाकृतिजन्यत्वं ज्ञानादिश्चोपादानविषयकं बोध्यं तेन चादृष्टद्वारा ज्ञानादिजन्यत्वेन सिद्धसाधनता । ननु यत्किं
चिदुपादानगोचरत्वमतिप्रसक्तं स्वोपादानगोचरत्वं च सर्वत्राननुगमादननुगतमिति चेन्न उपादानगोचरज्ञानादेः कारणत
या सिद्धतः कार्यसमवायिमात्रविषयकत्वात् । कार्यत्वं च प्रागभावप्रतियोगित्वं । ज्ञानादेश्च कारणतावच्छेदकः संबंधो विषयताका
र्यतावच्छेदकश्च समवायः । न च घटत्वादिकमेव ताद्रूप्यात्मज्ञानादिजन्यतावच्छेदकमस्त्विति वाच्यं । उपदर्शितकार्यत्वस्य स
र्वानुगतत्वेन लघुत्वात् । न च तस्मिन्नाख्यातस्य व्याप्यतावच्छेदकत्वं न स्यात् । सिद्धसाधकतावच्छेदकत्वेन व्याप्यत्वस्यैव व्या
प्यतावच्छेदकत्वसंभवादिति वाच्यं । संभवति लघौ धर्मे गुरावनवच्छेदकत्वाभावेन यत्नत्वस्यैव व्याप्यतावच्छेदकस्ये
ष्टत्वात् । यद्यपि प्रकृते घटत्वादयो धर्मा लघवोऽपि संभवंति तथापि तेषां व्यवच्छेदकताकल्पने गौरवं ताद्रूप्यस्य तत्

दकत्वेतित्वावच्छेदेनसकर्तृकत्वरूपसाध्यसिद्धिरुद्देश्यानातोघटादिषुसकर्तृकत्वसिद्धांशप्रतःसिद्धसाधनं। ज्ञा
नमिरंथांतरतावारयतिनचेति। बहूनांकर्तृत्वेगौरवादितिभावः। अत इति। जीवानांकारणत्वाभावादित्यर्थः। तत्कर्तृ
त्वेन। क्षितिकर्तृत्वेनेश्वरसिद्धिरिति। कर्तृजन्यत्वविषयिण्या अनुमितेः कर्तृविषयत्वेनास्मदादीनांचकर्तृत्वाबाधेऽर्था
दीश्वरःसिध्यतीतिभावः। सत्प्रतिपक्षइति। क्षितिः कर्तृजन्याशरीराजन्यत्वादितिसकर्तृकत्वाभावसाधकहेतुसत्वेका
र्यसरूपहेतुना क्षितिविशेष्यककर्तृजन्यत्वप्रकारकज्ञानंजनयितुंनशक्यतेक्षितिविशेष्यककर्तृजन्यत्वाभावव्याप्यहेतु
ज्ञानस्यप्रतिबंधकस्यविद्यमानत्वादिति। नचहेतुनापक्षधर्मताबलादप्रसिद्धः कर्तासाध्यंप्रतिहेतुतातुप्रसिद्धकर्त्र
भावप्रतिभिन्नविषयत्वान्नसत्प्रतिपक्षत्वप्रतिवाच्यंसकर्तृकत्वसामान्याभावस्यसाध्यत्वात्प्रतियोगितावच्छेदकाव
च्छिन्नयत्किंचित्सकर्तृकज्ञानादेवतज्ज्ञानादित्यभिप्रायः। अप्रयोजकत्वादिति। कर्तृजन्यत्वाभावसाधकहेतुनिष्ठव्याहर
नुकूलतर्कासंभवादित्यर्थः। स्वोक्तेश्वरसाधकहेतावप्रयोजकताशंकांनिराकरोति। नमत्विति। घटत्वावच्छिन्नंप्र
तिकर्तोर्विषयतयाकारणतायाअन्वयव्यतिरेकसहकृतप्रमाणसिद्धतयापक्षविशेषयोरितिन्यायेनकार्यत्वेनकृतित्वेनका
र्यकारणभावसिद्धिरित्याशयः। पक्षविशेषयोरितिन्यायाभावेपियथेतादृशकार्यकारणभावसिद्धिस्तथानुपदमेवोपपादितं।
नचतथाप्यनित्यएवसईश्वरःसिध्यत्वितिवाच्यं। उत्पत्तिविनाशकल्पनायागौरवेणानित्यत्वबाधेनित्यत्वसिद्धेरश्वरस्य
त्वात्। नचतथापित्तस्यैकत्वेमानाभावइतिवाच्यंक्षितिकर्तुरेकत्वेलाघवमनेकत्वेगौरवंइत्यादिकारकताघटकज्ञानसह

कृतोपदर्शितानुमानादेव सिद्धेः। ईश्वरप्रतिपादकांश्रुतिमप्याह। द्यावाभूमी इति। ईश्वरे प्रमाणान्तरयेति शेषः। कार्यत्वाव
च्छिन्ने कृतेः प्रत्यक्षस्य च हेतुत्वेन खंडघटकारणीभूतकृत्याश्रयतया परमाणुनिष्ठक्रियोत्पादकापेक्षाबुद्ध्याश्रयतया द्व्य
णुकाद्युपादानप्रत्यक्षाश्रयतया चेश्वरसिद्धिरित्यपि नास्तु चितं। दीधितिकृन्मते। अतीन्द्रियाणि द्व्यणुकादीनि ज्ञानेच्छाकृतिशाली
नि कार्याणीत्यनेन ज्ञानादेः सिद्धौ तदाश्रयत्वेनेश्वरसिद्धिः। अतीन्द्रियत्वं च विषयतया साक्षात्कारजनकत्वं। नातः सामाना
धिकरण्येनानुमितेस्तद्विषयत्वेपि सिद्धसाधनं। कार्यत्वं च प्रागभावप्रतियोगित्वमात्रं न तु सत्त्वविशेषितमपि ध्वंसे व्यभि
चारात्तादवात्। किंचास्मदाद्यकर्तृकाणां शरीरावयवसंयोगादीनां कर्तृत्वेनेश्वरसिद्धिः। प्रतिपादयति च प्रतिमारवमीप्सि
तुः कृतयो जगत्कर्तृत्वादिकं एतेन ज्ञानेच्छाकृतीः प्रतिलाघवेनेश्वरज्ञानेच्छानां हेतुत्वनिश्चयान्नित्यज्ञानादिसिद्धिरिति
परास्तं लाघवमात्रप्रवृत्तेनानुपजीव्येन मानेन तादृशश्रुतिसहकृतत्वबाधायोगात्। एवं श्रुत्या नित्यसुखमपि स्यादोमिति कुर्म इत्याहुः। मन्द
लेपि शिष्यावधानाय प्रतिजानीते। द्रव्यगुणा इति। निरूप्यंत इति शेषः। द्रव्याणां बहुत्वेप्यात्मनः प्राधान्यख्यापनाय द्रव्यमित्येकवचनं। त
द्विषयाणां श्रवणादिप्रतिपन्नानां बहुत्वं गुणा इति बहुवचनेन व्यज्यते। संयोगापेक्षया कर्मणोतिरिक्तत्वेनास्तीति। अषणामतं निराकर्तुं त
थेत्युक्तं यथा गुणः पृथक्पदार्थस्तथा कर्मापीत्यर्थः। अभावोधिकरणात्मक एवेति प्राभाकरमतं दूषयितुं पुनस्तथेत्युक्तं। युक्तिश्चा
ग्रे वक्ष्यते। यदापि विभागान्तरेनाधिकसंख्याव्यवच्छेदकतयैव सप्तसंख्यालाभात्तथापि सप्तग्रहणं स्पष्टार्थं नन्वन्येपि पदार्था। कुत
नोक्ता इत्याशंक्याह। कीर्त्तिता इति। तथा चैतेभ्योन्ये पदार्था न संत्येव कणादप्रभृतिभिरनुक्तत्वादिति भावः। नन्वितरे भुवंये षड्

मु॰टी॰
६

न्यपदार्थाः सप्तमस्त्वभाव इति निरूपितं तथैवात्रापि कुतो न निरूपितमित्याशंक्य हेतुमुक्त्वा यत्पदं सप्तमस्येति। अत्र समवाये वाऽथ
समवायान्यतरसंबंधेन सत्त्वावत्त्वं भावत्वं तदभावोऽभावत्वमिति प्राप्तं। अर्थात्प्राप्तं। तेनार्थप्राप्तत्वेनानुपन्यास इति। तेषामि
ति पोषः। नन्वन्येऽपि पदार्थाः कथं न संति न्यायग्रंथे षोडशपदार्थनिरूपणादित्याशंक्य नैयायिकानामपि मते सप्तपदार्था इत्य
विरुद्धं षोडशपदार्थानां सप्तपदार्थेष्वंतर्भूतत्वादित्याह। एते चेति। उक्तोऽर्थो भाष्यसंमतिमान् प्रतिपादितमिति। भाष्ये कणाद
निर्मितसूत्रभाष्ये। भाष्यस्यार्षत्वामाप्रामाण्यमंगीकृत्योपाध्यायसंमतिमाह। अत एवेति। मण्यादिसमवधाने सति वह्निना दाहोत्पत्तिवा
रणाय मण्यादेः कारणविघटकत्वरूपा प्रतिबंधकता वाच्या। सा च वह्निनिष्ठदाहानुकूलशक्तिरूपकारणविघटकतयैव
निर्वहतीति मण्यादिप्रतिबंधकत्वान्यथानुपपत्त्या सिद्धायाः शक्तेः षड्भावेष्वनंतर्भूतत्वादतिरिक्तत्वमिति। पदार्थाः सप्त कीर्त्ति
ता इति मतमयुक्तमित्यभिप्रायेण प्राभाकरः प्राकतो नान्विति। अतिरिक्तेति सप्तपदार्थातिरिक्तेत्यर्थः। अतिरिक्तपदार्थतामेव
व्यवस्थापयति। तथाहीत्यादिना। मण्यादीत्यादिना मंत्रौषध्यादिपरिग्रहः। समवहितेन। समीपवर्तिना। ननु वह्निरूपकारणाभा
वादेव न दाह इति न मण्यादेः प्रतिबंधकत्वमतः समवहितेन वह्निनेति। दाहो रूपांतरोत्पत्तिः स्पर्शरूपपरावृत्तिर्वा। मण्याद्यतिरि
क्तप्रतिबंधकत्वं खंडयति। तथान्येनेति। मण्यसमवधानमन्येनेत्यर्थः। ननु वह्नौ यादृशदाहानुकूलशक्तिः सदा मण्यादिसत्त्वे कुतो
न दाहस्तत्राह तन्नेति। पूर्वोक्तायुक्तत्वाच्छक्तिसिद्धाविति अर्थः। नापरतन्त्रस्यास्य इति कल्प्यतामित्यग्रेतनेनान्वयः। तथा च वह्निनिष्ठशक्तेर्वा रा
वच्छिन्नप्रतिमणित्वेन नाशकत्वस्वीकारेण मण्यादिसत्त्वदशायां शक्तेरभावादेव न दाह इति भावः। दाहानुकूलेति। अत्र चानुकूलत्वं

कारणतावच्छेदकसाधारण्यं तेन प्राप्तेः कारणतावच्छेदकत्वेपि न क्षतिः। ननु मण्यादेर्यदि शक्तिनाशकत्वं तदास्तु तेजकाविशिष्टे
मण्यादावपसारितेवादाहानापत्तिरित्यत आह। उत्तेजकेति। तथा चोत्तेजकाद्यभावविशिष्टमण्यादेरेव शक्तिनाशकत्वेति भावः
मण्याद्यपसारणे न चेत्यत्र चकारो वाकारार्थः। न च दाहप्रतिमण्यभावत्वेन हेतुत्वकल्पनान्मणिसमवधानकालीनदाहाप
त्तिरिति वाच्यं। मण्यभावत्वेन रूपेण सत्त्वे तत्र हेतुताकल्पने गौरवात्। विलक्षणशक्तिमत्त्वेन वह्नेः कारणत्वकल्पनस्यैवोचितत्वा
त्। नन्वेवं शक्तिसिद्धावपि तस्या अतिरिक्तत्वासिद्धिरिति चेन्न। उक्तपदार्थेष्वनंतर्भूतत्वात्। तथाहि न तावद्द्रव्यात्मिका शक्तिः
द्रव्यस्य गुणाद्यवृत्तितया गुणेषु शक्त्यभावप्रसंगात्। नापि गुणात्मिका कर्मात्मिका वा। गुणकर्मणोर्गुणकर्माद्यवृत्तितया गुणकर्म
णोः शक्त्यसिद्धितापत्तेः। न च सामान्यादिभावान्यतमरूपा। नित्यत्वापत्तेरिति। नाप्यभावरूपा। सत्त्वेन प्रतीयमानत्वात्। एवम
तिरिक्तां शक्तिं प्रसाध्याधुना सादृश्यस्याप्यतिरिक्तपदार्थतां व्यवस्थापयति। एवमित्यादिना। अतिरिक्त इति। उक्तसप्तपदा
र्थातिरिक्त इत्यर्थः। अतिरिक्तत्वे हेतुमाह। तदीति। तत्सादृश्यं हि सत्तो तथा च सादृश्यमतिरिक्तः पदार्थः षड्भावानंतर्भूतत्वादि
त्यनुमानं सूचितं। तत्र हेत्वसिद्धिं निरस्यति। सामान्येपीति। तथेति। यदि सादृश्यं द्रव्यादावंतर्भूतं तदा द्रव्यादेः सामान्याद्यवृ
त्तित्वेन च यौगेत्वं नित्यं तथा च स्वत्वमित्यबाधितप्रतीतिर्न स्यादित्यर्थः। अभावांतर्भावमाशंक्य निराचष्टे। नापीति। यद्यप्यतिरि
क्ताभावमनंगीकुर्वतः प्राभाकरस्य मते भावेंतर्भावचिंता न संभवतीति तथापि परमतमभ्युपेत्येदं निराकृतमिति भावः। सत्त्वेन
भावत्वेन प्रतीयमानत्वात्। मणिसमवधानकालीनवह्निना दाहस्य कारणाय प्राभाकरेण साधितां शक्तिं दूषयति। मण्याद्यभावेति। अ

तिरिक्तपाक्तिकल्पनापेक्षयैव लाघवात्प्रकल्पनां चोपेक्षणाला घवाद्युक्तत्वावच्छिन्नं प्रतिमण्यभावत्वादिनैव हेतुताकल्पनमुचि
७ तमिति भावः। दाहादिकमित्यादिपदेन वह्निसंग्रहः॥ मणिसत्त्वे वह्नेरप्यनुत्पत्तेः। तथाच मणिस्तत्प्रतिबंधकस्त्राववन्नदा
स्ववह्नीइति भावः। ननु यदा कदाचिन्मण्यभावविशिष्टवह्न्यादिसाम्यत्तेः कारणतावच्छेदकावत्तीय्यकारणमत्वस्यैव कार्योत्पत्ति
नियामकत्वादित्यत आह। मण्याद्यभावादेरिति। तथाच प्रतिबंधकत्वं न कार्यानुकूलत्वधर्मविघटकत्वं बाधज्ञानस्यानुमि
तिप्रतिबंधकत्वाभावापत्तेः किंतु कारणीभूताभावप्रतियोगित्वं। तच्च मण्यभावस्य हेतुत्वस्वीकारे उपपद्यते न त्वतिरिक्तशक्ति
सत्त्व इति भावः। न च प्रतिबंधकत्वस्यैतद्रूपत्वे कारणीभूतवह्निस्वरूपाभावप्रतियोगिनि विह्नाभावे तिव्याप्तिः स्वप्रागभा
वप्रतियोगिनि घटादौ चेति चेन्न। तादात्म्यातिरिक्तसंबंधावच्छिन्नाया कारणतातदाश्रयीभूताभावभिन्नोत्पंताभाव
त्वप्रतियोगित्वस्य विवक्षितत्वात्। कारणताविशेषापादानाच्च स्वात्यंताभावप्रत्यक्षत्वस्य प्रतिबंधकत्वापत्तिः परास्ता विष
यस्य तादात्म्यसंबंधेनैव प्रत्यक्षहेतुत्वात्। ननु वह्निमण्यभावयोर्द्वयोर्हेतुत्वापेक्षयातिरिक्तशक्तेरेकस्या एव हेतुतापक्लृप्ता ला
घवादित्यत आह। अनेनैवेति। दाहादिकं प्रतिमण्यभावादेर्हेतुत्वकल्पनेनैवेत्यर्थः सामंजस्ये। मणिसमवधानदशायां दा
हानुदयेप। प्रागभावे मानाभावादाह। ध्वंसेति इदमुपलक्षणं। प्रतियोगिध्वंसयोः कार्यकारणभावकल्पनापि स्यादित्यपि बोध्यं
उत्तेजकाभावेति। तथाच केवलमणिर्न प्रतिबंधकः किंतूत्तेजकाभावविशिष्टस्तदभावश्चोत्तेजकसमवधानकालेपि १७
तिष्ठतीति न व्यभिचार इति भावः। ननु यमण्यादिस्थलीयदाहं प्रत्युत्तेजकस्यैव हेतुतास्त्विति चेन्न। तस्याननुगतत्वात्। तदभा

त्वस्य चानुगतत्वात्। कोचित्तु मणिसमवधानकालीनवह्निनादाहवारणाय तत्तद्वणसंबंधस्यैव कारणत्वेनाभ्युपेयत्व-
मतिरिक्तपदार्थे न मणेभावस्य हेतुत्वांगीकारे गौरवं त्याहुः। तदयुक्तं वह्नेनांततद्वणसंबंधानांतत्तद्व्यक्तित्वेनानंतकार्यकारण-
भावमपेक्ष्य तादृशमणेभावस्यैवाप्येव हेतुत्वकल्पनायां लाघवात्। अन्यथा सर्वत्रैव तत्तद्वणसंबंधानां विशिष्य हेतुत्वेनातिप्र-
संगभंगे च विशेषकारणमात्रस्यैव कल्पनानास्यादिति। ननु दाहमणेभावयोः केन रूपेण कार्यकारणभाव इति चेत् उच्यते
दाहत्वेन कार्यतावच्छिन्नमणेभावत्वेन कारणताय आभावीयविशेषणतासंबंधेन दाहो जायते तत्र उद्देश्यतावच्छेदका विशे-
षणतान्यतरसंबंधावच्छिन्नप्रतियोगिताकानि। तत्र कुत्रेत्यकाभावानां सामानाधिकरण्यरूपं यद्वैशिष्ट्यं तदवच्छिन्नस्य म-
णिपादेर्दैशिकविशेषणतासंबंधावच्छिन्नप्रतियोगिताकोभावः सोभावीयविशेषणतासंबंधेनेति सामानाधिकरण्यप्रत्या-
सत्तिरिति। एतेन मणेभावो यदि संयोगसंबंधावच्छिन्नप्रतियोगिताकः कारणता तदा मणिसंबंधेन मणिसंबंधेप्यन्यप्रदे-
शावच्छेदेन त्वदाहापत्तिर्यदि वा समवायसंबंधावच्छिन्नप्रतियोगिताकः सतदा मणिसंयुक्तेपीधने दाहापत्तिः। समवाये-
न मणेरसत्वादिति परास्तं। नन्वनुमानमेव प्रत्यक्षेप्रमाणं तथाहि वह्निर्दाहावकृत्ता विशिष्टा। तीव्रियधर्मसमवायीदाहजनक-
त्वादात्मवदिति। साध्ये वह्निनिष्ठोष्णस्पर्शमादायार्थान्तरतावारणाय तीव्रियेति। वह्निगगनादिसंयोगादिकमादायार्थान्त-
रतावारणायाव्द्विष्टेति। वह्निद्वयणुकैकत्वमादायार्थान्तरतावारणाय दाहानुकूलेति। न च दाहानुकूलत्वे न नैव वह्निग-
गनादिसंयोगादिव्यावृत्तौ अविशिष्टपदमितिवाच्यं। तस्य वह्निगगनादिकेंधनसंयोगरूपदाहानुकूलत्वात्। तीव्रियधर्ममादा-

उ॰टी॰ पार्थेतरतावारकत्वादितिचेन्न। विपक्षबाधकतासंबंधेन त्वरणफूत्कारसंयोगादीनां त्वरणफूत्कारसंयोगत्वादिरूपेणकारणता
याव्यभिचारेणासंभवादतिरिक्तशक्तिसिद्धिः। नचत्वरणफूत्कारयोरारणिनिर्मथनयोर्मणितरणिकिरणयोश्चसंबंधस्यजन्यता
८ वच्छेदकंवह्नित्रित्वेजात्यत्रयकल्पनामपेक्ष्यतत्तत्संबंधानामेवक्लृप्त। शक्तिमत्त्वेनकारणत्वकल्पनायाएवलघुत्वेनन्याय्यत्वादि
त्याहुः। तन्न। तत्तत्संबंधसाधारणैकजातेरेवाभ्युपगमात्। नचयोगपद्यदिजातेर्योगपत्त्वापत्तिरितिवाच्यं। दोषविशेषेणप्राति
रिवायोगपत्त्वकल्पनात्। नचनोदनत्वादिनासंस्कारः। तस्यादोषत्वात्। अन्यतमत्वेनापिकारणत्वसंभवाच्च। नचान्यतमत्वघटक
वि॰९ भेदानामियोविशेष्यभावैर्निगमनाविरहेणकारणतावच्छेदकभेदात्कारणताबाहुल्यंपद्यतिवाच्यंकारणतावच्छेदकानामुभनि
यतानांभेदनायेकेनकारणतावच्छेदकैक्यसंभवात्। परेतुत्वरणादिसंबंधकालीनवायुसंबंधयोगादीनामेकशक्तिमत्त्वेनहे
तुतामादायविनिगमनाविरहात्तत्संबंधाभावस्यैवप्रतियोगिविशेषणतोभयसंबंधेनहेतुत्वकल्पनाच्चनशक्तिसिद्धिरि
त्याहुः। यदाशंकितंसादृश्यमप्यतिरिक्तःपदार्थइतितदपिनिराकरोति। सादृश्यमपीति। तद्भिन्नत्वेतीति। इदंचसादृश्यनिरू
पकेतिव्याप्तिवारणायअनुयोगितासंबंधविवक्षणेतुनदेयमेव। तद्गतभूयोधर्मवत्त्वमिति। तत्रासाधारणेनविद्यमानाये
भूयांसोधर्मास्तद्वत्त्वमित्यर्थः। नन्विदंगगनंगगनाकारंसागरःसागरोपमः। रामरावणयोर्युद्धंरामरावणयोरिवेत्यादावव्याप्ति
रितिचेन्नतद्भिन्नधर्मवत्त्वमात्रस्यतत्रविवक्षितत्वात्। युगभेदविवक्षयाभेदसत्त्वात्। अतएवयुगभेदविवक्षायामिदमुपमाल
कारोन्यदानन्वयालंकारइत्युक्तंकाव्यप्रकाशे। यथासादृश्यघटकर्मत्वकविज्ञातिरूपोयथाघटसदृशःपटइत्यादौक्वचिदुपा

रूपो यथा गो त्वं तथाश्वत्वमपीत्यादौ। यथा वा चंद्रसदृशं मुखमित्यादौ वा ह्लादकत्वादिर्व्यतिरिक्तकल्पने गौरवादिति। ज्ञान
त्वानुनेस्वरूपसंबंधरूपा नास्तु। सादृश्यादिकमतिरिक्तमेव। न चातिरिक्तत्वे पदार्थविभागव्याघात इति वाच्यं। तस्य सादृ
श्यं परया तत्वज्ञानोपयोगिपदार्थमात्रनिरूपणत्वात्। एवमधिकरणत्वमपि तस्य संयोगादिस्वरूपत्वे बदरकुंडसंयोगस्य
द्विष्ठत्वेन कुंडे बदरमितिवद्बदरे कुंडमित्यपि प्रयोगः स्यादेव प्रतियोगित्वमपीत्यादि सादृश्यपत्तदाणंत्वद्ध्येयोज्ञयेति।। यथेति। द्र
ति शब्दः श्लोकव्याख्यासमाप्तिद्योतकः। स्त्रियां क्तिन्निति सूत्रविहितक्तिन्प्रत्ययांतत्वाद्द्रुतिशब्दस्य त्तयपवाचकत्वादिति पद
स्य प्रकृतोपयोगिनमर्थमाह। क्षितिः पृथिवीति। क्षितिशब्दस्य पृथ्व्यन्तरचित्पादिपाणिनीयसूत्रे शब्दपरत्वादाह। आपोज
लानीति तस्यायसोपितेजः शब्दवाच्यत्वात्प्रकृते तेजः पदार्थं प्रदर्शयति। वह्निरिति। वायुरा
दिरित्यर्थः। देवविशेषस्यापि मरुच्छब्दवाच्यत्वात्प्रकृतोपयोगिनमर्थमाह। मरुत् वायुरिति। व्योमशब्दस्य वेदे ब्रह्मणि प्रयो
गादाह। व्योमाकाशमिति। देहविशिष्टचैतन्यवाचकत्वेन तद्देहिशब्दाद्देहावयवानामुपस्थितेराह। देहीत्यात्मेति। अथ ईश्वरस्य देहित्वा
मध्येऽनंततमो ब्रह्मांडचक्रवर्तित्वेन हृदाः भक्ता वेष्टा न्यायेनेश्वरस्य शरीरमिति। संसार्यहं एव वा शरीरमित्यन्ये। अतएव
यथा स्वरसादात्मेति दृश्यस्य श्रोतो वा सूत्रात्मानुश्रुतिः पंचैव वद्व्याख्यामादरीश्वरात्मन्येवात्तभावात्मनस्सर्व्वासमवेतात्मु
तेत भावादिति नवीनाः प्रकृतमतानिराकर्तुं संख्याबोधकपदस्मरणार्थमाह।। एतानि नवेति। व्योमांतास्तावत् द्रव्य
पतया सिद्धिः। न च भगवत एव शब्दाश्रयत्वं प्रत्येकं जीवमादाय विनिगमनाविरहात्। न च जीवानामाश्रयत्वे शब्दवानह

२५ मिति प्रत्यक्षापत्तिः। अदृष्टवद्योगपत्वस्यैव कल्पनात् कालादिषोक्त एतस्मिन्काले पटः इदंवस्त्व। दिशा इहइत्यादावनुगत
कार्यप्रत्ययात्मनसः आत्मसमवेतम्॥ तत्त्वे पार्थिवादित्वमरेणुनादाय विनिगमनाविरहइत्यापत्यः। मत्स्तेद्रव्याणीति। द्रव
१ यदंद्रव्यत्वरूपजातिविशिष्टार्थकं न तु गुणाश्रयत्वादिविशिष्टार्थकं गौरवात्। मतावत्प्रकिं प्रमाणमिति। किंशब्दः
प्रश्ने। ननु द्रव्यं द्रव्यमित्यनुगतप्रतीतिरेव जातिसाधिका भविष्यतीत्यत आह। नहीति। तत्र द्रव्यत्वादिजातौ। इत्येति। तथाच
इतरादिषु पामराणां द्रव्यत्वज्ञानाभावेन सर्वत्र द्रव्यसाधारणद्रव्यत्वरूपजातिसिद्धिर्न भवतीति भावः। कार्येति। अत्रत्वक
यस्य समवायः प्रत्यासत्तिः। कारणस्य तादात्म्यं यत्र समवायेन कार्यं तत्र तादात्म्येन द्रव्यं संबंधीति नियमात्। कार्यत्वस्य कार्यता
वच्छेदकत्वे गौरवात् कालिकसंबंधेन घटत्वादिकमादाय विनिगमनाविरहश्चात्र संयोगस्येति। अत्र च रूपादिगुणानां सक
लद्रव्यसाधारणाभावे द्रव्यकार्यतया प्रतियोगः। सकलद्रव्यवृत्तिसंख्यादित्रयस्य च गगनादिवृत्तिसंख्यादित्रयस्य नि
त्यत्वात् न च संयोगत्वावच्छिन्नं प्रति द्रव्यत्वेन समवायिकारणत्वे मानाभावः। तत्र द्रव्यवृत्तिसमवेतत्वसामान्यप्रतीतितत्त्वावच्छि
त्वेन समवायिकारणत्वस्यावश्यकतया गुणादौ तदुत्पादासंभवादिति वाच्यं कार्यमात्रवृत्तिजातेः कार्यतावच्छेदकत्वानिय
मेन तादृशकारणस्यावश्यकत्वात्। तादृशनियमानभ्युपगमे द्रव्यत्वेन स्पर्शवत्त्वेन स्पर्शत्वेन द्रव्यत्वेन च समवायिकारण २५
तास्यात्। अदृष्टापत्तौ तु कार्यकारणभावद्वयकल्पने गौरवं न च अनित्यद्रव्यत्वेन स्पर्शाद्रव्ये विशेषद्रव्यत्वेन वा जन्यपरमाणौ
स्पर्शासमवायिकारणत्वाभाववत्ति स्पर्शतापत्तिविनिच व्यभिचारेण तज्जात्यारंगीकारे पृथ्वीत्वादिना संकरापत्तेः स्पर्शादित

नाद्युक्तित्वेनहेतुतावच्छेदकीभूतायास्तद्व्यक्तित्वाश्रयव्यक्तेरन्यत्रासंभवेनतद्घटकत्वाभावसंभवात् । नचसत्तायाःसमवा
कारणतावच्छेदकत्वमास्तामितिवाच्यंतस्याप्यतिप्रसक्तत्वात् । ननुद्रव्यस्यसंयोगकारणत्वेगगनस्यापिहेतुतापत्तिः । नच
स्यापत्तिः । गगनस्याप्यदृष्टवदवृत्तित्वेनाविगतस्यशब्दभिन्नकार्यंप्रत्यन्यथासिद्धत्वादितिचेन्न । गगनत्वेनान्यथासिद्धत्वेऽपिद्रव्य
त्वेनरूपेणकारणत्वस्यसंभवात् । कथमन्यथाकालिकपरत्वादिकारणयोःकालदिशोराधारत्वेनकार्यमात्रहेतुत्वेविभाग
स्यवेतिद्रव्यत्वसिद्धिः । यथेदानीमुत्पन्नंसुखमितिप्रतीतेः । दुःखं रादेतानं बमितिविवरणात् तद्गुःखाभावःसुखवत्तथैवेदा
नीमुत्पन्नोविभागइतिप्रतीतेःसंयोगाभावएवविभागइतियेमन्यन्तेतन्मतनिराकरणायचनायानित्यसंयोगिगीवर्त्मन्य
साधारणेनाप्यजातिरूपद्रव्यत्वसिद्धिः । अत्रयद्यपिगुणवत्त्वेनान्यथासिद्धिःसंभवतितथापिसान्नात्संबवधर्मवाधेः
त्वेवानुगतप्रतीतेःपरंपरासंबंधविषयत्वप्रतिभावः । ननुदशमद्रव्यस्यतमसःसत्त्वान्नवद्रव्याणीत्ययुक्तमित्याभिप्रायेण
मीमांसकमाशङ्कते । नन्विति । ननुतमसिमानाभावादेवनास्त्युक्तमित्याशङ्क्यतमःसाधकंप्रत्यक्षंप्रमाणमाह । तद्गीतीति । त
नीलीत्यर्थः । प्रत्यक्षेण । चक्षुरिन्द्रियेण । ननुतमसःसिद्धावपितस्यद्रव्यत्वेकिंमानमित्याशङ्क्यकार्यानुमानंप्रमाणमाह । तस्य
तमसइत्यर्थः । चकारोद्रव्यत्वंभस्यनेनान्वेतितथाचतमोद्रव्यंरूपवत्त्वादित्यनुमानंप्रमाणंतमसिसूचितम् ॥ ननुतमसिरू
नालाभावः । नचप्रतीत्यातत्सिद्धिरितिवाच्यम् । प्रतीतेर्भ्रमत्वादतोहेत्वन्तरमाह । [illegible]यत्वादिति । कर्मवत्त्ववत्समवायसंबं
नविवक्षितंतेनजन्यमात्रस्यकालिकसंबन्धेनकर्मवत्त्वेऽपिनव्यभिचारः । नचस[illegible]पासिद्धिः । चलतीतिच्छायेतिप्रतीत्याकर्मव

१०

10

त्वसिद्धेः। तमसः द्रव्यत्वे लक्षणे गंधाभावे निराकुरुते। तद्वीत्यादिना। गंधेति गंधाभावस्य पदे तु त्वोक्तो पटगतगंधप्रतियोगिकाभावमादा
य घटे व्यभिचारो तु। अन्यत्वमुक्तं। हेतुश्च प्रतियोगिव्यधिकरणः समवायसंबंधावच्छिन्नप्रतियोगिताकोपि वोध्यः। तेन नोत्पत्ति
कालीनसंयोगसंबंधावच्छिन्नगंधाभाववति घटे व्यभिचारः। नीलरूपेति। अनुगतेनैकेनैव नीलरूपेण हेतुना जलत्वादिव
भेदसिद्धौ तेषां च भास्वररूपाभावादीनामननुगतानां हेतुतयोपन्यासः। जलादिकमित्यादिना तेजः प्रभृतिद्रव्यसंग्रहः। तथा
च नवद्रव्येषु अंतर्भावासंभवे परिशेषेण तमसो धिकद्रव्यत्वसिद्धिरिति भावः। ननु तमसो द्रव्यत्वे आलोकनिरपेक्षेण चक्षु
रिंद्रियेण ग्रहणं न स्यात्। द्रव्यचाक्षुषे आलोकसापेक्षचक्षुरिंद्रियं हेतुरित्यत आह। तत्प्रत्यक्षे चेति। तमः प्रत्यक्षे चेत्यर्थः। तमोभिन्न
द्रव्यचाक्षुषत्वावच्छिन्नं प्रत्येव संयोगसंबंधेनालोकत्वेन कारणत्वावधारणादिति भावः। आवश्यकतेजोभावेनेति। उद्भू
तानभिभूतरूपवत्तेजस्त्वावच्छिन्नाभावेनेत्यर्थः। अंधकाराभावस्य तेजः किं न स्यादिति तु स्वगस्पर्शाभास्वररूपवत्त्वैरन्यथानु
पपत्तेरिति लक्षणायां अवश्यकपदं उपपत्तौ। तमोत्वसिद्धावुपपत्तौ। ननु तमसस्तेजोभावत्वे रूपवत्ता प्रतीतिः कथमभावे रूपाभा
वादित्यत आह। रूपवत्त्वेति। ननु रूपवत्प्रतीतिभ्रमत्वे प्रमाणाभाव इति चेन्न। नीलं तम इति ज्ञानं भ्रमः अभावविशेष्यकनी
लविशेषणकज्ञानत्वात् नीलः पटाभाव इति ज्ञानवदित्यनुमानस्य सत्त्वात्॥ ननु रूपवत्प्रतीतिभ्रांतित्वेपि चलतीति प्रत्ययसिद्ध
कर्मवत्त्वहेतुना तमसि द्रव्यत्वं संभवतीत्यत आह। कर्मेति। चलतीति प्रतीतिः। न हि द्रव्येत्वन्योपाधिकी कर्मप्रतीतिरिति भा
वः। ननु प्रतीतिभ्रांतित्वं तत्रैव स्वीक्रियते यत्रोत्तरकाले बाधज्ञानं प्रकृते च तमो न चलतीत्युत्तरकाले बाधज्ञानाभा[illegible] कथं च

तीतेष्वपि तत्त्वमित्यतोऽन्यथयान्तरमाह। तमस इति। अवयववादीत्यादिना। उत्पत्तिध्वंसपरिग्रहः। यच्चारोपितनीलरूपं तम इति कन्दली
कारमतं। तन्न। इहान्धकार इति प्रतीतेरपि भ्रमत्वापत्तेः। तमो नीलं न च नीलिमेति प्रत्ययाच्च। ननु तमसो नातिरिक्तत्वेऽपि स्वर्ण
स्यातिरिक्तस्य द्रव्यस्य सत्त्वान्नवत्वव्याघातस्तदवस्थ एवेत्यत आह। सुवर्णस्येति। वक्ष्यत इति। तेजोनिरूपणावसर इति शेषः। क
ण्ठ इति। रूपरसगन्धस्पर्शाः संख्याः परिमाणानि पृथक्त्वं संयोगविभागौ परत्वापरत्वे बुद्धयः सुखदुःखे इच्छाद्वेषौ प्रयत्नश्च गु
णा इति विभागस्त्वेते सप्तदश कण्ठोक्ताः। चशब्देन। तत्र चशब्देन गुरुत्वद्रवत्वस्नेहसंस्कारधर्माधर्मशब्दाः सप्त समुच्चितास्ते
च सर्वे एकतया चतुर्विंशतिर्गुणा इत्यवहृताः। ननु चतुर्विंशतौ किं मानम्। गुणत्वं न च जातिविशेषस्तत्र प्रमाणाभावादित्यत आ
ह। तत्रेति। तेषु गुणेष्वित्यर्थः। अग्रे गुणनिरूपणावसरे वक्ष्यत इति। द्रव्योत्पत्तिसमये पाकजरूपादीनामुत्पादवारणाय द्र
व्यत्वावच्छिन्नकारणतानिरूपितकार्यतावच्छेदकतया गुणत्वजातिसिद्धिः। एवं च द्रव्यनाशक्षणे गुणोत्पादवारणाय मयसीवृंका
रणतासु कार्यसहवर्तित्वस्य प्रवेशेन योगेऽवक्तव्यो दोषः सोऽपि नास्तीत्याशयः। प्रत्यक्षसिद्धेति। चलनाकारानुगतप्रत्ययवेद्य
नेत्यर्थः। तस्य लक्षणमिति। लक्षणप्रयोजनं तु इतरभेदस्य व्यवहारस्य च सिद्धिः। सामान्यमितरेभ्यो द्रव्यादिभ्यो भिद्यते सामान्यमि
ति व्यवहारविषयश्च। नित्यत्वे सत्यनेकसमवेतत्वात्। यन्नैवं तन्नैवं यथा द्रव्यमिति। एवं लक्षणान्तरेऽप्यूह्यम्। अनेकेति। अनेक
त्वमेकभिन्नत्वं। जलपरमाणुरूपादावतिव्याप्तिवारणाय नित्येति। विशेषविभागस्त्वेकसमवायि फलमाह। नित्यत्वे
सत्यनेकवृत्तित्वमिति। न चैवं नित्यसंयोगेऽतिव्याप्तिरिति वाच्यं। तस्य निरस्तत्वात्। कुतो निरास इति चेन्न। द्रव्यनिरूपितसं

मु॰टी॰ योगनिष्ठकार्यतावच्छेदककोटौजन्यत्वनिवेशेगौरवान्नित्यसंयोगांगीकारेनयेसंयोगत्वस्यनित्यवृत्तित्वेनकार्यतानवच्छे
११ दकत्वान्तुल्ययुक्त्यानित्यविभागसिद्धापत्तेश्च।नन्वाकाशत्वस्वरूपजातावव्याप्तिस्तस्याअनेकसमवेतत्वाभावादित्याशंक्याते
न्यत्वेनोत्तरमाहव्यक्तामात्रेति।व्यक्त्यभेदरूपबाधकसत्वादितिशेषः।अनुगतधियोजातिकल्पिकायाअभावादितिभावः।न
नुव्यक्त्यभेदस्यजातिबाधकत्वमेवासिद्धंनिःसामान्यत्वेविशेषान्यत्वेचसतिसमवेतत्वस्यजातिलक्षणत्वादित्यतःसंमतिमाह
तथाचोक्तमिति।द्रव्यकिरणाल्याम्उदयनाचार्यैरितिशेषः।वस्तुत्वस्यैकधर्मस्यैवसामान्यतयासर्वसिद्धत्वादेकस्यत्वेनजा तिरेवा
भ्युपगमेयद्गतिभावः।व्यक्त्योरभेदएकव्यक्तिकत्वमाकाशत्वादेर्जातित्वेबाधकं।तुल्यत्वंतुल्यव्यक्तिवृत्तित्वंघटत्वकलशत्वा
दीनांजातित्वे।संकरश्चपरस्परात्यंताभावसमानाधिकरणयोर्धर्मयोरेकस्मिन्समावेशोभूतत्वमूर्तत्वादेर्जातित्वेबा...
धायमनःसिवर्त्तमानस्यमूर्तत्वस्यभूतत्वेविहायगगनेवर्त्तमानस्यभूतत्वस्यचपृथिव्यादिचतुष्टयेउभयस्यचसत्वात्...
नवस्थानुजातेर्जातिमत्वेस्वरूपहानिर्निःसामान्यत्वगर्भतल्लक्षणव्याघातस्तथाविशेषस्यजातिमत्वेअसंबंधःसमवायाभावः
समवायस्यजातिमत्वइति।तदुपेतयाचेति।संपेतयाचेत्यर्थः।सत्ताजातिश्चद्रव्यंसत्गुणःसन्नित्याद्यनुगतप्रतीत्यैवसिद्धेति
ताx४ नवजात्यादावतिप्रसिद्धापत्तिः।तत्रबाधकसत्वात्।यत्रध्वंसकारणतावच्छेदकतायायत्प्रतियोगितासंबंधेनध्वंसोत्पत्तिस्त
त्रतादात्म्यसंबंधेनसाम्राज्यतिसामानाधिकरण्यप्रत्यासत्त्याकार्यकारणभावान्नचप्रागभावध्वंसव्यभिचारःप्रागभावसत्ता
विरहादितिवाच्यंप्रागभाववृत्तिप्रतियोगिताभिन्नप्रतियोगितायाःकार्यतावच्छेदकसंबंधत्वादितिस्वातस्वेति।तादात्म्यादि

नेत्यर्थः। तत्र विशेषव्यावृत्तौ। न च तत्परमाणुत्वादेर्व्यावर्तकाभावे विशेष्यति किं विशेषेणेति चेन्न। स्वरूपावृत्तधर्मस्य व्यावर्त-
कत्वाभावात्। तत्र व्यावर्तकात् सापेक्षतायामनवस्थानात्। ननु विशेषेष्वेव प्रसंग इति चेन्न। तस्य धर्मिग्राहकमानेन स्वतो व्या-
वृत्ततयैव सिद्धेः। एवं च नित्यद्रव्येषु विशेषाः सिद्धास्तत्कुलास्तत्र विशेषवन्तः। आश्रयरूपेण विशेषेणैव तेषां व्यावृत्तत्वात्
आश्रयस्य च विशेषवत्तया व्यावृत्तत्वेन विशेषत्वसंभवादिति भावः। स्थिराका प्राच्याः प्राध्वंसानित्यतानाकाशस्थानहेतोः सं-
भवात् तत्र विशेषा इत्यप्याहुः। नवीनास्तु विशेषातिरिक्तमपि नाभाव यथैव विशेषाणां स्वव्यावृत्तिर्धर्मं विना व्यावृत्तत्वं तथा नि-
त्यानां द्रव्याणामपीत्याहुः। घटादीनां कपालादौ द्रव्येषु गुणकर्मणोः तेषु जातेश्च संबंध इति मत्तो कोलतृणगोरवैः समवाय-
स्यलक्षणमाह। नित्यसंबंधत्वमिति। संबंधश्चात्र संबंधिनिष्ठो ग्राह्यत्वेन नित्याभावादिस्वरूपसंबंधेनातिव्याप्तिः। ननु स-
मवायस्य संबंधसत्त्वे किं प्रमाणमित्याशंकायाम्। तत्प्रमाणं त्विति। गुणक्रियादीत्यादिना जातिपरिग्रहः। संयोगादीति। द्रव्ययोरे-
व संयोग इति नियमादिति भावः। अत्र समवायसंबंधेन पटत्वावच्छिन्नं प्रति तादात्म्यसंबंधेन तंतुत्वेन हेतुत्वात् कार्यतावच्छेदकं
संबंधविधया समवायसिद्धिरित्यपि द्रष्टव्यं। ननु तथापि समवायस्यैकत्वे किं मानमत आह। लाघवादिति। तथा च यथा दिग-
दि जनकत्वे पञ्चरोलाघवादेकत्वसिध्यति। तथा समवायोऽपीत्यर्थः। रूपवत्वाद्विति। रूपवज्ज्ञानलौकिकप्रत्यक्षोत्पत्तिः त-
त्र। वायौ। पृथिव्यां गंधद्रव्यादीति। इयं च द्रव्यत्वादि न प्रतियोगितावच्छेदकमननुगमात् किंतु घटस्पर्शवत्त्वप्रतियोगिकं भेदस-
हितमेवेति ध्येयं स्य समवायो न जलत्वादिप्रतीतेः समवायस्य नानात्वमिति तु नव्याः संबंधातरं अतिरिक्तपदार्थतयेति प्रा-

घः। सिद्धेदित्यस्य भूतलत्वादावित्यादि। यदि वैशिष्ट्यमतिरिक्तमुररीक्रियते तदा तन्नित्यमनित्यं चेति विकल्प्याद्ये दूषणमाह
तस्यैतीति। तत्र। घटवति भूतले। तस्येति अभावस्येत्यर्थः। अन्यथा अभावस्य नित्यत्वाभावे। तत्र निर्घटे ननु सिद्धेति नोचिमते
पाकेन नष्टे घटे रूपान्तरसमवायस्य सत्त्वात् श्यामरूपवत्ताधीप्रसंग इत्यत आह। समवायिविति। द्वितीये दूषणमाह वैशि
ष्ट्यस्येति। तत्तत्कालीनेति। तत्तदभावज्ञानकालीनेत्यर्थः। नव्यास्तु वैशिष्ट्यमपदार्थान्तरमेवेत्यस्तत्तद्घटाभाववदिति प्रत्यय
तत्स्वरूपसंबन्धमभ्युपगमे चाभावाधिकरणस्य स्वखडभेदत्तावन्मात्रविषयकज्ञानादिकमादाय विनिगमनाविरह इत्याहु
संसर्गात्यन्ताभावभेदत इति मूलादेकः संसर्गाख्योऽपरोऽन्योन्याभावाख्य इति प्रतीयते तथायुक्तं संसर्गस्याभावत्वानंगी
कारादित्यत आह। संसर्गाभावेति। तथा च द्वन्द्वात्परं श्रूयमाणस्याभावपदस्य प्रत्येकमभिसंबन्धात् संसर्गाभावोऽन्योन्याभा
वश्चेति मूलार्थ इति भावः। क्रमेणैतयोरभावयोर्लक्षणमाह। संसर्गाभावत्वमिति। अन्योन्याभावेतिव्याप्तिवारणायान्योन्या
भावभिन्नेति। घटादावतिव्याप्तिवारणायाभावपदं द्वयमग्रेऽपि। प्रागभावस्य लक्षणमाह। विनाश्यभावत्वमिति। अत्र ध्वंसेति व्या
प्तिवारणाय विनाशीति। ननु प्रागभावसत्त्वे किं मानमिति चेदत्रोत्पत्स्यते घट इत्युत्पादधिया तत्सिद्धिरिति प्राञ्चः। नवीनास्तु
जाते घट इत्यादिवत् कुत्सन्नो घटध्वंस इति प्रत्ययवत्त्वेन नाप्नोतीति रिच्यते न तु प्रागभावः। इदानीं घटप्रागभाव इति लोका
नां प्रत्ययाभावात्। न च तत्र घटोपधायकतत्कपालतत्संयोगादीनां तद्घटोत्पत्तिकालेऽपि सत्त्वात्तु नरापित घटोत्पत्त्यापत्तिः प्राग
भावांगीकारे च तदभावादेव न पुनस्तदुत्पत्तिरिति वाच्यं। जन्मद्रव्यत्वावच्छिन्नप्रतियोगिजनकतयाऽन्त्यस्य समवायसंबन्धाव
च्छिन्नप्रतियोगिताकद्रव्याभावस्यापि रहेणैव तदापत्त्यसंभवात् न च तत्र ध्वंसानंगीकारो तान्नेयत्वलाघवादेक एव प्रागभा

वोऽसेतुः कल्प्यत इति वाच्यं। प्रागभावकल्पनेऽपि तत्कालोत्पत्तिकानंतपदार्थप्रतियोगिकानामनंतानां प्रागभावानां विनिगमनाविरह
ण हेतुतायाः दुर्वारत्वात् तथा च प्रागभावतत्धर्मिकल्पनागौरवं परमतिरिच्यत इत्यपाकृतं। सहस्रतंतुकपटस्थले च कुतंतुना वा तत्त्रं
ध्यति॥ येन हेतुत्वकल्पनायां तत्तदैकप्रागभावस्य हेतुत्वाल्लघीयसी नवद्वित्रिचतुर्भिस्तंतुभिः सहस्रतंतुकपटोपपत्तिः कालिकसंबंधे
न तत्परत्वावच्छिन्नप्रतियोगिक समवायसंयोगव्यक्तेः कालिकसंबंधेन हेतुत्वादिति यदि तदा तत्कार्यानतिरिक्तः पदार्थस्तथापि तस्य
स प्रतियोगिकत्वे प्रमाणाभाव इति तत्त्वात् ध्वंसस्य लक्षणमाह जन्याभावत्वमिति। प्रागभावेतिव्याप्तिवारणाय जन्येति। अत्यंताभाव
स्य लक्षणमाह॥ नित्येति। ध्वंसादिवारणाय नित्यपदं। नन्वत्यंताभावस्य नित्यत्वे घटानयनानंतरमपि घटवति भूतले घटो नास्तीति
प्रतीत्यापत्तिरित्यत आह। यत्रेति। तथा च संबंधाभावादेव घटानयनानंतरं घटात्यंताभावबुद्धिर्नेति भावः। कालविशेषावच्छेदेन
संसर्गवतोऽत्यंताभावादेव घटो नास्तीति प्रतीतेरुपपत्तौ चतुर्थसंसर्गाभावे मानाभाव इत्यपरस्वरः केचिदित्यनेन सूचितः। ननु भावाद्य
र काले घटात्यंताभावबुद्धिः घटोत्पत्तेः प्राक्कपालेतु स्यादित्यपाकालचक्षुत्सादिना। ननु तर्हि रक्तरूपप्रागभावाधिकरणेऽप्य
म घटे श्यामरूपध्वंसाधिकरणे च रक्तो घटे कथं रक्तो नास्ति श्यामो नास्तीति प्रतीतिः ध्वंसप्रागभावयोरधिकरणेऽत्यंताभावस्यास
त्वादित्यत आह। श्यामघट इति। तन्नेति। ध्वंसप्रागभावयोर्विरोधः अत्यंताभावेन सहेति दोषः। तथा च नव्यमते सर्वं पदिच्छति
रक्तकायावच्छिन्नपत्तिर इति भावः। पुनर्नैवेतर। कथमन्यथा पूर्वमग्रे पिरक्तो मध्ये श्यामो घटे रक्तरूपमस्तीत्याकारकप्रत्ययस्तस्यस्थी
मान्याभावावगाहित्वात् न चेदं श्यामरूपयोरंतिमध्वंसाद्यवगाही। इत्थं चापररात्रिम ध्वंसप्रागभावव्यतिरिक्तोऽपि तादृशाकारप्रत्ययप्र
संगादिति। नन्वभावस्य द्विविधत्वादिति विभागोनुपपन्नो भावे एवमानाभावादित्यभिप्रायेण प्रभाकरः शंकते नन्विति। अभावस्य

धिकरणात्मकत्वे गौरवं प्रदर्शयितुमाह। अतिरिक्तेति। अभावातिरिक्तेत्यर्थः। अभावस्याधिकरणात्मकत्वे ऽभेदे आधाराधेयभावा
नुपपत्तिरूपो यो दोषः सो ऽप्यसमन्वृतेनेत्याह। एवं चेति। अधिकरणीये तयातिरिक्तत्वे चेत्यर्थः। नन्वभावाधिकरणकाभावस्याधि
१२ करणात्मकत्वे यथाधाराधेयभावोपपत्तिस्तथा सर्वत्राप्यस्त्वित्यतो दूषणांतरमाह। एवं चेति। अन्यथा। अभावस्याधिकरणात्मक
त्वे। एतेन वक्ष्यमाणदूषणेन परस्परधर्मतापन्नानां सप्तपदार्थानामेव पदस्य विवेकं ज्ञापयितुमाह। इदानीमिति। एवमभिधेय
मभिधाविषयत्वं अभिधा च संकेतज्ञानो ऽधिकः पदार्थ इति मीमांसकाः। संकेतभिन्नायां अभिधायां मानाभावात्संकेत एवा
13 भिधेति नैयायिकाः। प्रमेयत्वादिकमित्यादिना त्तित्त्वपरिग्रहः। तच्च कालसंबंधित्वं। ननु प्रत्येकं घटादावनेकत्वाभावात् कथम्
स्थिरत आह। तथा चेति। अनेकमात्रवृत्तयो ये पदार्थविभाजकोपाधयो ऽभावत्वादयस्तद्वत्त्वमित्यर्थः। अत्र च समवायेति व्याप्तिवि
रणायानेकेति। पदार्थवृत्तिधर्मघटितं द्रव्यगुणौ च सामान्याद्यन्यतमत्वमादाय भावेगतमतः पदार्थविभाजकेति। उपाधिमत्ता च सम
वायस्वरूपसंबंधान्यतरसंबंधेन। तेन कालिकसंबंधेन ध्वंसस्य तादृशोपाधिमत्त्वे ऽपि न क्षतिः। समवायेनोपाधिमत्त्वविवक्षणे तु सा
मान्यस्यैवोपाधिः स्यादतः स्वरूपसंबंधो ऽपि विवक्षितः। सो ऽपि कापालिकसंबंधभिन्नो ग्राह्यस्तेन न ध्वंसे ऽतिव्याप्तिः। द्रव्यगुणकर्मणा
मिति। निर्गुणक्रियत्वश्रुतिमूलं तदर्थश्च गुणक्रियात्यन्ताभाववत्त्वं। तेन गुणक्रियान्योन्याभावमादाय द्रव्ये नातिव्याप्तिः। यद्यपि गुणेति
न च गुणागुणिनोर्विभक्तिग्रामो विषाणवत्समानकालीनत्वात्कार्यगुणस्यान्यत्वमिति वा। द्रव्ये निर्गुणोत्पत्तिस्वीकारेणातत्संभवात्।
नन्वेवं घटादेराद्यक्षणावच्छिन्नस्य चाद्रूपत्वानस्यादिति वाच्यं। इष्टापत्तेः। क्रियातयापीति। गुणवत्ता च समवायेन तेन कालिके राम
न गुणवद्गुणादेर्निर्गुणत्वादेरसंग्रहे ऽपि न क्षतिः। पदार्थविभाजकपदस्य कृत्यमाह। तथा चेति। कर्मवदत्यापाकाप्रात्वस्यापि पाकोपाधेः १३

त्याकाशेति व्याप्तिवारणाय तत्त्वदइतिभावः। जात्यादीनामपि एकार्थसमवायसंबन्धेन सामान्यवत्त्वात्सामान्यप्रविहीना इति मूलम
युक्तमतो व्याचष्टे। सामान्यानधिकरणत्वमिति तथा च सामान्यनिरूपिताधिकरणतानसामान्यादौ। एकार्थसमवायस्याधिक
रणतानियामकत्वाभावादिति भावः। अप्रसिद्धत्वात्पारिमाण्डिल्य पदार्थनिर्वचनं। पारिमाण्डिल्यमिति। तद्भिन्नानां। परिमाण्डिल्यभि
न्नानां पारिमाण्डिल्यस्य करणत्वे बाधकमाह। तदीति। अणुपरिमाणं हीत्यर्थः। तत्रेति। चरत्त्वर्थे। तत्र हेतुमाह। परिमाणस्येति। अ
[illegible] णुजन्यस्येति। उत्कृष्ट[illegible] णोरणुतरमेवेति भावः। ननु तर्हि द्व्यणुकादिपरिमाणस्य किं जनकमिति चेत्संख्यैवेत्यव
हेयमग्रे भविष्यतीति चेदनुपरिष्टात्। मूलस्यानन्ततापरिहरति। एवमितीति। इन्द्रिययोर्महत्त्वसामान्ययोः स्वविषयकलौकिकप्रत्यक्ष
हेतुत्वात्परमत्वातीन्द्रियत्वे इत्त्विशेषणे। ननु योगिप्रत्यक्षे पारिमाण्डिल्यस्यापि विषयविधया कारणत्वात्पारिमाण्डिल्यभिन्नानां
मित्याद्ययुक्तमत आह। इदमपीति। यद्यपि योगजधर्मेणातीतविषयकं प्रत्यक्षं तथा विद्यमानविषयकमपीति भावः। ननु ज्ञायमानसा
मान्यस्य प्रत्यासत्तित्वेन ज्ञायमानहेतोस्त्वनुमितिकरणत्वेन पारिमाण्डिल्यस्य सामान्यलक्षणाजन्यप्रत्यक्षेऽनुमितौ च कारणत्वात्पा
रिमाण्डिल्यभिन्नानामिति मूलमसंगतमत आह। ज्ञायमानेति। तस्यापि। आत्ममहत्त्वस्यापि अन्ये महतीति प्रत्ययाभावादिति भा
वः। आचार्याणामुदयनाचार्याणां मतेनादिति। ज्ञानादिकं प्रति सामान्यस्य हेतुत्वे त्वयेवेत्याशंक्य कारणत्वं च जात्यधर्मेतरका
र्यावच्छेदकतया। अन्यथा पारिमाण्डिल्यादिव्यवच्छेदस्य ग्रहणं चानोपपद्यत इत्याचार्यैरेकैकत्र तस्य सामर्थ्यं ज्ञानादधर्मी। ज्ञानादयः।
नादितरत्कार्यं प्रागभावावच्छिन्नसमवायोगितदपेक्षया। अन्यथा कारणत्वमात्रविवक्षणे पारिमाण्डिल्यादिव्यवच्छेदः अतः

मु०
२४
णसंविता नवकुवी दिनणपारिमांडिल्यादिपदबोध्यायेत्यावयविरूपरसाद्यस्तेषांच्यवच्छेदः कारणावसिद्धिवः त्र्याणामि
त्यनुहृत्तः अरूपस्यैवेतत्साधर्म्यमित्यपि नोपपद्यते सामान्यादेरपि ज्ञानकारणत्वादिति । कार्यपदेऽर्थी त्र्याचात्यावयविरू
पादीनांत्वच्चंसप्रतिज्ञानकत्वेपिनक्षतिः । कथितनवकुवी मुपादानेन त्र्ययोगिप्रत्यक्षस्यविषयाजन्यतयापारिमांडित्यस्य
ज्ञातस्यधर्मिजनकत्वाभावेपिनक्षतिः एवंचपरिमांडिल्यादेः ज्ञानाद्यतिरिक्तप्रत्येककारणतानिषिद्धेत्याशयेनेत्याखादित्य
र्थः । मत्तेन्यथासिद्धीति । दंडत्वादेर्नियतायाः पूर्ववर्त्तितायाः सत्वादतिव्याप्तिरतउक्तमन्यथासिद्धस्यन्यस्येति । तद्घटत्वा
वच्छिन्नेन्यत्र त्वो घनियतेत्याद्यन्यथासिद्धिमत्यपि घटत्वावच्छिन्नेऽनन्यथासिद्धत्वज्ञासंभवेतिव्याप्तिवारणायनियतेति । निय
तपूर्ववर्त्तिजातीयमित्यर्थः । तेनारण्यस्थदंडादावपि स्वरूपयोग्यतासंपत्तिः । तज्जातीयत्वं च नियतपूर्ववर्त्तितावच्छेदकादंडत्वा
दिमत्वमेवेति । क्रियंतितानिवारणानीत्याकांक्षायामाहात्तस्येति ॥ यत्समवेतमिति । यदवच्छिन्नंस्वचारणतावच्छेदकयद्धर्मा
वच्छिन्नेसमवायसंबंधेनोत्पद्यते तद्धर्मावच्छिन्नस्यतद्धर्मावच्छिन्नमित्यर्थः । घटत्वाद्यवच्छिन्नं प्रतिस्वकारणतावच्छेदकरूपा
त्वत्वाद्यवच्छिन्नेसमवायसंबंधेनोत्पद्यते इतिभवतिघटत्वाद्यवच्छिन्नं प्रतिकपालत्वाद्यवच्छिन्नं समवायिकारणं । स्वका
रणतावच्छेदकेतुत्वंचाचनद्रव्यत्वादेघटादिसमवायिकारणतावच्छेदकत्वमिति । तत्रासन्नमिति । द्रव्यंचसमवायिकार
णादावतिव्याप्तिवारणायसमवायिकारणंतंतुसमवेतंतंतुत्वादावतिव्याप्तिवारणाय ज्ञानकमितितंतुत्वेचान्यथासिद्धिस र
त्वेनानन्यथासिद्धनियतपूर्ववर्त्तितायाअभावेननातिप्रसंगः मुक्तावत्पामत्रयस्यपीतितुरीतंतुसंयोगस्यघटंप्रतिकुतानास २४

मवायिकारणत्वमितितुन प्राक्तनीयतुरीतंतुसंयोगनाशे पटनाशापत्तेरसमवायिकारणनाशस्य कार्यनाशजनकत्वात्। नवासमवा
यिकारणनाशस्य कार्यनाशकत्वे प्रमाणाभाव इतिवाच्यं। द्व्यणुकनाशान्यथानुपपत्तेरेवमानत्वादिति न च तंतुषु नष्टेष्वपि नैव स
मवायिकारणत्वाद्यं द्व्यणुकस्यास्थितिः स्यादितिवाच्यं इष्टापत्तेः कारणांतरकल्पने गौरवात् न च कार्यासमवायिनोर्नाशयोः समाना
धिकरणयोः कार्यसत्त्वे इतिवाच्यं प्रतियोगितया द्व्यणुकनाशत्वावच्छिन्नं प्रति स्वप्रतियोगिसमानाधिकरणकालिकविशेषणतोभ
यसंबंधेन नाशत्वेन हेतुताया विवक्षितत्वात् इदं कालिकसंबंधस्य कारणतावच्छेदकसंबंधत्वे तृतीयक्षणे घटादेर्नाशापत्तिरिति
स्वप्रतियोगिसमवायिसमवेतत्वनिवेशः स्वप्रतियोगिजन्यत्वसंबंधेन दंडनाशात् घटनाशापत्तेरुत्पत्तेरिति ततः भाविनाशाभावादयाति
प्रसंगवारणाय कालिकसंबंधप्रवेशः। वस्तुतः प्राक्तनतुरीतंतुसंयोगस्य पटं प्रति कारणत्वमेव न किंतु पटसंयोगसंबंधेन तंतुनिष्ठासत
पटजनिकेति न तत्रातिप्रसंगशंकापि। एवं च विशेषणत्वतया तुरीतंतुसंयोगादिभेदानामप्रवेशान्न लाघवमपि। न चैवं तंतुसंयो
गापि पटं प्रति कारणं न भवेदितिवाच्यं सकलप्रामाणिकसिद्धस्य समवायघटितसामानाधिकरण्यप्रत्यासत्त्याजनकत्वरूपस्या
समवायिकारणत्वस्य भंगप्रसंगात् वेगादीनामित्यादिनास्पर्शपरिग्रहः। अभिघातादीति। अभिघातश्च स्पर्शवद्वेगवत्संयोगः
मनःसंयोगाकाशसंयोगयोरतिव्याप्तेरिह स्पर्शवेगपदे घटनिष्ठः परमाणुसंयोगोल्पत्वम् न च ततोपि क्रियोत्पत्तिः स्यादिति
वाच्यं विजातीयाभिघातस्य क्रियाजनकत्वात्। आदिना नोदनापरिग्रहः नोदनाच स्पर्शवत्संयोगः। तंतुसमवेतत्वे सति तुरीतंतु
संयोगान्यत्वे सति पटकारणत्वादिकं पटासमवायिकारणत्व इति विशेष्ये लक्षणं वक्तव्यमित्याह। तथापीति। तथाचेति।

मु॰टी॰ १५

विधप्रत्यासत्तिविवक्षणे चेत्यर्थः। फलितार्थमिति। द्विविधप्रत्यासत्त्योरिति शेषः। पर्यवसितमसमवायिकारणलक्षणमाह। अ
त्यं चेति कार्यैकार्थप्रत्यासत्तिः समवायसंबंधः कारणैकार्थप्रत्यासत्तिः समवायिसमवेतत्वसंबंधः। तथा च समवायस्वसमवा
यिसमवेतत्वान्यतरसंबंधेन कारणत्वे सत्यात्मविशेषगुणान्यत्वं सामान्यतः समवायिकारणत्वमित्यर्थः। अत्र परासमवा
यिकारणस्य तंतुसंयोगस्य पटरूपासमवायिकारणस्यापि तंतुरूपस्य च संग्रहाय समवायस्वसमवायिसमवेतत्वयोः प्रवे
शः। आत्मविशेषगुणान्वारयितुं विशेष्यभागः। ननु सामान्यतो समवायिकारणत्वं दंडादावतिव्याप्तं तत्र कपालादिसामाना
धिकरणसत्त्वादन्यथा दंडादेः कारणनैव न स्यात्। समवायसामानाधिकरण्यरूपकारणतावच्छेदकसंबंधभेदादननुगमो
पि। अथ कार्येनाप्यजनकनाशाप्रतियोगित्वं विवक्षितमिति चेन्न द्वित्वनाशाप्रयोजकनाशाप्रतियोगिन्यापेक्षाबुद्धावतिव्या
प्तेरिति चेन्न। अवयवमात्रसंयोगत्वं द्व्यासमवायिकारणत्वमित्यादि विशिष्यैव लक्षणस्य निर्वाच्यत्वात् अखंडोपाधिरेव तदि
त्यप्येभिन्नं कारणमिति। अत्रेदं बोध्यं समवायिकारणत्वासमवायिकारणत्वाभावकारणतावत्त्वमेव निमित्तकारणं तेनेश्वर
मेश्वरघटसंयोगसमवायिकारणत्वेपि न निमित्तकारणत्वक्षतिरिति। यत्कार्यप्रतीतीति यद्धर्मावच्छिन्नप्रतीत्यर्थः तद्रूपमिति ते
नेतिशेषः किंतु कारणमिति कारणत्वं चात्र पृथगन्वयव्यतिरेकशालित्वं तेन नात्माश्रयः। गृहीत्वेवेति ज्ञात्वैवेत्यर्थः। अंक
ते। पूर्वसंबंधत्वेनेति। अन्यथा प्रतीत्यापादितरतीयान्यथासिद्धभावादिति भावः। पंचमीतीति। अवश्यक्लृप्तनियतपूर्ववर्तिन इ राम
त्यादिकोऽर्थः। कवत्त्वादिकमिति। विनिगमकाभावेन वस्तूनां वर्णानां कारणतावच्छेदकत्वे गौरवादाह विशेषपदार्थो वेति इदं २१

दत॰

चक्षुर्वा मतेनोक्तं विशेषणानंगीकर्तॄणां नव्यानां मते तु गगननिष्ठतद्व्यक्तित्वं कारणतावच्छेदकं तद्भिन्नातिरिक्तः पदार्थः। अत एव गगनैक
त्वपरिमाणाभ्यां विनिगमनाविरहोऽपि प्रत्युक्त इति ध्येयं अवश्यक्लृप्तेति। ननु गंधप्रत्यवश्यक्लृप्तत्वेन रूपप्रागभावेनेव गंधप्रागभाव
स्यान्यथासिद्धिः स्यात् यत्कारणत्वमवश्यक्लृप्तत्वमित्युक्तौ चात्माश्रय इति चेत्। अत्राहुः। लघुनियतपूर्ववर्तित्वरूपमवश्यक्लृप्
तत्वमिह बोध्यं लघुत्वं च शरीरकृतमुपस्थितिकृतं संबंधकृतं च। तत्र प्रथममनेकद्रव्यसमवेतत्वापेक्षया महत्वे। द्वितीयं गं
धं प्रति रूपप्रागभावापेक्षया गंधप्रागभावे गंधात्मकप्रतियोगिज्ञानसत्वेन शीघ्रं तदुपस्थितौ। तृतीयं दंडरूपापेक्षया दंडे
स्वाश्रयदंडसंयोगादिघटितपरंपरापेक्षया युक्तत्वादिति। अवश्यक्लृप्तेत्यस्य फलमाह। अत एवेति। अन्येषां दंडरूपाकाशकु
लालपितॄणां। अनेन पञ्चमान्यथासिद्धेन। चरितार्थत्वं। नव्यास्तु कारणत्वस्यानन्यथासिद्धनियतपूर्ववर्त्तितावच्छेदकधर्म
त्वे प्रतिबंधकाभावस्य तत्र घटत्वेन हेतुतापत्तिः। यत्र न कारणत्वव्यवहारस्तत्र व्यक्तिभेदकृतं वत्वं तु सर्वत्रैव ज्ञेयं। तत्र व्य
क्तिभेदकृतं वत्वं संबंधेन कार्यविशिष्टो यो धर्मस्तत्वं तदितरव्यापि न्युक्तं तस्य संबंधत्वसंदेहात् तस्मात्कारणत्वपदार्थातिरिक्तमेवेत्याहुः।
ये तु कार्यान्वयव्यतिरेकौ कालस्यैव कालान्वयव्यतिरेकशालित्वं कारणत्वमित्याहुस्तदयुक्तं। आत्मादेः सुखादिकारणे प्रागभावे
रूपव्यतिरेकासंभवेनाव्याप्तेः। अस्त्वेव गुणकर्ममात्रवृत्तिसमवायिकारणत्वमिति सूत्रं तस्यायुक्त आत्मविशेषगुणस्याव्याप्तेरतो वै
धर्म्यपरतया सूत्रं व्याचष्टे समवायिकारणत्वमिति। साधर्म्यप्रकरणे वैधर्म्यकथनमयुक्तमिति मत्वाह। अथवेति। सत्ताभिन्न
द्रव्यत्वरूपजातिमति द्रव्यमित्यतिव्याप्तिवारणाय उक्तं। तत्रैव सत्ताजातिमादायातिव्याप्तिवारणाय सत्ताभिन्नेति। तत्रैव द्रव्यगुणान्

उ॰ टी॰ स्मतरत्वरूपधर्ममादायातिव्याप्तिवारणाय जातीति। इत्थं त्वजातिमत्त्वं च समवायेन विवक्षितं। तेन गुणादौ द्रव्यत्वस्य कालिके
१६ न वृत्तित्वाद्द्रव्यस्य च कालिके न गुणत्वादिमत्त्वान्नाद्दूषणं द्रव्यत्वजातिपतिद्रव्येति व्याप्तिः। ननु गगनादिवांसर्वदेवास्तीत्यादिव्य
वहारान्नित्यद्रव्येष्वपि कालिकसंबंधादिकृतस्याश्रितत्वस्य सत्वादव्याप्तिर्नित्यद्रव्येष्व इति मूलमयुक्तमत आह। आश्रि
तत्वत्विति। विशेषणतया। कालिकविशेषणतया। नित्यादीनां न वा नास्तीति मूलस्य तु प्राचीनस्वरचितमर्थं प्रकटयति। अ
दानीमिति। ननु धात्वर्थः क्रियातत्त्वं चातिप्रसंग इत्यत आह। कर्मत्वमिति। वेगवत्त्वं वेगसंबंधित्वं केनचिद्गुणविशेषेण वेगेन
चलतीत्यादिप्रामाणिकप्रतीतिसिद्धः एतेन वेगस्य निरंतरगतिसंतानस्य क्रियावत्त्वेनाप्रामाणिकत्वात्पुनरुक्तत्वमिति निरस्तं। अ
नेनानुभयमेपुक्रियायाः स्वजन्योत्तरसंयोगाद्विनाशादुत्तरक्रियायाः वेगं विनानुपपन्नेर्वेगसिद्धिः। न च चरमसंयोग एव नाश
क इति वाच्यं चरमवृक्षे विभागोत्तरवादिन्याद्युः। दिक्कृतयोः परत्वापरत्वयोर्हेतुरिदमस्मात्संनिकृष्टमित्यपेक्षाबुद्धिः कालकृतयोः
परत्वापरत्वयोर्हेतुरयमस्मादल्पतरकालसंबद्ध इत्यपेक्षाबुद्धिस्तस्य च घटादौ नोत्पन्नात्तत्रातिव्याप्तिं निरस्यति। न चेत्यादिना आत्म
त्वव्यातिव्याप्तिवारणाय समानाधिकरणेति। तत्रैव सत्तामादायातिव्याप्तिवारणाय द्रव्यत्वव्याप्येति द्रव्यत्वव्याप्तिश्चेह द्रव्य
त्वाभाववदवृत्तित्वं ननु व्यापकसमानाधिकरणं गौरवं तत्र द्रव्यत्वादिनापि जातिर्विशेषणीया तेन न द्रव्यत्वव्याप्यद्रव्यत्व
मादायातिव्याप्तिः। अपकृष्टेति। अविभुमूर्त्तपरिमाणत्वमित्यर्थः। अत्र केचित्। क्रियाप्रतिमूर्त्तस्य हेतुत्वात्कारणतावच्छेद रा॰
कतया मूर्त्तत्वं जातिः। यदि च गंधसमानाधिकरणतावच्छेदकतया तत्सिद्धा संकरात्पृथ्वीत्वादिनं जातिरिति विभाव्यते तदा १

कृते। पिदीयतां दृष्टिः। नच भूतत्वस्यापि वार्यतावच्छेदकत्वसंभवादिति विनिगमनाविरहः। कर्मत्वसजातित्वेन लघुत्वात्त्र
त्याकुः। तथेति। मूर्त्तत्वे चेत्यर्थः। नन्त्वत्वेथ। पूर्ववदिति। परत्वापरत्वसमानाधिकरणोत्पादिकाधितविवक्षितार्थत्वादित्यर्थः। का
लादौ सर्वगतत्वाभावेनासंभवमाशंक्याह। सर्वेति। मूर्त्तेति। महदिति। भावप्रधाननिर्देशः। तथा च महत्परिमाणमित्यर्थः।
अस्महानितिप्रतीतिविषयपरममहत्त्वत्वस्य गगनपरिमाणादिसाधारणस्य जातित्वसंभवेप्यात्मपरिमाणमयोग्यमिति
टीकाकृन्मतमनुसृत्यास्मुक्ताचत्याम्यकर्येति। बहिरिंद्रियेति॥ आत्मन्यतिव्याप्तिवारणाय बहिः पदं। बहिरिंद्रियग्रा
ज्ञातीयसंयोगादिमति कालादावतिव्याप्तिवारणाय विप्रोषेति। द्रव्यत्वमादाय तिव्याप्तिवारणाय गुणेति। किं तन्निवे
शस्य फलमाह। तेनेति। ज्ञातो घट इति ज्ञाने चक्षवीरिंमतज्ज्ञानाचेचलो किकी विषयताचक्षुराद्यग्राह्यत्वादिति भावः। स्वस
पयोगपताश्रवेप्रायस्य फलमाह। नचेति। ननु परमाणावादेर्योगपलेकुतोनतस्यप्रत्यक्षमत आह। महत्त्वेति। लाघवादाह। अथ
वेति। स्पर्शवत्वं। स्पर्शनिरूपितसमवायः। द्रव्यारंभकत्वमिति॥ द्रव्यसमवायिकारणतावच्छेदकधर्मवत्वमित्यर्थः। सच ध
र्मः स्पर्शवत्पमेवत्ववा। तेनना हृष्टादौ कार्यमात्रजनकेतिप्रसंगः। न चैवमंत्यावयविनोपि द्रव्यस्पादितिवाच्यं विलक्षणसं
संयोगस्पासमवायिकारणस्याभावात्। कारणतावच्छेदकं त्वाव यविभेदस्यानि वेशाद्या। क्षणिकस्य विशेषगुणस्यानभ्यु
पगमादाह। क्षणिकत्वेति। घटादिमात्र वृत्तयेत्तृतीयक्षणवृत्तीति॥ स्वोत्तरवर्त्तीति। स्वपदेनाप्युपलाभिमतपरोतदुत्तरवर्त्ती
तद्वितीयक्षणवृत्तीयो विशेषगुणस्तन्नाश्यत्वादित्यर्थः। अत्रान्वयत्वप्रतियोगितासंबंधेन योग्यविभुविशेषगुणानां

मु.टी. स्तत्र स्वसामानाधिकरण्य स्वाव्यवहित तदुत्तरवर्त्तित्वोभयसंबंधेन योग्यविभुविशेषगुणइति स्वसामानाधिकरण्येन नीपा
१७ कत्वं बोध्यं। कार्यतावच्छेदके योग्यत्वानुपादाने प्रायश्चित्तादिजन्यादृष्टनाशे व्यभिचारः योग्यत्वं च विषयतया लौकिकसा
क्षात्कारवत्त्वजन्यत्वातीन्द्रियजातिशून्यत्वं च। अदृष्टत्वस्य जातित्वे मानाभावेन तथाप्यदृष्टे व्यभिचारात् कारणतावच्छेद
कं योग्यविशेषत्वयोरुपादानात् द्वितीयक्षणोत्पन्नादृष्टसंयोगादिना तृतीयक्षणे पेक्षाबुद्धिनाशः। सामानाधिकरण्यसं
बंधनिवेशात् आत्मप्रदेशानां मध्यकत्वानां इच्छादिना नाशः। स्वाव्यवहितोत्तरवर्त्तित्वसंबंधनिवेशाच्च ज्ञानादीनां युगपदुत्पत्तिकाले
न इच्छादिना नाशः। किंचिज्जातित्वस्य तत्र च व्यक्तिपर्यवसायितया तत्रगुणस्य तत्र गुणो नाशकः अपेक्षाबुद्धेस्तु द्वित्वप्रत्यक्ष
मिति नाशकः। एतत्क्षणोत्पन्नयोग्यविभुविशेषगुणत्वेन नाशकता एतत्क्षणोत्तरक्षणवृत्तित्वविशिष्टयोग्यविभुविशेषगुणत्वे
न नाश्यता। अपेक्षाबुद्धिनाशे द्वित्वप्रत्यक्षं विशेषसामग्री चरमज्ञानादिकं तु तत्तरक्षणवृत्तित्वविशिष्टत्वमेव स्वरूपतः कं
एतत्क्षणोत्पन्नस्य कालविशेषस्य साधारणं चेदमित्याहुः। शब्दस्याप्यव्यवहितलौकिकवत्पदपदार्थज्ञानादीनाम् इत्युपपा
दयंतीत्येवमिति। लौकिकपदस्य वैयर्थ्यात्क्षणद्वयाभिप्रायेणार्थिमाह। क्षणद्वयेति। चतुःक्षणस्थायीति। चतुःक्षणस्थायीति
मानिकस्यापि घटादीनां तदुत्तरजातित्वं ज्ञानत्वादिसत्त्वात्तविशेषगुणेज्ञानादौ सत्तिवृत्तित्वस्येत्यर्थः। अत्र वा वृत्तित्वसम
वायेन विवक्षितं तेन जन्यमात्रवृत्तिलौकिके न ज्ञानत्वस्य वृत्तित्वेपि न क्षतिः। ब्रह्मतं च ज्ञानत्वादेर्जन्यवृत्ति त्वादेस्सम्भवचारणा राम
य ज्ञानस्यावांतरजातिस्वीकारेतु जन्यपदं न देयं। घटकीभूतविशिष्टाभावे स्वत्वकत्वे पि उभयाव्याप्यस्यापरावारकत्वेन नातिप्र १७

योजनत्वात्॥ तदर्थत्वादिति। तल्लौकिकविशेषगुणवत्त्वार्थत्वादित्यर्थः। ननु ज्ञानमात्रस्य लक्षणद्वयस्यापि त्वेयस्य पुरुषस्यापेक्षाबुद्धि
द्वितीयक्षणे द्वित्वोत्पत्तिसमकालं द्वित्वसामान्यज्ञानं जातं तस्माद् द्वित्वोत्पत्त्यनंतरं चतुर्थक्षणे द्वेद्रव्ये इति द्वित्वविशिष्टवित्ववैशि
ष्ट्यविषयकलौकिकप्रत्यक्षमनुपपन्नं तृतीयक्षणोत्पन्नापेक्षाबुद्धिनाशाच्चतुर्थक्षणे द्वित्वस्य नाशात् लौकिकप्रत्यक्षविषयत्वाद्वि
षयस्य पक्षेतुत्वात् अतआह। अपेक्षाबुद्धिरिति। चतुर्लक्षणवृत्तिजन्यावृत्तीत्यस्य फलमाह। रूपत्वादिकं चेति। तद्व्युदासः रूप
त्वजातिव्युदासः। तथा च रूपत्वजातिमद्विशेषगुणवति घटादौ यातिव्याप्तिः सा निरस्तेति भावः। जन्येत्यस्य फलमाह। ईश्वरेति
। ननु जन्यत्वाप्रवेशे ज्ञानत्वेच्छात्वयत्नत्वजातीनां चतुःक्षणवृत्तिजात्यंतर्गतत्वाभावात्कथं तद्वारणसमन्वय इत्यत आह। देष
त्वादिकमिति। आदिना शब्दत्वपरिग्रहः। विशेषपदस्य कृत्यमाह। परममहत्त्वस्येति। ननु अल्पपदादाने परममहत्त्वस्य चतुःक्ष
णवृत्तित्वात्परममहत्त्वमादायाकाशादावतिव्याप्तिरत आह द्वित्वेति। तथात्वादिति। तादृशजातिमद्गुणत्वादित्यर्थः। प्रत्यक्षोप
स्थितत्वरूपलाघवमभिसंधायाह। त्रसरेण्विति। प्रत्यक्षविषयत्वमिति। चक्षुर्जन्यज्ञानविषयत्वमित्यर्थः। तेन आत्मादेर्मानसप्रत्यक्ष
विषयत्वेपि नातिव्याप्तिः। चक्षुरादीनामित्यादिना घ्राणादिपरिग्रहः। तत्रापि। चक्षुरादिष्वपि। द्रव्यत्वेऽक्षत्ववद्वृत्तित्वमुपपाद
यति। घटजलेति। ननु योगिप्रत्यक्षविषयत्वमस्त्येवेत्याशंकामाह। अतिव्याप्तिश्चेति घटो वायुमानितिबाह्येंद्रियोपनीतभाना
त्वात् घटविशेष्यकचाक्षुषविषयवायुवृत्तिद्रवत्वव्याप्यवायुत्वजातिमति वायावतिव्याप्तिवारणाय लौकिकेति। गुरुत्ववत्त्व
मिति। गुरुत्वं रक्तिकामाषकतोलत्वादि। इदमुपलक्षणं। पतनवत्त्वमपि बोध्यं। पतनत्वं गुरुत्वासमवायिकारणककर्मत्वं। उल्का।

३·टी·
१८

पततीत्याद्यप्रयोगस्तत्ता दात्रिकः। वस्तुतस्तु गुरुत्वासमवायिकारणकर्महृत्तिपतनत्वं जातिविशेषो रसवत्त्वमिति। रसो मधुरा
दिः। विशेषगुणवत्त्वमिति। विशेषगुणा रूपरसगंधस्पर्शस्नेहसांसिद्धिकद्रवत्वानि बुद्ध्यादयो भावनांताः शब्दश्चैतद्वत्त्वमित्यर्थः
ननु समानानां धर्माणां ज्ञेयत्वं तत्कस्य वैधर्म्यं इत्याशंकायामाह ज्ञेयत्वादिकमिति। वायोर्नवैकादश तेजसो गुणा जलक्षितिप्राणभु
तां चतुर्दश। दिक्कालयोः पंच षडेव चांबरे महेश्वरेऽष्टौ मनसस्तथैव च। इति प्राचीनश्लोकक्रममनुसृत्य पद्यमत्वसिद्धये वा सोऽत्ताव
द्गुणानाह। स्पर्शादयोऽष्टाविति। स्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वान्यष्टौ वेगाख्यसंस्कारश्चेति
वायोर्गुणा इत्यर्थः। तेजसो गुणानाह। स्पर्शाद्यष्टाविति। अपां गुणानाह। स्पर्शादयोऽष्टाविति। पृथिव्या गुणानाह। स्नेहहीनाः
निस्ते। अव्यवहितपूर्वोक्ताः तत्र रूपरसगंधस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वद्रवत्वेषु प्रत्यक्षमेव प्रमा
णं गुरुत्वे त्वनुमानं। तथाहि। आद्यः संयोगपतनिका क्रिया सासमवायिकारणिका क्रियात्वादिति। न च रसेनार्थांतरं रसोत्कर्षेण
पतनोत्कर्षाभावात्। एवं संस्कारेनोदनाभिघातजन्यादितीयकर्मसासमवायिकारणकं कर्मत्वादाद्यकर्मवदिति। न च कर्मणांत
तरं कर्म चेति कर्मानुत्पत्तेः। आत्मनो गुणानाह। बुद्ध्यादिषट्कमिति बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नषट्कं। संख्यादिपंचकमुपदर्शि
तमेव बोध्यं। कालदिशोर्गुणानेकमनयेकदेवाह। संख्यादिपंचकमिति॥ आकाशस्य गुणानाह॥ शब्दश्चेति। चत्वारीतथाथाका
शे प्राहुः। संख्यादयः पंचैव षड्गुणा इत्यर्थः। ईश्वरस्य गुणानाह। संख्यादय इति। बुद्ध्यादिनाष्टकं। ईश्वरस्य परिमाणवृत्ते राम
मानाभावान्न च द्रव्यत्वे न तदनुमानमिति वाच्यं। अप्रयोजकत्वादीश्वरे द्रव्यत्वसत्त्वे मानाभावाच्च। अत एव संयोगविभागयो १८

रपिमानाभावः एतस्य स्यचगुणत्वमेवनिरस्तमितिसंख्यावुद्धीछायत्नसुखानीतिपंचैवेश्वरस्यगुणा इति। नवुद्धिश्वरेसुखस
त्वेकिमानमितिचेन्न। आनंदब्रह्मेतिश्रुत्यातस्यैश्वरबोधनात् नचैवंराजपुत्रकषष्ठ्यादौराजप्रकारेणराजकीयपुत्रकषष्ठ्यापत्ति
वारणामनामार्थयोर्भेदेनसामानाधिकरण्यस्याभ्युत्पन्नत्वेनब्रह्मणआनंदाभेदएवतात्पर्यमित्याश्रुतिपाठःतदृतिवाच्यं। ज्ञानत्वसुख
त्वाभ्यांसांकर्यात्। ज्ञानसुखात्मकव्यक्तेरस्वीकारात् ब्रह्मणिसुखाभेदस्यबाधादानंदपदस्यानंदपदस्यानंदरतिलक्षणानत्वा
नंदकेजनकत्वस्यमुख्यत्वादित्याकूतं॥ इतिश्रीभारद्वाजभट्टवालकृष्णात्मजमहादेवभट्टकृतौमुक्तावलीप्रकाशस्यप्रथमःप
रिच्छेदः॥ गंधस्तुत्वकालादेगतमतोव्याचष्टेगंधेतिगंधवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वमर्थस्तेनसुरभ्यसुरभिकपालार
ब्धघटेगंधिस्यनाव्याप्तिः। हृत्पलेनजलादावतिव्याप्तिः द्रव्यत्वव्याप्येत्यनेननतत्रैवसत्तामादायसा। नवाजातिपदोपादा
नाज्जलपृथिव्यन्यतरत्वमादाय। गंधवत्वं इतिस्वत्वसमवायेन। तेनकालिकसंबंधेनगंधवतिपृथिवीनिरूपितकालिक
संबंधावच्छिन्नवृत्तित्ववज्जलत्वादिमतिजलादेरतिव्याप्तिः। द्रव्यत्वव्याप्तिश्चद्रव्यत्वाभाववद्वृत्तित्वाभावोनतुव्यापक
सामानाधिकरण्यंगौरवात्। जातिमत्त्वंचजात्यधिकरणत्वं तेनगुणकर्मान्यत्वविशिष्टसत्तात्मकसत्त्वावतिगुणादेरना
तिप्रसंगः। विशिष्टसत्तानिरूपिताधिकरणत्वाभावात् अधिकरणतावत्वंचकालिकव्याप्त्यस्वरूपसंबंधेनतेनजगदा
धारेकालेनातिव्याप्तिः। अन्यथागंधत्वावच्छिन्नप्रतियोगिताकव्याप्तिहेतुत्वानंगीकारे। इदमुपलक्षणं। रूपादिसमवायिकारणता म
वच्छेदकतयापिपृथिवीत्वजातिसिद्धिर्द्रष्टव्या। एवंप्रतियोगितासंबंधेनाश्रयनाशजन्यरूपभिन्नरूपत्वेनत्वसमवा ५

दी.
१९

यिष्टपृथिवीसमवेतत्वस्य वृत्तिरूपात्वोभयसंबंधेनाविलक्षणतेजःसंयोगत्वेन नाश्यनाशकभावान्नाशकतावच्छेदकसंबंधे
घटकतयापि। आश्रयनाशजन्यरूपनाशेव्यभिचारवारणाय भिन्नांतं नाश्यविशेषणं। स्वसमानाधिकरणेत्यसंगाद्यादौ
तियोगितासंबंधेन तादृशरूपनाशोत्पत्तिवारणाय स्ववृत्तिरूपत्वस्य नाशकतावच्छेदकसंबंधे प्रवेशः। स्ववृत्तित्वं च कालि
कविशेषणतया बोध्यं। स्वसमवायिसमवेतत्वविशिष्टरूपत्वस्य संबंधत्वे रूपत्वविशिष्टस्वसमवायिसमवेतत्वमादाय
विनिगमनाविरहेण नाशकभावद्वयापत्तेरिति तत्परित्यागः। तेजोवृत्तिरूपप्रतियोगितासंबंधेन तादृशरूपनाशानुत्पत्तिवा
रणाय पृथिवीत्वप्रवेशः। एतेन पाकं गंधे तेजसः कारणत्वेनायाकं च सुरभ्यादिगंधादौ असुरभ्यवगतसुरभ्यादेर्नियामक
त्वेन गंधत्वेनो पृथिवीत्वेन कार्यकारणभावेमानाभावात् पृथिवीत्वं न जातिरिति प्रत्युक्तं। ननु गंधवत्त्वस्य पृथिवीलक्षणत्वे
पाषाणादौ गंधस्यान्वेऽव्याप्तिरिति तीमांशंकां निराकुरुते। न चेत्यादिना। तत्रापि। पाषाणादावपि ननु पाषाणादौ गंधसत्त्वे मा
नाभावेनानुपलंभादित्यत आह। अनुपलब्धिरिति। अन्यथा। पाषाणादौ गंधानंगीकारे तद्भस्मनि। पाषाणभस्मनि य
उक्तमिति। अवच्छेदकध्वंसप्रत्यक्षे घटोपादानानुपादेयेव्यभिचारवारणाय प्रथमं द्रव्यपदं। कामिनीचरणाभिघातज
न्यमंजुलतामंजरीवारणाय द्वितीयमिति। अथवा घटध्वंसजन्यरूपध्वंसे व्यभिचारवारणाय प्रथमं द्रव्यपदं मिथ्याज्ञान
ध्वंसजन्यकार्यमूहेव्यभिचारवारणाय द्वितीयं। एतेन प्रत्यक्षप्रतिविषयस्याहेतुजामतेव्यभिचार कथं वा भागात्सराक
विलजनकाभ्यां मिकावायुक्रियाजनकचरणाघातस्य जनकत्वमिति निरस्तं। प्रतिबंधकद्रव्यासंताभावजन्ये व्यभिचार वा

राम
१९

रणायध्वंसपदं ध्वंसत्वेन च रूजनकत्वं विवक्षितं। तेन प्रतिबंधकसंसर्गाभावस्य हेतुत्वेपि न क्षतिः। व्याप्तिवैयर्थ्यं इष्टं तमाह। इ
ष्टं चैतदिति। ननु गंधेमानाभावेन घ्राणे व्यासेर्लक्षणेनानावृत्तत्वं तल्लक्षणांतरमुक्तं तल्लक्षणं प्रतिपादयति। मुक्तोत्पादि
ना। अलक्षितलक्षणसत्वं प्रतिपादयति। नत्विति। रूपवदिति। रूपवद्यवद्वृत्तिसत्तासाक्षाद्व्याप्यजातिमत्त्वं गुणादावतिव्याप्तिवारणा
य द्रव्यत्वव्याप्येति। द्रव्यत्वव्याप्यजलत्वादिमति तेजआदावतिव्याप्तिवारणाय रूपवद्रूपवद्वृत्तीति जलत्वादेरिव्याप्यत्वादि
रूधर्ममादाय जलादावतिव्याप्तिवारणाय जातीति। अनयैव रीत्या चित्ररूपवादिमते रूपवद्यवृत्तिमित्यन्तत्वसिद्धा निरू
पिताधिकरणतायाश्च प्रसिद्धत्वेन सर्वलक्षणे संभवमात्रं व्याकथितेरूपनाशावद्वृत्तीत्यादिलक्षणे व्याहृतिर्बोध्या। ननु परमा
णुरूपोत्पादनाशयोरभावात्कथं लक्षणसमन्वय इत्याशंक्याह। वैशेषिकेति। षडिति धर्मकरसानां चेतिम्नलोकरसषड्विध
त्वप्रकाशयति मधुरेत्यादिना। ननु पत्रनाना रसानां तत्र स्वव्याप्तिरित्यत आह। अत्रापीति। ननु सुरभ्यसुरभिगंधस्य द्विविधो
मतद्रव्यनेन द्विविधमंथवलक्षणे व्याप्तिलक्षणं। प्रदर्शितं तत्र सुरभ्यसुरभिविधाप्रभेदवैयर्थ्यादित्यत आह। वस्तुस्थितीति।
वस्तुगत्या गंधो द्विविधस्तिष्ठतीति स्वचापितुं तानन्तुलक्षणे द्वैविध्यास्यापि प्रवेशाद्दृष्टव्यः। गंध द्वैविध्यप्रकाशयति।
द्वैविध्यं चेति। ननु स्वाशीतत्वस्य वैयर्थ्यादाह। इत्थं चेति। स्पर्शपाकजत्वमात्राक्षेपे चेत्पर्थः। न्यायमते पाकजस्पर्शाभावव
ति पटे वैशेषिकमते पाकजस्पर्शस्य परमाणये च विद्यमानत्वाद्व्यभिचारिनिर्भागा सिद्धिनाशांकनिषेधेति। यद्यपीति। पा
कजस्पर्शाति सत्तारूपजातिमादाय गगनादावतिव्याप्तिवारणाय द्रव्यत्वव्याप्येति। द्रव्यत्वसमानाधिकरणसत्तामादाय

दी. तिव्याप्तिवारणाय व्याप्तिभागः। स्पर्शसमानाधिकरणजसत्वादिकमादाय जलादावतिव्याप्तिवारणाय पाकजेति। पाकजद्र
२० व्यत्वसमानाधिकरणतेजस्त्वमादाय तेजस्यतिव्याप्तिवारणाय स्पर्शेति। जलपृथिव्यन्यतरत्वाद्यादाय जलादावतिव्याप्तिवा
रणाय जातीति। वस्तुतस्तु पृथिवीत्वजातिरेव पृथिव्या लक्षणं। न च व्यतिरेकसहचारेणान्वयव्याप्तिरेव गृह्यते तद्रूपस्यान्वयि
मते पक्षतावच्छेदकस्य न हेतुत्वमिति वाच्यं हेतुसाध्यसामानाधिकरण्यज्ञानेपि हेतुमान्साध्यवानिति बोधस्यानि
ष्प्रत्यूहत्वेन पक्षतावच्छेदकत्वेपि हेतुत्वाविरोधात्। व्यतिरेकव्याप्तेरगमकतायानुक्तत्वात्। अणुत्वस्य पक्षद्व्यणुकेपि सत्वादाह प
रमाणुरूपेति। कोद्वः स्पृष्टे कार्ये नन्विति। नन्वयं घट इत्यादिप्रतीतिरेव तत्र प्रमाणं भविष्यतीति अत आह परमाण्विति। उप
पत्तेरिति॥ अयं घट इत्यादिप्रतीतेरुपपत्तेरित्यर्थः। तत्संग्रहस्य। परमाणुसमूहस्य। तत्र दृष्टान्तमाह। यथेति। तत्समू
हस्याकेशास्य समूहस्याप्यनुपपत्तेरिति। परमाणूनामनेकत्वादतीन्द्रियत्वादिति भावः। तस्यैवेति। तस्य दूरस्थकेशस्य एवकारव्यवच्छेद्य
माह असंनिधानपदेनान्वेति। तथा च संनिधान एव तस्य प्रत्यक्षत्वादित्यर्थः॥ अन्यथा। अदृष्टस्य दृश्योत्पाद
नत्वे। तत्र तादृशादृष्टेनोत्पत्तिसंभवात्। तदृतः पातिभिः। अतिसन्निहितैस्तां ततिः पातिभिः स्वभावात्त्वाकारणानैरपेक्ष्यात्। उद्भूतरूपादी
ति। आदिना लोकादिपरिग्रहः। तदभावे तदभावे। महत्त्वोद्भूतरूपाद्यभावे। तदभावादिति। महत्त्वाभावादित्यर्थः। भेकस
र्षपयोरपीति। अपिस्त्वसमत्वप्रसंग इत्युत्तरसंबन्धः। अतो जनवद्व्यणुकस्य स्वल्पावयवारब्धत्वे महत्त्वापत्तिः स तु ज्ञायते। सते राम
न्न कश्चिदनन्तावयवपरंपराकल्पनयोर्वयवारब्धत्वं कश्चिदनन्तावयवपरंपराकात्पाच्चयवारब्धत्वमिति तिविदारास्यापि २०

द्यमानत्वे न कार्यं तु तुल्यत्वायादनमिति निरस्तो विश्रामः अनुसमवेतत्वसमाधिकरणं। ननु तथापि विश्रामाश्रयस्य नित्यत्वेम
नाभावद्रव्यत्वं प्रत्यक्षत्यत्रत्विति। ननु तस्य नित्यत्वासिद्धावयवाणुत्वे किं नानमितपत्याह। मूर्त्तापरिमाणेति। चाक्षुषद्रव्यत्वा
दिति अत्रात्मनि व्यभिचारवारणाय चाक्षुषपदं। घटाभविच्छिन्नसादवारणाय द्रव्यपदं। तदवयवत्वसिद्धेरिति। त्रसरेण्वं
वयवसिद्धेरित्यर्थः। तदसिद्धेरिति। अवयवधारायाः असिद्धेरित्यर्थः। अत्रानुमानः। त्रसरेण्ववयवाः सावयवा द्रव्यत्वाद्यनुमा
नयोस्तुल्यत्वं प्रयोजकत्वेन त्र्यणुके च विश्रामः। नन्वणुत्ववत्त्वस्याणुपरिमाणनिबंधनतया तदाश्रयद्रव्यसिद्धिराव
श्यकी इति वाच्यं। तस्योत्कृष्टपरिमाणनिबंधनत्वात्। महत्त्वपरिमाणस्य च वस्तुतरात्। न चैवं त्रसरेणुरेवानंतानावयवीति
वाच्यं। विप्रकृष्टत्वे तेषामपि तेषु घटत्वादिप्रत्ययप्रसंगात्। न च तत्संयोगस्वरूपे च घटत्वं घटो द्रव्यं ज्ञायादिप्रतीतौ च परंपरया
तज्ज्ञानमिति वाच्यं। संभवति साक्षात्संबंधे विषयत्वे परंपरासंबंधविषयत्वकल्पने गौरवादिति प्राहुः। मूर्त्तत्वस्य स्पर्शेन्द्रि
यविषयत्वेन तस्य त्रैविध्ये तु परत्वस्य चापि तु मर्थमाह। साकार्यतेति। यद्यपि शरीरेन्द्रियविषयभेदात्त्रैविध्यं तत्र शरीरे
न्द्रिययोर्विषयत्वाद्विषयेण सम भेदाभावाद्द्वैगम्यमानस्य चानुशिष्टत्वेन नोपपद्यते। तथापि पदार्थतावच्छेदकभेदेन
त्रैविध्यं ज्ञातव्यः। ईश्वरस्य च देहस्य प्रमाणप्रमेयेत्यादिसूत्रे आत्मशरीरेन्द्रियार्थबुद्धिमनः। प्रवृत्तिदोषप्रेत्यभावफलदुः
खापवर्गास्तु प्रमेयमिति सूत्रे द्वादशविधप्रमेयान्तर्गतमनोबुद्धीन्द्रियाणामेव प्रमाणत्वेन प्रमाणप्रमेययो
रभेदेऽपि प्रदर्शनात्। अन्नार्थे च नीलघटयोरभेदप्रत्ययादितो। किं वा बोध्यानं तु कर्मधारयस्य त्वेपि प्रदर्शस्य विषयसत्त्वे

टी· २१ कर्मधारयः एवञ्च किमर्थमंगीक्रियत इति चेन्न। कर्मधारयजन्यपदार्थोपस्थितादात्म्यबोधार्थेच यादृशजन्यभेदाभेदसंसर्गकत्वस्य पदा
र्थद्वयानुभवस्य भेदात्। न च पट इत्यादौ तादृशापवादकः सरूपैकशेषो न स्यात्पदार्थतावच्छेदकभेदाभावात्। तादृशविषय एव तत्सू
त्रे शिष्टिवाच्यं। पदजन्यप्रतीतिर्निर्विषयभेद एव तादृशकल्पनात्। अस्ति च घट इत्यत्र विशेष्यभेदात् तादृशविषयः एवं च चार्थे तादृश इति
पाणिनिसूत्रस्याप्ययमेवार्थो विशेष्ये प्रकारे संसर्गे वा भेदे गम्यमाने तादृशो भवतीति। योनिजे। शुक्रशोणितयोः परस्परमेलनं जन्यं
तद्भिन्नमयोनिजं जरायुजमिति। गर्भवेष्टनं चर्मपुटकं जरायुः। मानुषादीनामित्यादिना पशुमृगाणां परिग्रहः सर्पादीनामि
त्यादिना विहगानां परिग्रहः उद्भिज्जत्वादिकमित्यादिना देवादिशरीरपरिग्रहः तेषामयोनिजत्वे चागम एव प्रमाणम्। मानसा मन्वाद
यः पुत्रा इत्यादि। योनिं विनान्यच्छरीरमित्येवंविधागमे च योनीति पदं कारणमात्रपरं। शरीरपदं चामनुष्यादेरपरांगस्यादीत्यादिना
क्षुद्रयाकस्य मशकादेः परिग्रहः स्वेदः स्वरणं क्षरणं तज्जन्यस्वेदज इति यावत्। याकस्योत्पन्नश्च शरीरसंबन्धेन पुष्पादौ कृपापि
पराहत्यानुमीयते। अनुष्णमन्दनुत्पन्नेः। व्यूहः क्रिया। अवकाशो मुखनासादावन्नादिगत्यप्रतिबन्धः। ननु कथं तर्हि शरीरे पाञ्चभौति
कत्वव्यवहार इत्यत आह एतेनेति। शरीरस्य पार्थिवत्वसाधनेनेत्यर्थः किंतु चेष्टेति। चेष्टात्वं खलु जातिविशेषस्य स्थित इति प्रत्यक्ष
सिद्धः। न च शरीरत्वमेव जातिविशेषश्च चेष्टात्वं च तत्क्रियात्वमिति वाच्यं। पृथिवीत्वादिना संकरेण पृथिवीत्वादिव्याप्यनैकशरीरत्वक
ल्पने गौरवात्। शाकेति तत्रैवेति। भग्नक्षतेति। भग्नक्षततयोर्विभागविशेषविशिष्टावयवयोः संरोहणं। आदिना वृद्ध्यादिसंग्रहः। वृद्धि राम
रवयवोपचयः। तदुन्नयनादिति। आध्यात्मिकवायुसंयोगानुमितेः। ननु भग्नक्षतसंरोहणादिस्तु वायोः प्राणत्वे मानाभाव २१

इति चेन्न। नर्मदातीरसंजाताः सरलार्जुनपादपाः। नर्मदातोयसंस्पर्शात्ते यान्ति परमां गतिं। श्मशाने जायते वृक्षः कंकगृध्रोपसेवि
तद्वृत्यागमस्यैव सत्वात्। अन्त्यावयवित्वेनेति। कार्यद्रव्यानारंभकद्रव्यत्वेनेत्यर्थः। मृतशरीरे चेष्टाया अभावेऽ नचेष्टाश्रयत्वे
मानाभावेनाव्याप्तेराह। अन्त्य वेति। घटत्वमादाय घटेतिव्याप्तिवारणाय चेष्टावदिति। हस्तादावतिव्याप्तिवारणायांत्यावयवीति
। पृथिवीत्वरूपतादृशजातिमति घटादावतिव्याप्तेर्लक्षणांतरमाह। अंत्यसावयवीति। अंत्यावयविमात्रवृत्तीत्यनेन द्रव्यत्वजाति
व्युदासः। चेष्टावद्वृत्तीत्यनेन घटत्वादिव्युदासः। चेष्टा च हिताहितपरिहारार्थक्रियाग्राह्या न तु स्पंदनमात्रं घटादावपि सत्वात्।
ननु देवत्वरूपजातिमादाय लक्षणसमन्वयः परस्तत आह। जातीयेति। जातित्वाभावादिति। जातिसांकर्यादिति भावः। जातिसा
कार्यस्यादोषत्वे तु देवत्वजातिमादायैव लक्षणसमन्वय इति ध्येयं व्यंजकत्वान्न दोषः। घ्राणेंद्रियेगंधत्वाभिव्यंजकत्वादसिद्धिवा
रणाय पक्षेतो मध्यपातेन चासिद्धिवारकं विशेषणं निरर्थकमिति वाच्यं व्यभिचारज्ञानदशायामप्रसिद्धा च यि व्याप्तिज्ञानाभावेन
असिद्धेर्दोषत्वे का असिद्धिवारकविशेषणोपादानस्य सर्वत्रासत्वात्। तदर्थित्वात् सिद्धेर्व्यर्थत्वात्। तथा च दृष्टांते सूचीयस्तु पादिकं
ज्ञके घटतादावसिद्धिवारणाय परकीयत्वरूपादौ विशेषणं देयमिति भावः। तस्येति। नवशरावगंधव्यंजकजलस्येत्यर्थः। परकी रा
यीति विशेषणाप्रवेशेन लाघवादाह। यद्वेति। तदुदाने हेतुमाह। वायूपनीतेति। तत्र। घ्राणेंद्रियसंनिकर्षकार्यजातमित्यत्र जा
तपदं संपन्नायाति। नन्वेवं सर्वस्यैव विषयत्वेन शरीरेंद्रियविषयभेदेन पृथिव्यास्त्रैविध्यं न सिध्येदत आह। शरीरेंद्रियायो
रिति।। इति पृथिवीग्रंथः। जलत्वजातौ प्रमाणमाह। स्नेहेति। कारणतावच्छेदकतया धर्मसिद्धौ बाधकाभावस्य न जातित्वं २१

…टी. तिभावः।कार्यमात्रवृत्तिधर्मस्यकार्यतावछेदकत्वनियमेनजन्येसत्त्वस्यकार्यतावछेदकत्वेनसंभवतीतिशंकतेयद्यपीति।तथाकार्यज-
२२ वछेदकोभावतत्वतन्नित्यसाधारणधर्मस्यकार्यतावछेदकत्वेदोषाभावाज्जन्यपदंनदेयमेव।ननुयथारासभस्यदण्डादेरुपत्तानुप-
धायकेकारणतावछेदकतयादण्डत्वादिकंजातिःतथात्रापिभविष्यतीत्यतआह।तस्येति।दण्डादेःस्वतप्रयोगपतायांनकापिवृत्तिः
तस्यानित्यत्वेनफलोत्पादकाभावादितिभावः।तदवछिन्नेति।जन्यजलत्वजात्यवछिन्नेत्यर्थः।ननुजलत्वावछिन्नप्रतिसमवा-
यिसंबंधेनस्नेहस्यैवकारणत्वमस्तुअतिरिक्तजातिकल्पनागौरवापत्तेरपेवादितिचेदन्नो चिरंजलत्वावछिन्नप्रतिस्नेहत्वेनका-
रणत्वंधातस्पर्शत्वेनचेपत्रविनिगमनाविरहादतिरिक्तजातिसिद्धिःकृषोसमादायककल्पनीयेतिनिगमनाविरहभावश्चे-
तिचेच्चिन्तनस्माकिंप्रत्यार्द्रधतादेःकारणत्वंनिर्विवादमार्द्रत्वंचजलसंयुक्तत्वंतथाचजलसंयुक्तेधनत्वेनेंधनसंयुक्तजल-
त्वेनवाकारणत्वेपत्रविनिगमनाविरहजालेंधनयोःपार्थिवेनवाकारणतावछेदकतयाजलत्वजातिसिद्धिरित्यप्याहुः।परेतुजर-
त्वजलाद्वृत्तिप्रत्यक्षासिद्धजलरूपजात्यवछिन्नसमवायिकारणतावछेदकतयापरमाणुसाधारणजातिसिद्धिः।कार्यतावछे-
दककारणतावछेदकयोरेक्यत्स्यभावातनित्यसाधारणधर्मस्यकार्यतावछेदकत्वेदोषाभावाच्चेत्याहुः।नत्विति।पृथिव्या-
दवृत्तिवायवृत्तेरितिशेषः।स्फुटंरूपवत्वस्यलक्षणत्वेपिनक्षतिरित्यभिप्रेत्याह।।अथवेति।अन्यत्वव्याप्यवायुत्वरूपजाति-
वा२ मादायवायावतिप्रसंगातोरूपवदित्युक्तम्।पथाम्बवायुत्वजातिस्तथाग्नेवस्पतेः।पृथिवीत्वादिजातिमादायपृथिव्यादावतिप्र- राम
संगवारणायनैमित्तिकद्रवत्ववदत्युक्तम्।साक्षादितिपटत्वादिवारणाय।अन्त्यत्वसमानाधिकरणसत्ताभवतीतितात्पम्। २२

दायपृथिव्यादावतिव्याप्तिवारणाय व्याप्तिघटकनियतत्वभागः। जलत्वपृथिव्यन्यतरत्वमादाय पृथिव्यादावतिव्याप्तिवारणाय जा
तीति एवमेव चक्षुर्ग्राह्येति भास्वरशुक्लेतररूपे सत्त्रापि व्यवसेयम्। जलस्यैवेति। ननु जले रस एव वासिद्धः। सर्वेषामवनीरसयवनयान
वृक्षस्पर्शिनां जलपानोपपत्तेरिति चेन्नू मानुषाणां तद्रसपैरसवत्त्वैवयानादितितर्कसहकृतप्रत्यक्षस्यैव मानत्वात्। तन्माधु
र्यं च कषायद्रव्योणाभिव्यज्यते। नच कर्कटीभक्षणानंतरं तिक्तत्वानुभवात्तिक्तोपि रसः स्यादिति वाच्यं। तस्याश्रयतिक्तत्वात्। प्री
तएवेति द्रवत्वव्याप्यायां पृथिवीत्वरूपजातिस्तामादाय पृथिव्यामतिव्याप्तिवारणाय तिजात्याग्रहीति। तेजस्त्वादिजातिमादाय
तेजस्यादावतिव्याप्तिवारणाय मधुरग्रहणीति। शीतस्पर्शवतीति दिग्वाच्यसेयं। शीतेतरेति। द्रवत्वरूपजातिमादायातिप्रसंगवा
रणाय शीतेतरस्पर्शवद्ग्रहणीति। आत्मत्वादिकमादायात्मन्यतिव्याप्तिवारणाय शीतस्पर्शवद्ग्रहणीति। शेषं पूर्ववत्। ननु ज
लेनीलरूपाभावे कथं नीलरूपप्रतीतिरत आह॥ नीलत्वेति। अतएव नीलरूपाभावादेव॥ चेद्भोय इति जलस्येत्यादिः।
तत्र। जले। तस्य माधुर्यस्य। अन्यथा। आश्रयोपाधिकत्वाभावे जले मधुरमेव रसं संभवस्यापि शीतस्पर्शमपि साधयति ए
वमिति। ननु कथं तर्हि घृष्टचंदनादौ शैत्यं तस्य तेजःसंयोग जलस्येव शीतस्पर्शवाप्रतीतिरत आह। घृष्टचंदनादौ विलितिः। तत्र।
जले। विवेचापि ष्यतिचपाकासंभवमनुपरिष्यात्। तेन जल एवेति। स्नेहस्यावांतरविशेषाभावात्सनोत्कर्षितः। तत्र न नवतावद्दे
दकं तदेव। सांसिद्धिकद्रवत्वमेव। इति वक्ष्यतीति। स्नेहनिरूपणावसरे इति शेषः। जलीयं शरीरमेतत्स्वयार्थिवावयवैरुपष्टं
वौभोगो तेन जलमात्रे हस्तपादादिव्यवस्थाया असंभवेपि न क्षतिः। ननु तादृशशरीरे मानाभावादनुपत्तं भादित्यत आह वरुणलो

मु॰ टी॰ २३

कइति॥ तत्रच स्मृतिरेव प्रमाणं इतिभावः॥ मेघेति॥ सव्यंजके मनसि व्यभिचारवारणाय गंधाव्यंजकत्व इति॥ तयोरिति॥ हिम
करकयोरित्यर्थः॥ ननु हिमकरकयोः पार्थिवत्वाभावे कथं काठिन्यप्रत्यय इत्यत आह॥ अदृष्टविशेषेणेति॥ इति जलग्रंथः॥
इत्थं चेति॥ उष्णत्वजातिसिद्धौ चेत्यर्थः॥ ननु कथं तत्सिद्धिरित्यो उष्णस्पर्शसमवायिकारणमित्रेषु परमाणुषु तेजस्त्वजातिसि
द्धिरित्यत आह॥ तस्येति॥ तेजस्त्वस्येत्यर्थः॥ जन्यतेजस्त्वावच्छिन्नजनकतावच्छेदकजातिः परमाणुवृत्तितेजस्त्वरूपजातिसि
द्धिरित्यर्थः॥ इदमुपलक्षणं समवायेनाविलक्षणनीलोत्पत्तित्वावच्छिन्नं प्रतिसमवायेन तेजःसंयोगत्वेन हेतुत्वे तमभावात्ते
जस्त्वजातिसिद्धिरित्यपि द्रष्टव्यं॥ चंद्रकिरणादावित्यादिना रत्नादिसंग्रहः॥ तत्रापि॥ चंद्रकिरणादावपि॥ ननु तर्हि उष्णप्रतीतिः कुतो ने
त्यत आह॥ किंत्विति॥ तदंतःपाति जलस्पर्शेनेति॥ चंद्रकिरणांतर्गतजलभागवृत्तिस्पर्शेनेत्यर्थः॥ ननु चक्षुरादिनिष्ठस्योष्णस्पर्श
स्य केनाप्यनभिभूतत्वात्स्वात्प्रत्ययापत्तिरत आह॥ चक्षुरादौ चेति॥ मरकतकिरणादावित्यादिना सुवर्णस्यापि ग्रहः॥ ननु रूपाविष
यकद्रव्यप्रत्यक्षस्यास्यावारकौष्ण्यानरादेरुष्णत्वानायतिदिति शंकते॥ तद्रूपाग्रह इति वैश्वानरादेरचाक्षुषत्वे धर्मिग्राहकसंख्यादि
गुणानामपि चाक्षुषत्वं न स्यात् योग्यमात्रवृत्तित्वाभावादित्यपि नास्तु चिंत्यं॥ मतांतरमाह॥ वह्नेश्चेति॥ पृथिव्यप्रत्यक्षीति॥ नैमित्ति
कद्रवत्ववद्वह्नि द्रव्यत्वरूपजातिमादाय पृथिव्यादावतिचारवारणाय पृथिव्यवृत्तीति॥ पृथिव्यवृत्ति वायुत्वादिकमादाय वाय्वादाव
तिव्याप्तिवारणाय जातीति॥ परकीयस्पर्शादीति परकीयरूपादिमंतुकत्वादसिद्धिवारणाय स्पर्शपदं॥ इदं च केचिद्भृंगः॥ चक्षुर्वि रा॰
षयासंबद्धमेवयस्कं यदि प्राप्यकारिस्यात्तदा रसनादिवदधिष्ठानसंबद्धं स्यादकुर्वीयात्॥ नचैवं गोलकासंबद्धग्रहणात्॥ किंच २

यदि चक्षुः प्राप्यग्राही स्यात्तु स्वतोऽधिकपरिमाणं न गृह्णीयात्तन्न खलु नखं रंजनिकापरमुखे दृष्टं छिनत्ति। शाखाचंद्रमसोस्तुल्य
कालग्रहणं नायतिशीघ्रगतिक्रमेण प्राप्यग्रहणे हि क्रमेण ग्रहणं स्यात्। ननु तुल्यकालमनुपलंभः। अनुभवति तत्क्रमस्तत्र यत्नेऽपि न
यते प्रागर्वाचीनमपरं च वस्त्वेव प्राप्यकारित्वेऽपि पुरोवर्तिना गोलकातिरिक्तं चक्षुः परैरंगीक्रियते गोलकस्य चंद्रादिप्राप्त्यसंभवा
त्। अप्राप्यकारित्वे च गोलकमेव सेव चक्षुस्तच्च न तैजसमिति। तदसत्। अधिष्ठानासंबद्धार्थग्राहित्वेन। प्रदीपस्येव चक्षुषोऽप्रा
प्राप्यकारित्वसंभवात् पृथुतरग्रहणस्य च गोलकनिर्गतस्य सतस्तस्य तु पृथग्भूततत्त्वेन प्रदीपवदेवोपपत्तेस्तुल्यकालग्रह
णं चातिसूक्ष्ममेव तदभिमानस्य कालसंनिकर्षेणैवोपपत्तेः। अपि च स्फीततैजसालोकावृत्तितिशायेन वेगातिशयोपपत्त्याचीनाचक्ष
दृज्वलत्त्विषेव भगवति महरवमालिनि भवतोऽदूरे प्रालोकस्त्वमिमानेऽस्तोकिकानां पत्वाकुः। प्राभाकराचार्याः चक्षुर्वात्या
लोकव्यापारद्वेन चक्षुषा नावदर्थसंस्पृष्टेन युगपज्जावद्ग्रहणमिति शाखाचंद्रमसोस्तुल्यकालग्रहणमुपपद्यत एवेति तत्क्र
मोऽभिमानं। चक्षुर्धाराऽऽलोकाभ्यामारब्धस्य चक्षुः पृष्ठभागेऽपि सत्त्वात्पृष्ठभागस्थितपदार्थग्रहणापत्तेरिति लाघवादाह। अथ
तिः तैजसत्वे किं मानमिति। सुवर्णं पार्थिवं नैमित्तिकद्रवत्वादनुमानस्य पार्थिवत्वसाधकस्यैव सत्त्वादित्याशयः। न च सुवर्णं
तैजसमसति प्रतिबंधके अत्यंतानलसंयोगेऽप्यनुच्छिद्यमानानैजद्रवत्वसिद्धिरिति वाच्यं। तस्याप्रयोजकत्वात्। समाधत्ते नेति। अ
सति प्रतिबंधक इति। जलमध्यस्थ कथ्यमाने घृतादौ व्यभिचारवारणाय असति प्रतिबंधक इति। अग्निसंयोगानाश्यद्रवत्व
वति घृतादौ व्यभिचारवारणाय संयोग इत्यंतं। तादृशद्रवत्वस्य समानाधिकरणाग्निसंयोगासमानकालीनत्वान्न व्यभिचारः

मु. टी.
२४
२५

अन्नच्छिद्यमानद्रवत्वादित्यानुच्छिद्यमानद्रवत्वाधिकरणत्वादित्यर्थेनतच्छिद्यमानद्रवत्वानधिकरणत्वादितिगगनादौ व्यभिचा
रात्। सर्वपार्थिवेष्वाश्रोकित्वं अप्रयोजकं ताम्रस्येति नचेति। तोयदः वर्णतस्यप्रतिबंधकीभूतद्रव्यस्य। उत्तमस्यस्य। अग्निसंयुक्त
स्यर्थः। नचाप्रयोजकत्वं। विरोधिद्रवद्रव्यसंबंधविनापार्थिवाग्निसंयोगस्यसर्वस्यविजातीयरूपजनकत्वादितिभावः। नचद्रव्या
दन्यदेवप्रतिबंधकं वाच्यं। अदृष्टकल्पनापत्तेरिति॥ तस्येवेति। तस्यद्रवद्रव्यस्य। तेजसस्यपराभिभावकत्वमभिभूतरूपत्वादवि
रुद्धं। स्वर्णस्यरूपस्यानुभूतत्वेप्रत्यक्षतानापत्तिः। अभिभूतरूपवत्वेअत्यन्तमलदअमरकपरस्यैवप्रत्यक्षत्वं। नवीनास्तुद्रवत्वे। सुव
र्णपार्थिवमेवद्रुतं द्रुततरमितिप्रत्यक्षेद्रवत्वस्याप्यंततोछेदात्पृथिवीत्वस्यपीतरूपसमवायिकारणतावच्छेदकत्वात्तद्रूपनाशेता
दात्म्येनस्वर्णस्यविरोधित्वाच्चनपीतरूपताक्षतिः॥ इतितेजोग्रंथः॥ वायोप्रमाणंदर्शयितुमत्रपाकजेनुष्णाशीतस्पर्शस्यैव
नैयत्तरस्तृतंतत्राप्यपाकजादिपदानांक्रमेणाव्याहृतिमाह॥ अनुष्णाशीतस्पर्शस्येतिएतेनस्पर्शस्यानुष्णाशीतत्वकथनेनतज्ज
नकतावच्छेदकमितितथाचविजातीयस्पर्शजनकतावच्छेदकतयावायुत्वजातिःसिध्यतीत्यर्थः। इत्युपलक्षणं। शुकादिपाकविशे
षस्यवह्निलावच्छिन्नस्यवानिमित्तकारणतावच्छेदकतयावायुत्वजातिसिद्धिरित्यपिज्ञातव्यं। व्यक्तेस्पर्शादिलिंगकइति। स्पर्शादानि
त्लिंगादौ। नियस्यसतयोक्तः। मुक्तावल्यांद्रष्टव्यमिति। द्रष्टुमशक्यगुरुत्वाद्द्रव्यस्यापतनाविजातीयस्पर्शेनेति। तृतीयानचतुष्के अनुमानादि
स्यग्रेननेनान्वितं। अनुमितिप्रकारस्तयायरूपवद्द्रव्यासमवेतस्पर्शः। सक्रियादाश्रितस्पर्शत्वात्पृथिवीस्पर्शवत्। अत्रपृथि
व्यादिस्पर्शसिद्धसाधनवारणायरूपवद्द्रव्यासमवेतइतिपदस्यविशेषणं। एवमसतिरूपवद्द्रव्याभिघातेयोयस्पर्शादिषुप्रवाहः संतानः

सस्पर्शी वद्वेगवद्द्रव्यसंयोगजन्यश्च विभज्यमानावयवद्रव्यसंबंधिवाद्यसंतानत्वात्। दंडाभिहतभेरीवाद्यसंतानवत् पृथिव्या
द्यभिघातजन्यासिद्धसाधनवारणायासतीत्यादिपदविशेषणं। विभागजन्यनिष्पाके व्यभिचारवारणाय हस्ताववि भज्यमाने
त्यादि। एनभसि स्तनयित्नुविमानादिधृतिः स्पर्शवद्द्रव्यसंयोगहेतुकास्मदाद्यनधिष्ठितद्रव्यधृतित्वात् नौकादि
धृतिवत् जलत्वादिगतत्वेनादौ सिद्धसाधनवारणाय नभसीति। प्रयत्नसंयोगहेतुकघृतादौ व्यभिचारवारणायास्मदादीति। ए
वं तद्रूपवद्द्रव्याभिघातं मतवेगेनत्रणोकर्म स्पर्शवद्वेगवद्द्रव्याभिघातजं विशिष्टकर्मत्वात्। नदीपूरस्तंभकाष्ठादिवन्न न कर्मसाधि
ति। नेचमुक्तत्वेतत्कृतसंख्यादीनामयित्वगिंद्रियग्राह्यत्वापत्तिरेतेषु पूर्ववन्नित्यत्वाद्युक्तमिति। पूर्ववत् जलवदित्यर्थः। नित्यता
दीत्यादिना। अनित्यत्वपरिग्रहः। उक्तं चोष्मामिस्पर्शः। एतदेवस्पष्टयति मुक्तावत्पार्वायुर्द्विविधइति। तत्र। तेषु मध्ये। पिशाचादीना
मिति। योनिजंतुमत्तां लोके प्रसिद्धं। ननु वायोस्तत्वावयवाक्षापकाभावात्कारणाद्यभावे च नवाक्षणविरणाद्यभावात्कायं
भोगायतनमिनमितिमित्यत आह: पंक्तिविति। जलीयतैजसेति दृष्टांतार्थः। ननु कथं तर्हि जलीयत्वादिव्यपदेश इत्यत आह। जलादी
नामिति। अत्रात्वगिंद्रिये। योविशेषः। अधिष्ठानादिः। शरीरव्यापकमिति। नचनखलोमकेशादिवृक्षानानां त्वगिंद्रियानाधार
त्वादसंभव इतिवाच्यं। तेषां संयोगिद्रव्यत्वेन शरीरत्वाभावात्। मूलस्थस्पर्शत्वगिंद्रियमित्यस्पत्वग्गिस्थितमिंद्रियमित्यर्थः। एतेनेद
सत्त्वावरणं त्वगित्युच्यते तच्च पार्थिवंदृष्टप्रत्यक्षसिद्धं चेति नेंद्रियं न च वायवीयमिति परास्तं त्वगिंद्रियस्य लक्षणमाह। स्पर्शेति।
कार्यमात्रजनककालादावतिव्याप्तिवारणायेंद्रियमिति। चक्षुरादावतिव्याप्तिवारणाय स्पर्शग्राहकमिति। त्वक्त्वमिंद्रियमित्य

त॰री॰
२५

र्थः। नन्वेति। त्वगिंद्रियंचेत्यर्थः। पदेस्पर्शत्वाभिव्यंजकत्वादसिद्धिवारणाय रूपादिष्वमध्य इति। मनसि व्यभिचारवारणायैव चकारः
त्वकमानिकाय व्यभिचारवारणाय द्रव्यत्वे सति त्वपि वोध्यं अंगसंगिमलिंगं। स्वेदं। आकारे। अससरूपाद्भाष्यादौ। प्राणात्व
त्वेकारचेति। शरीरा। भ्यातरसंचारी वायुः प्राणः स च एक एव मुखनासिकाभ्यां निष्क्रमणप्रवेशनात्प्राणः। मला
दीनामधोनयनादपानः समंतयनात्समानः ऊर्ध्वनयनादुदानः। नाडीमुखेषु विततानाद्व्यान इति पंचसंज्ञां लभते न तु सत्तामे
देन संज्ञिभेद इत्यर्थः। इति वायुग्रंथ वदपं श्रीराम। आकाशेति। कालत्वदिक्त्वेन जातिरित्यत्रैवकृत्यमन्तव्या द्येवेनाद्वैवैप्रसंगा
द्युगपदभिहितं। न जातिरिति। अनेकसमवेतत्वाभावादिति शेषः तेनैकव्यक्तिकत्वस्य जात्यभावे हेतुत्वे वैयधिकरण्यमिति अभ्युप
वितथेति। आश्रयताचात्र समवायेन विवक्षिता तेन कालस्य जगदाधारत्वेनाश्रयत्वेपि न क्षतिः एवं कालत्वादि
विपरीतयत्नानुमेयत्वं दिक्त्वे पुनः कालविपरीतपरत्वानुमेयत्वं। मौक्तवेशेषिकपदवैयर्थ्यमाशंक्याह। वैशेषिकत्वेति
। एतेन। शब्दाश्रयत्वकथनेन। प्रमाणं। शब्दो द्रव्याश्रितो गुणत्वादित्यनुमानमुपदर्शितं। सूचितं। अनुमाने स्वरूपासिद्धिपरि
हर्तुमाह॥ तथात्वेति घटादौ व्यभिचारवारणाय वहिर्ग्रहणायोग्येति। आत्मनि व्यभिचारमाह तथैव वहिरिंद्रियग्राह्यमिति। र
सत्वादौ व्यभिचारनिरासाय जातिमदिति। स्पर्शवद्भिः॥ सिद्धसाधनतां निरसितुमाह। शब्देनेति। हेतुसत्वं प्रतिपादयितुं पाक
जेति। जलपरमाणुष्विति। अनित्यानां पार्थिवरूपादीनां केषांचिदग्निसंयोगासमवायिकारणकत्वात्केषांचित्कारणगुणपूर्वक रा
त्वादत्रोपेक्षा। नदिकालेति शब्दस्यानुवर्तते। वहिरिंद्रियेति। मनसो रूपादिग्राहित्वेपि इंद्रियत्वस्य पक्षत्वादित्यर्थः एतेनानात्मगु २

ग्राहकेंद्रियत्वंबाह्येंद्रियत्वंतच्चमनस्यप्यतिप्रसक्तंतेनापिरूपादिग्रहणादितिनिरस्तं।इत्थंच।एतेनग्राह्यष्टद्रव्याणांशब्दाधि
करणत्वाभावेच।नन्वेतत्सर्वंतदोपपद्येतयदिशब्दस्यविशेषगुणत्वेकिंविस्त्रमाणंस्यात्तत्रैववक्ष्यमाणंनपश्यामइतिचेन्न।
प्राविशेषगुणःलौकिकप्रत्यासत्त्येंद्रियग्राह्यत्वेसतिलौकिकप्रत्यासत्त्याद्वींद्रियग्रहणायोग्यजाता।दित्येवसतिगुणत्वव्याप्यजा
तिमत्वात्।प्रमात्वमादायव्यभिचारवारणायगुणत्वव्याप्येति।गुरुत्वमादायव्यभिचारवारणायप्रथमंसत्यंतं।संख्यात्वमाद
यव्यभिचारवारणायद्वितीयंसत्यंतं।ननुतथापिप्रत्यक्षमेवप्रमाणंकिमितिनोपन्यस्तमितिचेन्न।चाक्षुषत्वेप्रयोजकस्यमह
त्वेसत्युद्भूतरूपवत्त्वस्याकाशेऽसंभवेनचाक्षुषःप्रमाजनकत्वासंभवात्।ननुयथाकाशोनचाक्षुषस्तद्वत्स्पर्शीतिचाक्षुषाधिक
रणत्वेनाकिंभासतइतिचेदालोकएवेतिकत्वेयवायुगुणएवप्राह्ये।भविष्यतीत्याशंकांनिरस्यति।।नचेति।।अप्रयाचंद्रव्येतिअप्रया
कारणगुणपूर्वकप्रत्यक्षत्वादितिहेतुरसिद्धः।वायववयवेषुशब्दस्वीकारेविरोधाभावात्।यावद्द्रव्यभावित्वंचसरागत्वेर्वायौवि
द्यमानस्यापिशब्दस्यास्पर्शानुपलंभवद्वोपलंभाभावात्संभवत्येवेतिदेव्य।श्रोत्रग्राह्यजातीयविशेषगुणवत्त्वादिंद्रियत्वा
च्चाक्षुषवदित्यनुमानासिद्धश्रोत्रग्राह्यजातीयविशेषगुणवत्त्वशालिनःश्रोत्रस्यापिवायवीयत्वप्रसंगात्तंचश्रोत्रस्यावायवीयत्वेकि
मनिष्टमितिवाच्यं।वायवीयेंद्रियस्यस्पर्शग्राहकस्यस्पर्शग्राहकत्वेनवाह्यत्वमाद्याताताववाह्यत्वस्यचप्रतिनियतार्थग्राहकत्वेनव्याप्तेः
नचवायवीयत्वाविशेषेपित्वक्श्रोत्रयोर्भिन्नभेदात्प्रतिनियतार्थग्राहकत्वानुपपत्तिरितिवाच्यं।प्रतिशरीरंघ्राणादीनांव्यक्ति २२
भेदेपिविषयवैचित्र्यादर्शनात्।यदितुश्रोत्रत्वेत्वक्त्वेरकप्रकृतित्वेपिश्रवदृष्टभेदेनैवविषयवैचित्र्यमित्युच्यतेतर्हिसर्वत्रेंद्रियेएषैव्या २

मु.टी. एवंप्रकृतित्वमास्तां विषयवैचित्र्यं त्ववच्छेदकभेदादेवेत्येकं च रसनादीनां प्रकृत्यं पुनः कल्पनोच्छेदप्रसंग इत्यत आह भूयसामिति स्तरण। नन्वाका
शपशरीरविषयोः प्रदर्शनमनुपपत्तिस्त्वेवकर्यामिंद्रियप्रदर्शनामिंद्रियस्तु भवेच्छ्रोत्रमित्यपने नयं श्रवनक्रियत इत्याशंकायां॥ तत्रेचेति॥
२६ आकाशोचेत्यर्थः॥ कर्णशष्कुल्यभेदादिति॥ चैत्रादिकर्णशष्कुल्यभेदादिति। चैत्रादिकर्णशष्कुल्यवच्छिन्नं चैत्रादिश्रोत्रमिति
भावः। अनुनवास्तु। शब्दनिमित्तकारणत्वेन ज्ञ ससस्येश्वरस्येव शब्दसमवायिकारणत्वं। न चैवं तत्रापत्तेः। अदृष्टादिवत्प्रतिबंध
कत्वकल्पनेचातिगौरवं न्त्वेवं कर्णशष्कुलीविवरावच्छिन्नाकाशस्य कथं श्रोत्रत्वोपपत्तिरिति वाच्यं। तथाविधस्येश्वरस्यैव श्रो
त्रत्वोपपत्तेरिति सम्यगाकूतं। स्वतंत्रास्तु। मृदंगादीनामेव गुणः शब्दः शब्दः शब्दप्रति मृदंगत्वादिना समवायिकारणतायाः स्वीका
रात्प्राचीनैरयं मृदंगत्वादिना निमित्तकारणतायाः स्वीकारात्। मृदंगे शब्द इत्यादिप्रतीतेश्च। न च तत्रावच्छेदकत्वं विषयोमाना
भावात् अन्यथात्रावच्छेदकतारवस्य स्वरूपसंबंधस्यान्यत्र समवायस्य कल्पने गौरवात् इत्यलिवदंति॥ इत्याकाशग्रंथः॥ संबंधे
ति। स्वाश्रयस्त्तत्र्यसंयुक्तद्रव्यसंयोगेत्यर्थः॥ परत्वापरत्वयोरिति॥ एतयोरुत्पत्तिर्गुणप्रकरणे वक्ष्यते॥ एतेन कालजन्यापाप
रत्वापरत्वाभ्यां कार्यकारणतया कालस्यानुमानमिति परास्तं वर्षादीति। आदिनालवनिमेषकाष्ठाकलामुहूर्तयामाहोरात्रा
र्द्धमासऋत्वयनयुगकल्पमन्वंतरप्रलयमहाप्रलयपरिग्रहः॥ नन्वेक एव यदि कालस्तदा कथमुपपद्यते क्षणादिव्यवहारा इत्यत रा.
आह। कालस्त्वेकोपीति। स्वजन्येति। स्वं क्रिया। अत्र स्वजन्यविभागः प्रागभावावच्छिन्नः क्षणोपाधिविशिष्टः एवमुत्त
रत्रापि। अत्र कर्मणः कालोपाधितायाः सर्वसंमतत्वात् कर्मणोभिधानं। वस्तुतस्तु परस्परविशिष्टो तादृशसंयोगविभागावेव २

क्रमोजन्यमात्रस्यैवकालोपाधित्वादित्यवधेयं विपंभाविगोत्पत्तिका लेदाणव्यवहारजनकमुपाधिमाह सर्वसंयोगेति। सर्वसंयोगना
गनाशोत्पत्तिसमयेत्तमाह। सर्वसंयोगनाशेति॥ संयोगनाशोत्पत्तिसमयेवाह॥ उत्तरसंयोगेति। नस्यादिति। एतत्कर्मणो भावादि
संसमयत्व तिभावः। जन्यमात्रस्यैवभावादाह। क्रमेणायत्वेति। एवंक्षित्यावच्छिन्नावविशिष्टसमयत्वं। उपाधिभेदे तत्क्षणव्यवहारमुक्त्वा। दिनादिव्य
वहारमाह। दिनादिति। इतिकालग्रंथः। मूर्त्तेष्वितिकपालादौ भावप्रधानाविन्यासायेनाह॥ इत्यमिति॥ मौक्त्तादिप्राच्ये नक्षत्र घटइ
तिप्रतीतिः संग्रहः। प्रतीच्यादीत्यादिनोदीच्यादिपरिग्रहः। यदायत्पुरुषस्येत्यादि। वस्तुगत्यादि। वस्तुगत्यादिप्राएकस्तेपिसर्गा
दिभवेमेरौच्यादिभिः पश्चाद्विभिः। प्राचीनप्रवणेन वैश्वदेवेनयजेतनप्रतीचीशिराः शयीतेतिश्रोतस्यायुष्यंप्राङ्मुखोन्नुस्मर
त्यादिस्मार्तस्यदक्षिणेनपालीतित्तौकिकस्यचव्यवहारस्यसिध्यर्थमेरुपरितोभ्रमतोविवस्वतः संयोगविशेषाणामिन्द्रादिलोकपा
लपरिगृहीतदिक्प्रदेशानां चसंज्ञाः प्राच्यादिभेदेनकृताइतिभावः नवीनास्तुकालकाष्ठेनातिरिच्यतेमानाभावात्। न
चेदानीं घटस्तदानींघटः इर्वस्यादिशिघटः प्रतीच्यादिशिघटइत्यादावनुगतप्रत्ययानुपपत्तिरितियुक्तंनत्वादिकृत्तोपा
ध्यवच्छिन्नेश्वरादेवकथितानुगतप्रत्ययोपपत्तेरित्याहुः॥ इतिदिग्निरूपणं। सुखदुःखादीतिजन्येत्यादिः तेनसुखत्वस्यानित्य
वृत्तित्वेपिनक्षतिः यथाचेश्वरेनित्यसुखसंभवस्तथोपयथादितमधेत्तात्र। वस्तुतः कार्यतावच्छेदकसद्वितीयत्वेतेरापिस्वी
काराद्यथोक्तनामेवसाधारः। आदिनाद्वेषधर्माधर्मभावनापरिग्रहः। अथसुखत्वाद्यवच्छिन्नप्रत्यात्मत्वेनकारणत्वेमा
नाभावः। सुखदुःखद्वेषभावनाधर्माधर्मास्प्रतियथाक्रमंधर्माधर्मानिष्टसाधनत्वादितानानुभवविशिष्टतानिषिद्धकर्मणा

म.रा. समवायसंबंधेन निमित्तकारणत्वावच्छेदकतयातिप्रसंगभंगात् भावकार्याणां समवायिकारणत्वनियमस्य तु द्रव्यत्वेन तत्र
२७ द्यक्तिसमवेतसत्प्रतीतिस्तन्नद्युक्तित्वेन समवायिकारणत्वमादायैवोपपत्त्वादिति चेदत्र प्राञ्चः। कार्यमात्रवृत्तिजातिः समवायि
कारणकार्यतावच्छेदकनियमेन तादृशकारणभावात्तस्याव्यवच्छेदकत्वात्। न च तावता सुखत्वाद्यवच्छिन्नं प्रति तत्त्वेन द्रव्यत्वेन
२६ वा कारणत्वमस्त्वत्र अदृष्टादेर्निमित्तकारणत्वादेवातिप्रसंगविरहादिति वाच्यं। व्याप्यत्वमुभ्रेतधर्मे कारणतावच्छेदकत्वसंभ
वति व्यापकधर्मेण कारणत्वकल्पनाया अनुदयात् इत्युक्तं चैतः। ननु तथाप्यात्मत्वजातिर्भगवदात्मसाधारणे मानाभाव
इत्यत आह ईश्वरेऽपीति। आत्मा वा रे द्रष्टव्य इत्यादिश्रुतेः तामपात्यवत्वेसत्वादिति भावः। ननु तत्रेश्वरे सुखाद्युत्पत्तिः कुतो न भवतीत्यत आ
ह। अदृष्टादीति। आदिना शरीरपरिग्रहः। ननु नित्यस्य स्वरूपयोग्यस्य फलावश्यंभाव इति नियमेनेश्वरस्य स्वरूपयोग्यत्वे फलोप
धानापत्तिरित्यत आह। नित्यस्येति। अप्रयोजकत्वादिति। जलपरमाणौ स्नेहानुत्पत्त्या तादृशनियमे मानाभावादिति भावः। नन्वीश्व
रे दृष्टमुत्पद्यतां ज्ञानत्वादिप्रकारकज्ञानसत्त्वादिति चेन्न मिथ्याज्ञानरूपकारणाभावात्। मिथ्याज्ञानस्यादृष्टहेतुत्वे च मुक्तानामप्यदृ
ष्टोत्पत्तिप्रसंगः। अत्र दीधितिकृतः। सुखत्वसमवायिकारणतावच्छेदकजातेरीश्वरवृत्तित्वे साधकाभावः। अन्यथा द्रव्यत्वमेवा
वच्छेदकमनवेतु गगनादेरदृष्टाभावान्न सुखं वाऽदृष्टयदेन मर्मत्वाद्धर्मात्वाप्या धर्माधर्मयोर्दिवात्मपदेन नित्यज्ञानजातिवि
शेषाश्रयानामीश्वरसंसारिणोरुक्तत्वान्न विभागव्याघातोपीति वदति वेदस्यात्मपदीदिज्ञानादिमत्तिलक्षणयेतिरित्यस्य ईश्वरसंग्राहक राम
रित्यनेन सत्त्वचितः। इन्द्रियावृत्तिरघ्रिष्टातेतिम्लतासामभ्रम गाप्रदर्शनपरतया व्याचष्टे। इन्द्रियाणामिति। अत्रादिपदसंग्राह्यमाह २७

२

शरीरस्येति। परंपरया। जनकतासंबंधेना वच्छेदकतासंबंधेन च चेतत्यं। ज्ञानवत्त्वं। एतेनात्मनि प्रमाणमुपदर्शितं। अचेतनं चेतना
धिष्ठितं जनायकरोति। तिद्भासे॥ अयं सुरवी स्यादीत्यादिना। स्तनुजइत्यादिपरिग्रहः। नचात्मतानचन्न प्रत्यक्षस्य तिस्तत्र भाष्य विप्रोध
इति वाच्यः। आत्मतत्त्वनिवेकोपरात्माभिप्रायेण तत्र भाष्यपयोत्यारख्यानस्य प्रदर्शितत्वात् विप्रतिपन्नं प्रतीति। पार्थक्यतिरिक्तांति
प्रयत्वेन विप्रतिपत्त्रं प्रतीत्यर्थः। नैयायिकामतयथामुक्तात्मनां ज्ञानाभावेज्ञाननाद्यधिकरणत्वरूपचैतन्यं तथा ममापिमते शरीरस्य
चैतन्यमिति शरीरमेवात्मेतिवादी चार्वाकः। प्राकृते। ननु चैतन्यमिति ज्ञानादिकं ज्ञानाद्यधिकरणत्वंवा तदभावो ज्ञानाभावो न मृते
मृतशरीरे चैतन्याभावः। किंमिथ्या। तन्मते तु माणाविधि। इत्यत्ता वो विरह एव तत्र हेतुरित्यत आह। प्राणाभावेनेति। तथा मृता
घवात् प्राणाभावेत्यर्थः। प्रतीयते न तु ज्ञानाद्यभावे न ज्ञानाधिकरणत्व रूपचैतन्यस्याभावोपि च अधिकरणत्वस्य स्वरूपसंबंधत्वा
दित्याशयः। चार्वाकस्तत्परिहरति। वाल्पइति। शरीरापचयेन पूर्वशरीराभावेनानुभूतस्यापदार्थस्य स्मृतिर्न स्यादित्यर्थः। शरी
राणामिति। गोरवस्यफलमुखत्वेन दूषणांतरमाह। एवमितितत्र हेतुमाह। दृष्टेति। तद्धेतुत्वात। प्रवृत्तिहेतुत्वात्। तदानीं रतनपान
प्रवृत्त्य हृसितसर्वकाला। ननु प्रपन्यथानुपपत्तिस्तवापिसमानेत्याशंक्य स्वमते प्रवृत्त्यन्यथानुपपत्तिं परिहरति। तन्मते इति। अ
न्यदपीति। इष्टसाधनत्वादन्यदपीत्यर्थः। अत्र तु। स्तनपानप्रवृत्तस्य बुद्धालस्मरणात्तु। आत्मनो नित्यत्त्वमुपसंहरति। इत्यं चेति। प्रा
गभावस्यनपासंभवादाभावेति। ननु चक्षुरादीनामेव ज्ञानादिकं प्रतिकारणत्वं च। कारणत्वं चव्यापारवत्त्वे सति कारणत्वं। भवतीति
चक्षुरादेश्चक्षुः संयोगादिरूपव्यापारवत्त्वेनानुपपन्नानामवहितारव कालेह्यनित्वमिति। ननु फलोपहितत्वं जनकत्वं येन स्वराजकं गो

मु.टी. यद्येतेत्वदा कर्तृकरणयोस्तृतीयेत्यत्र विभक्तिस्तृतीयाछस्त्वात्त्यागादिनिष्ठकरणत्वादावतिप्रसंगात् ।प्रणत्वकारणत्वयोरवि
२८ वे।ध प्रसंगश्च।कर्तृत्वे च पचयपि क्रियानुकूलकृतिमत्त्वं न संभवत्यचेतने चक्षुरादौ।तथापि वह्निरणऽतिरिक्तस्यात्ततः कृत्यादी
नामीकासम्भवेत्तत्वस्य चानेगीकारणात्तदुक्तं। नत्वेकस्यैव कर्तृत्वे कारणत्वे कर्तृकरणादिव्यवहारानुभेदोऽनुपपन्न इत्यत
३८ विरोधइति।विरोधो विभिन्नाधिकरणवृत्तित्वात् तथा च कर्तृत्वकरणत्वादिलक्षणो यो धर्मभेदस्तत्कर्तृकरणादिव्यवहारभेदो
पद्धतिरित्याशयः।अत्रैतत्सम्भित्यत्र विशेष्यतयोपस्थितस्य भावस्यतच्छेदेन परामर्शासंभवात् द्वाच्चवेष्टा तथा त्वे चैतन्यमिति
त्रपधातपदस्यत्त्लोके अन्तयवनाधाएव प्रयोगादाह।नाप्राशति तिम्मन्नेऽपघातेकथं स्मृतिरित्युक्तं तत्रोपघातः कथमि
त्यरकं द्वापाः सत्वादाह।अर्थादिति। तथा चैकमेवं द्रियताणामिति पदमाकांक्षा वशादुभयत्र संबध्यत इत्याशयः।कथं
स्मरति रितिमन्त्रेवें द्रियाणां चैतन्यपक्षे स्मरत्यभाव प्रसंगादितस्तत्र हेतोरनुक्तेः समुलं हेतुमुपरयनर्थयाह।दृष्टं चानुषेति।न
न्विंद्रियांतरेणैव स्मरति भविष्यतीत्यत आह।अन्यस्येति।तत्र हेतुमाह।अनुभवेतिपद्धपि व्यधिकरणयोः कार्यकारणभा
वविरहात्समानाधिकरण्येनेत्यफक्तिर्विफला।तथापि त्रविषयतासंबंधेन स्मरति स्तत्र विषयतासंबंधेनानुभव इति।इत्या
विषयनिष्ठसामानाधिकरणापघटितोपि कार्यकारणभावात्राक्तनिष्ठसामानाधिकरणापघटितकार्यकारणभावेन
घटाद्यनुभवोत्तरं घटादौ विषयतासंबंधेन स्मरत्यापत्तेरगणनात्सम्बंधानानुगमस्यादोषत्वात्॥विषयतात्वेन सर्वासा राम
।विषयतानासंग्रहश्च।नकार्यतावच्छेदकादिप्रविशेष्यत्वप्रकारत्वादिभिर्न विनिगतना विरहादीति विनिगमनकत्वापिद्धत २७

या। विधो त्रिविधेति सुखच येयं। इन्द्रियाणां चैतन्यपत्ते यो दोषो दत्तः सोऽत्र कल्पे छेनास्तीति स्त्वच यितुं। नित्यस्येति। तत्र छोपस्थितत्वै
तन्यस्याप्युपाहितत्वेपि प्रथमां तत्पदनिर्दिष्टे सनसि नान्वय इत्यतो व्याचष्टे। नतथेति। अनध्यवहृत्वं। तदभावादिति। क्लृप्तेन क्लृप्तेन
मनसश्चैतन्यज्ञानादेरुत्पत्तत्वे क्लृप्तात्र हेतुं प्रदर्शयत्यर्थमाह। मनसश्चेति। तत्त्वस्येति। सुखादिप्रत्यक्षेत्यर्थः। नत्वमनसोऽ
प्युत्वमेव। सिद्धतत्त्वमाह। तथा चेति। अन्यं अवस्यत इति। अयोगं पधात् ज्ञानानां तस्याणुत्व मिष्यत इति ग्रन्थेन मनसोऽणुत्वं
साधयिष्यत इत्यर्थः। विज्ञानवादी शंकते। नान्विति। विज्ञानमेवेति। द्विविधं विज्ञानं प्रवृत्तिविज्ञानमालयविज्ञानं चेति। तत्र घ
टइत्यादि प्रवृत्तिविज्ञानं उपादानं मते। अहमित्याकारं तदस्यालयविज्ञानमेवात्म तस्य विज्ञानस्य क्षणिकत्वे कालान्तरे स्मरणं न स्यात् तस्य
नाश्रितं संस्कारस्याविनाशित्वमिस्याश्रयपरिगंधो वस्त्रसंक्रमति तथैव पूर्वपूर्वविज्ञानजन्यसंस्कारः उत्तरविज्ञानेपीत्यादि
विज्ञानवादिमतमपाकरोति। नेति। विज्ञानस्य जगत्विषयत्वयात्वित् चिद्विषयत्वं वा अभिप्रेतमिति विकल्पाद्ये दूषणमाह।
तस्येति। द्वितीये त्वाह। यत्किंचिदिति। आकारस्य विज्ञानातिरिक्तत्वे अनतिरिक्तत्वे वेति विकल्पाद्ये दूषणमाह। तर्हीति स्येति
। द्वितीये त्वाह। समूहालंबन इति। शंकते। अपोहरूपमिति। सिद्धे वा बुद्धिप्रकृतिस्पन्यथानुपपत्तेः तत्त्वानतिरिक्तत्व सिद्धावपि
नाधिक्य मिति नैयायिकाभीष्टमेव सिद्धमित्यत आह। स्फुमदिति ननु सामान्यालंबनवादमतमाह। ज्ञानमिति अनतिरिक्ता
पत्ते विवाद एव नास्तीति भावः। नातिरिच्यत इति। ज्ञाना स्वरूपत्वनाकार इति भावः। समूहालंबने नीलपीताविति समूहाल
लंबने अविशेषात्। अभेदात्। घटत्वादिना अभेदेपि नीलत्वादिना भिन्नं नीलाकारत्वं शंकते। अहेति। आरोपितेत्यर्थः।

मु॰टी॰ इतरथा। विरुद्धनीलादिज्ञानानां एकस्मिन्समवेते। कारणानुभूतं कार्येणास्मर्यत इति वासनासंक्रममपि दूषयति। नवेति। मातृपुत्रयो
२९ रिति। मात्रानुभूतस्य गर्भस्थेन तनयेन स्मरणप्रसंगात् इति भावः। उपादानेनानुभूतं उपादेयेन स्मर्यत इत्यपि निरस्यति। नवेति। शाक
ते। उत्तरस्मिन्निति। तदुत्पादकेति। वासनोत्पादकेत्यर्थः। चितामेवेति। ज्ञानानामेव संस्कारोत्पादकत्वे संस्कारानुत्पत्तिरित्यर्थः।
२९ इदमुपलक्षणं। प्रत्यभिज्ञानासंस्कारानुत्पत्त्या ज्ञानत्वेन संस्कारत्वेन कार्यकारणभावे मानाभावः। अत्र अतीन्द्रियस्य संस्कारस्य सं
गतेरत्नभ्यपगमाच्चेत्यपि द्रष्टव्यं। अत्र वदंति आलयविज्ञानसंतानो यस्तवानुभूयमानकादाचित्कोऽहंप्रत्ययरूपस्तदा तादृशो
धिकः सिद्ध एव प्रवृत्तिविज्ञानानां विषयाणां चेयत्वात्। अथ प्रवृत्तिविज्ञानसंतानादन्यः तदा तु भवविरोधः स्वतंत्रस्य संतान
स्यानानुभवात्। तवमते ज्ञानानां भेदात्। स एवाहमिदमभसं एवं चाहं स एव स्प्रक्ष्यामीत्यवाधितानुसंधानभवच्छिन्नस्यात्। न च ज्ञान
धर्मस्याभेदोऽभासते एकाकारस्य साक्षात्संबंधे व्यर्थोऽरिति तदिति वाच्यं प्रत्येतुरभेदेनानुमन्यतेन तद्धर्मस्येति प्रतीति विरोधात् इति।
प्रक्रांते। क्षणिकेति। अतिशयविशेषः शक्तिविशेषः उत्तरोत्तरज्ञानानुकूलत्वयेति शेषः गौरवादिति। स एवायं स्थिरस्यायामरप्र
त्यभिज्ञानात् क्षणिकानंतशक्तितत्प्रागभावतध्वंसकल्पने गौरवादित्यर्थः। अथ यदायत्तसामर्थ्यं तदा तत्कार्यं करोतीति व्याप्तेः
सामार्थ्यासामर्थ्यलक्षणविरुद्धधर्माध्यासात् दीत्रकुलस्थ बीजयोः तज्जनकवीज्ञानां भेदसिद्धावस्तात् क्षणभंगुरमेव विश्वे
मिति मतं आह। वीजादाविपीति। अनुपपत्तेः कार्यकारणोपपत्तेः। तथा च कुर्वद्रूपत्वे प्रमाणाभाव। तथा सेरप्रयोजकत्वमिति भा राम
वः। वेदांतीशंकते। अस्मिन् तर्हि इति। जीवात्मनां नानात्वसिद्धौ ईश्वरस्यानेकजीवात्मत्वासंभवादिति भावः। ईश्वरभेदः ईश्वर २९

जीवात्मनोरभेदः। सिध्यतीति शेषः। अन्यथा। ईश्वरस्य जीवात्मकत्वे। बंधमोक्षेति। कश्चित्संसारी कश्चिन्मुक्त इति व्यवस्थानुपपत्त्य
स्यादित्यर्थः। न पदाद्यवच्छेदेनेमुखदुःखादिवच्छरीरभेदेन। पितदुपपत्तिरिति वाच्यं। पदादीयसुखदुःखादेस्तत्संगात्चै
त्रानुभूतस्य चैत्रेण प्रसंगात् चैत्रशरीरावच्छिन्नात्मभूतस्य चैत्रशरीरावच्छिन्नस्मरतिहेतुतेति नो प्रसंग॥ ननु कथं तर्हि तत्त्वमसी
त्यादि जह्यच्छब्दप्रतिपाद्यब्रह्मणि युष्मच्छब्दप्रतिपाद्यजीवस्याभेदबोधकत्वमत आह तादात्म्योपीति। मोक्षकाले जीवात्मना ब्रह्मना ब्रह्मणा
सहाभेदकस्य घतत्वमिति मतं निरस्यति मोक्षेति। भेदस्यानित्यत्वमभ्युपेत्यापि मोक्षकाले जीवब्रह्मणोर्भेदं व्यवस्थापयति। भेदे
नाशेपीति। भेदसत्त्वे अकिंचित्करं निर्विवादमेवेत्यपि नाशत्वचितं। तवचेदानिनः तिर्धर्मिकइति। इदंच सत्यत्वाभावेपीत्यात्रहेतुतयो
क्तं। सत्यत्वं न ब्रह्मणो धर्मः। मिथ्यात्वाभावरूपसत्यत्वस्य ब्रह्मरूपत्वादभावस्य चाधिकरणात्मकत्वादित्यभिप्रायेणाशंकते।
मिथ्यात्वाभावइति। ननु कथं तेकत्वाधिकरणेऽपित्वतमत आह प्रत्येकमिति। अत एव। आगमस्य साम्यप्रतिपादकत्वादेव। नि
रंजनः निर्दुःखः परमं साम्यं। निर्दुःखत्वादिना साम्यं। एतावता प्रबंधेन तीवास्याभ्योतिरिक्तमीश्वरं प्रसाध्याधुना तस्य ज्ञाना
दिरूपत्वं निरस्यति। ईश्वरोपीति। ज्ञानपदस्य ज्ञानाश्रयत्वार्थकत्वे हेतुमाह। यः सर्वज्ञ इतीति। ब्रह्मणो ज्ञानास्वरूपत्वे यः
सर्वविदिति श्रुतिविरोधः स्यादिति भावः। अहं ज्ञानेन तत्त्वं ज्ञान। मित्यादिसार्वलौकिकानुभवादपि तज्ज्ञानरूपतेति तत्त्वम्। ईश्वरे
दुःखाभावमाह। आनंदोपीति। नन्वानंदो ब्रह्मेति श्रुतिस्तात्विकभगवति नित्यसुखमस्येवेत्यत आह। अस्तु वेति न सुखं तस्य सु
खं किंतु सुखवदित्यर्थः। सांख्यमतं दूषयति। एतेनेदी। इति मतमपास्तमित्यग्रिमेण न्वयः। प्रकृतिः। कर्त्रीति। विकारेत्विति शेषः।

यु.टी. विकारस्य शरीराद्याकारपरिणामः निर्लेपः। कर्तृत्वादिरहितः। पुरुषस्य कर्तृत्वाभावे हेतुमाह। कार्यकारणयोरिति।
३० तस्येति। पुरुषस्येत्यर्थः। ननु तादृशपुरुषसत्त्वे किं मानमित्याशंक्याह। बुद्धिगतेति। पुरुषाभावे बुद्धेश्चैतन्याभिमानो
न संभवतीति भावः। ननु पुरुषस्य निर्लेपत्वे संसारीति व्यपदेशः कथं स्यादित्यत आह। तत्सत्त्वेति। बुद्धिसत्त्वासत्त्वाभ्या
मित्यर्थः। ननु पुरुषस्य निर्लेपत्वे ज्ञानस्य किमधिकरणमत आह। तस्याश्चेति। बुद्धेरेवेत्यर्थः। कथं तर्हि कर्ताहमिति
बुद्धिरित्यत आह। पुरुष इति। अचेतनायां बुद्धौ मंदप्रभानेनेनिमित्तमाह। ममेदमिति। नन्विदमिति विषयोपरागे किंनि
मित्तं इत्याशंक्य न किंचित् किंतु तत्तद्विकार इत्याह। इदमिति। उपसंहरति। अंशत्रयं। मंदप्रभः इदमिति विषयोपरागः कर्तृत्व
मिति व्यापारावेशश्च। तत्परिणामेन। बुद्धिपरिणामेन। ननु पुरुषस्य निर्लेपत्वे सुखादयो धर्माः कस्येत्याशंक्याह। ज्ञा
नवदिति। कृतीति। सुखी करोमि दुःखी करोमीति इच्छावान् अहं करोमीति कृतिसामानाधिकरण्येन प्रतीतेरित्यर्थः। न
नु देहेन्द्रियान्वयत्वे चैतन्यस्यापि कुतो न स्वीक्रियते इत्याशंक्याह। न च बुद्धिरिति। परिणामित्वात्। सामानाधिकरण्येने
ति। कृतिसामानाधिकरण्येनेत्यर्थः। तद्भिन्नत्वे हस्तादेः दृष्टादीनां चैतन्यसमानाधिकरणभिन्नत्वे ज्ञानाश्रयत्वेन भवदभि
मता बुद्धिः किं नित्यानित्या वेति विकल्प्याद्ये स्वमते न दोषमाह। अन्यथेति त्वन्मत इत्यर्थः। मोक्षाभाव इति। एकविंश
ति दुःखध्वंसरूपो मोक्षो न स्यात्। एकविंशति दुःखान्तर्गतायाः बुद्धेः सत्त्वादित्यर्थः। यदा आत्मना बुद्ध्युपधानस्यैव संसार ३

त्वं इति तदीयमते मोक्षो न स्यादित्यर्थः । उत्पत्तिप्राक्काले नियामकाभावात् नियतत्वं च्युत्पत्त्यादिति । ये दोषा मा हा अनित्यत्वमिति । तत्सर्वं त्वु
च्युत्पत्तेः सर्वं । एवं न स्यादित्यसंसार प्रकृतेः साधारण्यात् तत्तु हेतोश्चैतन्यमुपपादयितुं पांकते । अचेतनायामिति ॥ तादात्म्यादभेदात् । अ
सिद्धेः । तादात्म्यस्यासंभवात् । प्रकृत्यादिकल्पने मानाभाववद्गुमाशंकते कर्त्रिरिति । वीतरागेति । गतेच्छेत्यर्थः । अनादित्वमिति । स्वेन भा
नेवात्मस्य प्रवृत्तिनिष्टसाधनताज्ञानमंतरेण तद्वनानुभवस्वरूपत्वाघातः स्मरणस्य च समानाधिकरणपूर्वानुभवसापेक्षतया
तत्पूर्वजन्मसत्त्वे ऽनादित्वमात्मन इति भावः । अनादेरित्यस्य भावस्येत्यादि । जन्यभावत्वेन च नाशहेतुत्वादिति भावः । न च प्रकृतेरिति
। भगवता आकाशेन समं पश्यन्हि सर्वत्र समवस्थितमीश्वरं । न हिनस्त्यात्मनात्मानं ततो याति परां गतिं इत्यनेन भूतमात्रे समत्वगुप्तत्वं त्वु
तस्वरूपेणावस्थितस्य सच्चिदानंदरूपस्य परमात्मनो दर्शनं मोक्षं जनतीयत्सु शुभाशुभकर्मकर्तृत्वेन वैषम्ये ऽप्यमाने कथमात्म
नः समत्वमित्याशंकायामात्मनो दर्शनं मोक्षं जनतीत्यसु केषु शुभाशुभकर्मकर्तृत्वेन वैषम्ये ऽप्यमाने कथमात्मनः समत्वमित्याशंकायां
प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः यः पश्यति तथात्मानमकर्तारं स पश्यति । स एव सम्यक् पश्यति नान्य इति समाहितं । अहं
कारविमूढात्मा कर्ताहमिति मन्यते इत्यादि स्मृतेरित्यर्थः । तदर्थत्वादिति । तथा च वस्तुत आत्मनो न कर्तृत्वं किं तु अहंकाराादिसंहितस्यैव तदर्थमस्य
र्थः । एतादृशार्थकरणे भगवत्संमतिमप्याह तत्रैवमिति । आत्मनः कर्तृत्वाभिमाननिवृत्त्यर्थं सर्वकर्महेतुपंचकारणत्वेनोक्तानि श्रीभ
गवता ॥ अधिष्ठानं तथा कर्ता करणं च पृथग्विधं । विविधाश्च पृथक् चेष्टा दैवं चैवात्र पंचमं ॥ १ ॥ शरीरवाङ्मनोभिर्यत्कर्म प्रार
भते नरः । न्याय्यं वा विपरीतं वा पंचैते तस्य हेतवः । तत्रैवं सति कर्तारमात्मानं केवलं तु यः । पश्यत्यकृतबुद्धि

मु॰ ३१ त्वोत्रसपक्षपातिदुर्मतिः। तस्यार्थः। अधिष्ठानं शरीरं कर्त्ता विज्ञ ड्यंयिरहंकारः। पृथग्विधं मनेकविधं। करणं चक्षुःश्रोत्रादिविविधा
स्वकार्यतः। स्वरूपतश्च पृथग्भूता चेष्टा प्राणापानादीनां व्यापाराः। अत्र एते एव पंचमं दैवं चतुराद्यनुयायि सकर्मादित्यादि सर्वप्रेर
कोंतर्यामीवा एतेषामेव सर्वकर्महेतुत्वमाह। शरीरेति। यथोक्तैः पंचभिः प्रारभ्यमाणं कर्म त्रिष्टिवांतर्याम्य शरीरं वा प्रज्ञो भिविदु
र्कौ शारीरं वाचिकं मानसं च त्रिविधं कर्मेति प्रसिद्धेः शरीरादिभिर्यद्यत्कर्म धर्म्यं वा अधर्म्यं वा करोति नरः तस्य सर्वस्य सर्वस्य कर्मणः
एते पंच हेतवः। ततः किमत आह। तत्रैवमिति। तत्र सर्वस्मिन् कर्तारं पक्षपाति शास्त्राचार्योपदेशाभ्यामसंस्कृतबुद्धित्वात् दुर्मतिः स्वसोम
पक्षपातीति। उपरिष्टात् अस्मादज्ञोपाये धर्माधर्माश्रयत्वे। अन्यथा विशेषगुणासंवदते तत्र हेतुमाह। अंसजानमिति। परकीय
ह्रस्वादेरनीडियत्वेन हेतुज्ञानासंभवात्स्वरूपासिद्धेराह। प्रवृत्तिरवेति उक्तप्रायत्वादिति। शरीरस्यनस्चेतन्यमित्यनेनोक्तत्वा। पे
त्यर्थः। इच्छादीनामभावस्य कंठरवेणानुक्तेः प्रायः पदं। चेष्टायाश्च प्रवृत्तिज्ञापकत्वे युक्तिमाह। चेष्टाया अपीति। चेष्टयेति परशरी
रे समवायेन चेष्टानुमितस्यावच्छेदकतया प्रयत्नस्य समवायेनो अन्निरव यपवाच्यात्स्याश्च आश्रयश्चात्मैवेति भावः। दृष्टांतासिद्धि
मांशंक्य निराकरोति। यद्यपीति। तथापीति। तस्याश्चस्तित्प्रासि योग्यक्रियाचत्वस्यैव हेतुत्वमिति भावः। आत्मनो मनोमात्रज्ञत्वपक्षा
नविषय चेहेतुमाह। रूपाद्यभावेनेति। विभुत्वमिति। त बम्हत्वे तरत्वं नतु परममहत्परिणवत्वं ईश्वरेपरिमाणाभावेनाव्या
प्तेः। यथा चेश्वरे परिमाणाभावस्तथोक्तं प्रागवलात्। कालाव्यात्मदिशां सर्वगतत्वं परमं महदित्यनेनात्मनि परममहत्त्वस्योक्तेः राम
योनत्र प्रयमात्रावयापहत्तचेति। [illegible] इति। [illegible] संवलादितं [illegible] नातया। धर्माधर्मगुणा एते त्वात्मानस्तावत्प्र ३१

स्यनेनसा धर्म्यप्रकरणाकथितातात्पर्यः॥ मूलेबुद्धिस्तु द्विविधा यता ऽनुभूतिः स्मृतिश्चस्यादिति। तत्रानुभूतिश्चप्रत्यक्षात्मिकैवेतिचार्वा
काः। अनुमितिरपीतिः कणादसुगतौ। उपमितिरपी तिकेचनन्यायैकदेशिनः अर्थापत्तिरपीतिप्राभाकराः अनुपलब्धिरपीतिभा
ट्टावेदांतिनश्च संभवैतिह्यरूपापीतिपौराणिकाः तत्सर्वं प्रत्युक्तमितिसूचयितुमनुभूतेश्चातुर्विध्यमाह। अनुभूतिश्चतुर्विधेति। अनु
मित्योपमित्योर्मिथ्यामूलत्वयामीतिभ्यो ऽनुमितिउपमितिशाब्दबोधात्मिकानांतिसृणां प्रमाणांस्वीकारेण चार्वाकोदितमप्युक्तमिति
भावः। अर्थापत्तेस्त्वनुमितावेवांतर्भावं चमूलकृदेवाग्रिमे किंग्रंथे कथयिष्यति। अनुपलब्धेस्त्वभावप्रत्यक्षेऽन्तर्भावः। विचारस्त्वमत्राव
सेयः। उद्दिष्टासु प्रमासु प्रमासु प्रथमोपस्थितत्वात्प्रत्यक्षं लक्षयति प्रत्यक्षलक्षणं। इंद्रियजन्यमिति। इंद्रियजन्यत्वमिंद्रियत्वपादावप्यस्य
तोज्ञानमिति। अनुमित्यादावतिव्याप्तिवारणायेंद्रियजन्यमिति। इंद्रियविशेषणेदत्तेपि। नत्विंद्रियजन्यत्वाभावादीश्वरप्रत्यक्षेऽव्याप्ति
रतआह॥ ईश्वरप्रत्यक्षं तु नित्यमिति॥ तथाचजन्यप्रत्यक्षमेवलक्ष्यमितिभावः नन्वतस्यैवलक्ष्यत्वेकिंमानमतआह॥ इंद्रियार्थेति। इंद्रियार्थ
संनिकर्षोत्पन्नंज्ञानमव्यपदेश्यपदव्यभिस्यनेनेश्वरज्ञानमनुमित्यादितव्याववर्त्यते। साक्षात्कारं विभजते। अव्यपदेश्यमिति। निर्विक
ल्पकमित्यर्थः। नवाच्यपदेश्यपदेन कथं निर्विकल्पकलाभ इतिवाच्यं। व्यपदेशः पदवाच्यत्वं तद्विषयकमित्यर्थात् विशिष्टज्ञानेत
त्तत्पदवाच्यत्वानुपनीतं भासत इति प्राचीनमतानुसारित्वात् अतएव कारणादपि कणादनामानमनुनिमित्यादितत्रोक्तंसंगच्छते यद्यप्य
देश्यःप्राक्प्रयोगः सचविशिष्टज्ञानादेवोपव्यपदेश्यत्वेनव्यपदेश्यानर्हत्वेन निर्विकल्पकलाभः अव्यभिचारित्वंप्रमात्वंप्रमात्वंतच्च
तत्त्वेप्रत्यक्षेऽन्वितं॥ एतावताजन्यप्रत्यक्षप्रमैवलक्ष्यमितिसूचितं। व्यवसायात्मकमिति। विशिष्टावसायात्मकमित्यर्थः। विशिष्टज्ञान

मु· ३२ त्मकत्रुमितिपावत् इति। तयैवोक्तत्वादिति॥ ईश्वरप्रत्यक्षं इत्येवोक्तत्वादित्यर्थः। ईश्वरप्रत्यक्षस्य लक्षणत्वमभिप्रेत्याह। अवच्चेति। ज्ञानाकर
णमिति। ज्ञानातन्यश्च तु तौ वाक्याप्तिविशिष्टज्ञानमात्रस्य विशेषणीभूतस्य ज्ञानस्य करणत्वमस्त्येवेति नानुमित्यादावतिव्याप्तिः। अक
रणत्वादेव चेश्वरज्ञानसंग्रहः। अथ निदिध्यासनद्वारा मननादिज्ञानकरणके योगिप्रत्यक्षे तल्लक्षणमिदमव्यापकमिति चेत्। न। ज्ञानाक
रणत्वापदे त्वेन त्वान त्वगर्भधर्मावच्छिन्नकरणकत्वाभावस्य विवक्षितत्वात्। न चैवं योगिप्रत्यक्षाव्यापकं स्मरणादिप्रतिपत्तौ ता
प्राप्तत्वादिनैव ज्ञानकत्वेन विशेषाभावस्त्वादिति। अथवा ज्ञानाकरणकत्वाव्यभिचारिजातिभिन्नधर्मवत् ज्ञानत्वमिह व
क्षितं। तादृशधर्मेण जातिरनुमितित्वादिरेवेति एतेनानुमित्यादावतिव्याप्तिज्ञानादेर्ज्ञानत्वेन करणतानपेक्ष ज्ञानत्वघटितकरणतावच्छेद
कधर्माप्रसिद्ध्याऽसंभवोऽपि प्रयुक्त इति। व्याप्तिज्ञानस्येति संबंधे न च तु इत्यस्य करणत्वादित्यनेनान्वयः। न च स्मरणात्मकपरामर्शा
स्थले व्याप्तिज्ञानस्य करणत्वासंभव इति वाच्यं तत्र व्याप्तिज्ञानस्य संस्कारद्वाराहेतुत्वात्। न च ज्ञानपदस्य सविषयकपरत्वमेवास्तां किं व्याप्ति
ज्ञानस्य संस्कारद्वारा तत्र हेतुत्वकथनेनेति वाच्यं इष्टापत्तेः संस्कारादनुमितेरनुदयात् विषयकत्वस्यातिप्रसक्तत्वात्। सादृश्यप्र
नस्य। सादृश्यप्रकारकज्ञानस्य तत्र अनुमित्यादौ। अनुमितिलक्षयति॥ परामर्शेति। परामर्शमिति विशिष्टपक्षधर्मताज्ञानत्वं तया च
व्याप्तिविशिष्टपक्षधर्मताज्ञानजन्यं ज्ञानमनुमितिरिति फलितं भवति। वह्निव्याप्यधूमवानयं पर्वत इति ज्ञानं व्याप्तिविशिष्टपक्षधर्मता
ज्ञानं तज्जन्यं पर्वतो वह्निमानिति ज्ञानं॥ इति व्युत्पत्तयस्तु पाश्चात्याः। व्याप्तिविशिष्टश्चासौ पक्षधर्मश्चेति कर्मधारयसमासः। एतद् राम
स्वभावप्रत्ययस्य च पदार्थतावच्छेदकद्वयसामानाधिकरण्यं वाच्यं तत्त्वाद्व्याप्तिविशिष्टत्वपक्षधर्मत्वोभयसामानाधिकरण्यावगाहि ३२

निरूपजन्यत्वमर्थो जन्यत्वांतभागस्य लभ्यते। अस्ति च पर्वतो वह्निमानित्याद्यनुमितौ। वह्निव्याप्यधूमवान्पर्वतः पक्षधर्मता व्या
प्तिविशिष्टत्वसमानाधिकरणोल्लेखाकारकतदुभयसामानाधिकरण्यावगाहिज्ञानजन्यत्वात्। निश्चयत्वनिवेशाद्वह्निव्याप्यधूम
वान्पर्वतः संदेहोत्पन्नानुव्यवसाये " अहरणरामणस्य घट किमन्यदेवान्न नातिन्याभिज्ञानपदाद्धूमलाधूमनिश्चय " निरूपितव्याप्ति
विशिष्टत्वपर्वतानुयोगिकसंयोगोभयसामानाधिकरण्यावगाहिनिश्चयत्वावच्छिन्नकारणतानिरूपितकार्यताश्रय तत्त्वमनुभव
त्वव्याप्यजातिमत्त्वरूपलक्षणत्वाभोलेन साध्याद्यननुगमादेकोयादानेऽव्याप्त्यनुमितावव्याप्तिर्निरस्ता इत्याहुस्तत्रानुमितौ
तादृशपरामर्शजन्यत्वनियमाभावाद्व्याप्तिविशिष्टत्वपक्षधर्मत्वोभयावगाहिनिश्चयत्वस्य कारणतावच्छेदकत्वासंभवेनासं
भवात्। न च समूहालंबनवैलक्षण्याय विशिष्टबुद्धौ विशेषणप्रतियोगिकविशेष्यानुयोगिकः संबंधसंबंधो विषयो वाच्यस्तथा
च धूमे व्याप्तिसंबंधानुयोगित्वपक्षधर्मतात्मकपक्षधर्मतात्मकपक्षसंबंधप्रतियोगित्वरूपतदुभयसामानाधिकरण्यं भासत एवेति वा
च्यं संबंधसंबंधाग्रहेपि समूहालंबनापेक्षया विशिष्टबुद्धेः प्रकारितयैव भेदात्। पक्षधर्मत्वमिश्रास्तु। व्याप्तिविशिष्टं च पक्षधर्मत्वमिति
दः तदुत्तरभावप्रत्ययस्य प्रत्येकं संबंधतया व्याप्तिविशिष्टत्वपक्षधर्मत्वोभयावगाहिज्ञानजन्यत्वमर्थो लभ्यते यदार्थयोरभेदे विपद
र्थतावच्छेदकभेदेनैव प्रमाणप्रमेयेत्यादिस्थलेऽन्यत्र वक्रुप्तोदर्शनात्। अथवा व्याप्तिविशिष्टं च तत्पक्षधर्मताज्ञानं चेति कर्मधारयः
व्याप्तिविशिष्टत्वं च प्रकारितासंबंधेन। पक्षधर्मताज्ञानं पक्षविशेष्यकसंबंधावगाहिज्ञानं तेन वह्निव्याप्यधूमः इत्यपर्वतहृत्ती
तिज्ञानजन्यनातिव्याप्तिः संबंधावगाहित्वे विषयतानिरूप्यकत्वाभावात् आरोपप्रकारकपक्षविशेष्यकसंबंधावगाहिज्ञानजन्यज्ञा

नमितिमुसदितार्थः। नन्विहासंभवः व्याप्तिप्रकारकपक्षसंबंधावगाहिनिश्चयत्वस्य वह्निव्याप्यधूमवानालोकवान्पर्वत इतिज्ञानेऽस्य
३२ त्तिप्रसक्तत्वेनानुमितिकारणतावच्छेदकत्वात्। नच व्याप्तिप्रकारपदेन व्याप्यवच्छिन्नप्रकारताकत्वं पक्षधर्मतापदेन पक्षविशेष्य
ताकत्वं विवक्षितं। अतो व्याप्यवच्छिन्नप्रकारतानिरूपितपक्षविशेष्यताकनिश्चयत्वावच्छिन्नजनकताप्रतियोगिजन्यताश्रयपक्षतावं
३३ त्वंपर्यवसितमिति वाच्यं तादृशकारणतावच्छेदकस्य वह्निसमानाधिकरणधूमवानितिज्ञानसाधारण्यात्। विशिष्टव्याप्तेः साध्यस
मानाधिकरणानतिरिक्तवृत्तित्वात्। नच विशिष्टव्याप्तेः पर्याप्तप्रकारतावच्छेदकतादृशनिश्चयत्वेन हेतुत्वं विवक्षितमिति वाच्यं ग्रंथ
नसमानाधिकरणत्वं तताभावप्रतियोगितानवच्छेदकं वह्नित्वावच्छिन्नं धनवानित्याकारकं धनपरामर्शव्याप्तेः इति चेन्न। हेतुताव
च्छेदकतातन्निरूपकं पदं तु निष्ठमवच्छेदकत्वं तन्निरूपिकं यदधिकरणनिष्ठमवच्छेदकत्वं तन्निरूपकं पदार्थेयत्वनिष्ठमवच्छे
दकं तन्निरूपकपदाभावान्निष्ठमवच्छेदकत्वं तन्निरूपकं यत्प्रतियोगितान्निष्ठमवच्छेदकत्वं तन्निरूपकं पदवच्छेदकतान्निष्ठमवच्छे
दकत्वं तन्निरूपकं पदभावान्निष्ठमवच्छेदकत्वं तन्निरूपकं यत्साध्यतावच्छेदकान्निष्ठमवच्छेदकत्वं तन्निरूपकं यत्साध्यनिष्ठ
मवच्छेदकत्वं तन्निरूपकं यदधिकरणनिष्ठमवच्छेदकत्वं तन्निरूपकं पदार्थेयत्वनिष्ठमवच्छेदकत्वं तन्निरूपिकाया हेतुतावच्छेदका
वच्छिन्ननिष्ठायाः प्रकारतायास्तन्निरूपितपक्षतावच्छेदकावच्छिन्नविशेष्यतावच्छेदकेनयोः प्रवेशः विशेषणविशेष्यभावे विनिगमना
विरहेण गुरुतरानंतकार्यकारणभावापत्तेः। एतेनानाहार्यत्वाप्रामाण्यज्ञानाभावयोराधिकयोरनुमितिहेतुतावच्छेदकप्रवेशादसं राम २
मवच्छेति प्रयुक्तमिति वदंति। यद्यपि परामर्शेऽपि परामर्शस्यानुव्यवसायविषयविधेययोर्हेतुत्वादिति भावः। नन्वनुव्यवसायेनानि ३२

व्याप्तिः। कथीतनिश्चयत्वेनाहेतुत्वात्। किंतु तद्व्याप्तित्वादिना यते हेतद्व्याप्तिमित्त्वयावद्धर्मो लौकिकत्वं तद्भेदविशिष्टलौकिकविष
यतासंबंधेन एतद्व्याप्तिप्रत्यक्षत्वादिनैतद्व्याप्तित्वादिना कार्यकारणभावः। कार्यतावच्छेदकसंबंधकोटौ लौकिकविषयताया
निवेशान्नातीतविषयकालौकिकप्रत्यक्षे व्यभिचारः। तथा च विशिष्टं तदवच्छेदे तद्व्याप्तिरूपादेर्व्यभिचारः। न च तादृशहेतुतायां
किमीनमितिवाच्यं अतीतस्य प्रत्यक्षापत्तेः। न च सन्निकर्षहेतुतयैवायातिचारणमितिवाच्यं। गुरुत्वादेः प्रत्यक्षापत्तेः। वह्निना विषया
तां विशिष्यहेतुत्वे गौरवादन्यतरातीन्द्रियघटितयुक्तत्वादेः प्रतिबंधकत्वमिति न। अमत्ते तु रातिप्रसंगवारणाय कार्यतात्वत आह। आदिना
वच्छेदकविधयाकथितनिश्चयजन्यस्मृतेः संग्रहः कदाचिदिति। धूमवान्पर्वतो वह्निमानित्यनुमितौ यत्तावच्छेदकविधया
धूमस्य भानादीतिभावः। तादृशेति। कथितनिश्चयजन्येत्यर्थः। अनुभवत्वव्याप्येति। अनुभवत्वन्यूनवृत्तित्वे तेन न सस्वाऽनुभवक
वैजात्यादायप्रत्यक्षादाव्याप्तिः। जातिमत्त्वं च समवायेन विवक्षितं। तेन कालिकसंबंधेन जातिमतिकालेऽतिव्याप्तिः। पक्षध
र्मतायाज्ञप्रवेशे मलाघवाल्लक्षणांतरमाह। अथ चेति। अत्रापि साध्यसाध्यतावच्छेदकधर्मसाध्यतावच्छेदकसंबंधहेतुहे
तुतावच्छेदकधर्महेतुतावच्छेदकसंबंधानामननुगमादेकव्याप्त्युपादानेऽन्यस्यामनुमितावव्याप्तेरेकव्याप्तिमुपादाय तज्ज्ञान
करणकत्वमनुभवत्वव्याप्यजातिमत्त्वविवक्षणीयम्। व्याप्तिज्ञानस्य कारणत्वं च समवायेन विनष्टादिभ्रमपदवस्त्वाङ्का। व्याप्ति
ज्ञानात्तवजन्यपरामर्शद्वारा स्मृत्यात्मकपरामर्शद्वारा चानुमितेः। किंतु स्वजन्यपरामर्शसंबंधेन। अत्र च स्वजन्यतासमवाय
घटितसामानाधिकरण्यप्रत्यासत्या विशेषणतावच्छेदकत्वमात्रकानिश्चयत्वव्याप्यजनकजातिनिरूपिता ग्राह्या। एतेन मैत्रा

मु. ३५ ते

नुमिति प्रतिचेत् व्याप्ति ज्ञानस्य करणत्वापत्तिः। मैवं परामर्शस्य कत्तलकसंबंधेनं चैत्र व्याप्ति ज्ञानजन्यत्वात् विशेष्यवचुद्धौ विशेषणज्ञा
नहेतुताव्याभावेन रजतमत्वैव शुक्तित्वपि प्रसक्तेः। अतएवेश्वरज्ञानस्य सर्वत्र ज्ञानत्वेन मनस्त्वेनैव हेतुत्वादसंभवमाशंक्याह्व
स्तुइति। घटेति व्याप्तिवारणाय सत्यंतं कालिकत्वसमवायेनाविवक्षितं। तेनानुमितौ कालिकेन घटत्वस्य सत्त्वेपि नातिव्याप्तिः। अ
नत्वमादाय प्रत्यक्षादावतिव्याप्तिवारणाय विशेष्यदलम्। ननु मनसः करणतापत्तेर्ज्ञानाकारणकमिति प्रत्यक्षलक्षणमनुमि
त्यादावतिव्याप्तेः। ततः प्रत्यक्षलक्षयति। एवमिति। प्रत्यक्षत्वादिकमिति। यत्किंचिदनुमितिव्यक्तिमादाय तद्वृत्तिनानुमित्यत्वसमवे
तजातिमत्वमुपमितित्वं। यत्किंचिच्छाब्दबोधव्यक्तिमादाय तद्वृत्तिसत्यसमवेतजातिमत्वे व्याप्तिज्ञानानुमित्योस्तत्तत्वे
नकार्यकारणभावमनुरुध्याह। वस्तुतस्तु इति ज्ञानत्वादेर्वारणाय यत्किंचिदुत्पन्नेति। प्रत्यक्षत्वादिकमिति।। शब्दादिनेत्यमिति
त्यपाद्वृत्त्यपरिग्रहः।। इतिश्री भारद्वाजवात्स्य भट्टात्मजमहादेवभट्टकृतौ मुक्तावलीप्रकाशस्य द्वितीयः परिच्छेदः।।
वपर्मिजिघ्रामि आस्वादे सुरभिमिष्टेणोमि मनसा सुरंवसा साक्षात्कारोमीति प्रतीतिसाक्षिकत्वाच्चाक्षुषत्वादिजातिभेदेन षट्विध
माह। घ्राणजमिति। उक्तमुदाहरति। इंद्रियार्थसन्निकर्षोत्पन्नमित्यादुपपदर्शितस्त्वेत्यर्थः। घ्राणस्यानिर्वचनकत्वादाह्याह इति।
सुरभित्यादिना। सुरभित्वपरिग्रहः। तद्वृत्तीति। गंधत्वस्त्रीत्यर्थः। ननु गंधग्राहित्वे तीव्रवंगध्वयोविकिप्रत्यक्षत्वं तत्राह। गं राम
धस्त्रयेति। उद्भूतमिति। उद्भूतप्रत्यक्षत्वमाह। ग्रीष्मेति। उष्मादाविन्यादिना चरणप्रविष्टतेजः परिग्रहः। नयनतापरिहर्तुमाह। ३५
रूपस्यादिवाम्यति। आलोकसंयोगेति। एतस्य चक्षुकारणत्वमधकारे चक्षुषापत्तिवारणाय उद्भूतरूपस्यतु पिशाचादिनाप्र

स्तत्वारणायेत्यवधेयं॥ तत्र। सर्वोत्केष्वुद्भूतरूपादिष्विमध्ये। तयोः उद्भूतरूपात्तोक संयोगयोः। शंकते। वादिरिंद्रियेति॥ आत्मग्राह्य इति आत्मन्यतिव्याप्तिवारणायान्त इति। प्राकारांतिव्याप्तिवारणाय प्राह्यमित्रोतिकात्तेतिन्वाप्तिवारणाय विशेषेति। शंकते। सत्यसे

ति। पुनः शंकते। अर्द्धेतिप्रतिवंधोऽनुस्यातिरुद्भूतेति। उपसंहरति। तस्मादिति। नन्वाद्योः प्रत्यक्षत्वेतमतसंख्यादियत्वे पिस्यादतआहधे

र्यासंख्ये ति। ज्ञानमात्रेत्वमनः संयोगस्यकारणतायां प्रमाणं एछति किंतत्रेति। इत्यादिवक्ष्यतीति। इच्छायाआदिरिति सुखस्या

ज्ञानमत्रविवक्षितं। तदतींद्रियत्वे। ज्ञानातींद्रियत्वे। ननुसुषुप्तिप्राक्कालोत्पन्नज्ञानस्यनिर्विकल्पकरूपत्वादेवातींद्रियत्वं भविष्य

तीत्यतआह सुषुप्तिप्राक्कालेति। ननुचसुखादिसामग्र्याः स्वाधीनादिप्रतिवंधकत्वादेवनतथेत्यतआह। यस्येति। सर्वोत्कृष्टत्वेति

प्रा०३ सुषुप्तिकालेत्वचेत्पद्वयो त्याद्युपदर्शितदर्शित्यर्थः। मनोग्राह्यत्वस्यसार्वत्रिकत्वादात्ममनोजन्येतिमनोमात्रजन्येत्यर्थः। स्मनंतांपरि

हरति। एवमिति। नन्वात्मनोग्राह्यत्वमस्तुकुतोमनो ऽमतआह संविदिति। निर्विकल्पकसद्भावे प्रमाणमादर्शयति। चक्षुः संयोगा

दिति। निर्विकल्पकस्यातींद्रियत्वमुपपादयति। तथाहीत्यादिनाआत्मादिवारणायेति आत्मादौयोतिव्याप्तिस्तद्दोषसंहा

रणायेत्यर्थः। सत्यतदानेच शब्दादितरेयद्भूतविशेषगुणाः सुखादयस्तद्धत्वा अश्वचज्ञानमात्रोपादानेतिव्याप्तिभ्रमवदीयज्ञानेति

व्याप्तिरतोजन्येति। जन्यज्ञानमिसुक्तेनिर्विकल्पकेतिप्रसक्तिरतः ज्ञानजन्यज्ञानेतितन्नसविकल्पकेमतमतः पक्षधर्मनेति पक्षधर्मना

ज्ञानानुव्यवसायेप्रसंगवारणायव्याप्तिप्रकारकेति। पक्षधर्मज्ञानगोपरियरामर्शेतिव्याप्तिः॥ आद्यज्ञानपदपरित्यागसंभवा ॥ प्र

द्वितीयज्ञानपदपरित्यागेसंस्कारेतिव्याप्तिः॥ परामर्शप्रत्यक्षस्यहेतुविषयकवात्तातिव्याप्तिरितिभावः वात्मनोतिव्याप्ति ३८

मु॰ णं। श्रोत्रेसत्वादिति। तथाचाव्याप्तिरिति भावः। उद्भूतेति। तिचक्षुरादावव्याप्तिवारणायोद्भूतपदंप्रत्यक्षपरमितिभावः। श्रोत्रेषण
३५ शेषपदात्तुपादानेप्राकृतरोयोयोगिप्रत्यक्षविषयीभूतोरूपादिस्तदाश्रयत्वाच्चक्षुरादेरसंभवःस्यात्तदर्थेवलासिद्धिविशेषण
देनप्रत्यक्षविशेषस्यलौकिकप्रत्यक्षस्यत्ताभान्नासंभवः उद्भूतपदस्ययथाश्रुतार्थिकात्वेतेनेवप्राद्धवारणेप्राकृतेरत्यस्यवैयर्थ्या
35 पत्तेः। उद्भूतत्वनजातिरित्यादिः क्वाचित्कः पाठस्तदातुमूलएवअन्ने विशेषपदक्षातं द्रव्यप्रत्यक्षमिति। द्रव्यवृत्तिलौकिकविषयतासं
बंधेनप्रत्यक्षइत्यर्थः। द्रव्यसमवेतेति द्रव्यसमवेतवृत्तिलौकिकविषयतासंबंधेनप्रत्यक्षेइत्यर्थः। एवमग्रेपीति। द्रव्यसमवेतसम
वेतसमवेतवृत्तिलौकिकविषयतासंबंधेनप्रत्यक्षेचक्षुरिंद्रियसंयुक्तसमवेतसमवायोहेतुरित्यर्थः। परंपरयास्वाश्रयसमवेतस
मवेतत्वसंबंधेन। इंद्रियसंबंधेति। यद्यपींद्रियसंयुक्तविशेषणतांद्रियसंयुक्तसमवेतविशेषणतेत्यादिक्रमेणवाकुल्पमेव
तथापिविशेषणतात्वेनैकरूपेणविभागः। नचैवंसमवायत्वेनचतुर्णामनुगमप्रसंगः परिभाषायाअपर्यनुयोज्यत्वात्। समवायो
नप्रत्यक्षइति। संबंधप्रत्यक्षेयावदाश्रयप्रत्यक्षस्यहेतुत्वादितिभावः। योग्यानुपलब्धेरभावप्रत्यक्षहेतुत्वेयुक्तिमाह। तथाहि
ति। घटादिज्ञाने। घटादिभ्रमे। नचघटभ्रमेहेतुदोषएवतत्प्रतिबंधकः। अन्यथाभ्रमोत्पत्तिकालेतदभावप्रत्यक्षापत्तेरितिवा
च्यं। विनष्टपदवस्थादौ यत्र भ्रमस्तत्रभ्रमोत्पत्तिकालेप्रतिबंधकीभूततदभावस्यकार्यसहवर्तितयाहेतोःसत्वात्दभाव राम
प्रत्यक्षापत्तेः। अभावोपलंभेः। तदिंद्रियजन्यवस्तुग्राहकस्वच्छिन्नतदभावप्रत्यक्षे। प्रतियोग्युपलंभाभावइति। तदिंद्रियजन्या ३५
नाहार्यतत्संसर्गकतत्प्रकारकोपलंभाभावइत्यर्थः। इंद्रियांतरजन्येअनुमानेकेचतदुपलंभेसत्यपितदभावप्रत्यक्षाद्वे

ङ्गि यजन्येति। अभावप्रत्यक्षहेतुप्रतियोग्यारोपसत्त्वेपि अभावप्रत्यक्षादनापत्तेरिति। आहार्यत्वं चोत्रेच्छाधीनत्वमिति वारोपहेतुतत्र दोषजन्य
त्वमपीति न दोषः। तत्राभावे। आपादितेति। तेन नञ्‌ तत्परमाएवादोषः पृथिवीत्वाभावादेः प्रत्यक्षं इति भावः। मणिकृन्मतानुसारेण योग्यतानिर्व
क्ति। साचेति। प्रसंजितआपादितः। अन्यतरार्थमुपपाद्य दृष्टांतयोजयति। तथा चेति। इष्टापादनाव्यभिचारेणाहेतुत्वात योग्यतावाच्या। सा च
तत्सत्त्वस्य तदुपलम्भव्याप्यत्वमेव न तु पतत्त्वमत्वमपि। अभावाधिकरणे प्रतियोगिसत्त्वात्। तत्र च भूतले प्रतियोगिसत्त्वं न तदुपलम्भव्याप्यंत
सत्त्वेपि कारणान्तरविरहेणातदुपलम्भाभावात्। किं त्वितरावच्छिन्नं तथा च मसत्त्वाद्यवच्छिन्नपृथिवीत्वस्याप्युपलम्भव्याप्यत्वाज्जलपरमा
णौ पृथिवीत्वाभावस्यापि प्रत्यक्षतावारणाय यदधिकरणे इति प्रतियोग्युपलम्भकातिरिक्तानवच्छिन्नं यत्सत्त्वं व्याप्यमिति वाच्यं महत्त्वादे
स्तदधिकरणवृत्तित्वाद्घटवदन्यभिन्नत्वाद्वा प्रतियोग्युपलम्भकातिरिक्तत्वात् तदवच्छिन्नपृथिवीत्वस्योपलम्भव्याप्यत्वेपि न क्षतिरिति
उदयनाचार्यास्तु प्रतियोगितद्व्याप्येतरयावत्तदुपलम्भकसमवधाने योग्यता। व्याप्यग्रहणेन प्रतियोगिग्रहसाधारणकारणविवक्षि
तंतच्च प्रतियोगिसन्निकर्षादि। एवं च प्रतियोगितत्सन्निकर्षविरहमात्रप्रयुक्तोयदधिकरणे यत्प्रकारकोपलम्भाभाव इति फलितं। जलप
रमाणौ तु महत्त्वविरहप्रयुक्तोपि पृथिवीत्वानुपलम्भ इति न तत्र तत्प्रत्यक्षमिति तात्पर्यमाहुः। एवमभावप्रत्यक्षे प्रतियोगिज्ञानम
पि कारणं न चैवं घटनिर्विकल्पकानन्तरं घटो नास्तीत्यभावप्रत्यक्षापत्तिः। प्रतियोगितावच्छेदकप्रकारकप्रतियोगिज्ञानस्य हेतुताक
ल्पनात्। शिरोमणिभट्टाचार्यास्तु। घटो नास्तीत्याकारिकायाः प्रतियोगिविशेषिताभावबुद्धेः घटत्वादिविशिष्टवैशिष्ट्यबोधरूप
त्वस्तत्र घटत्वादिप्रकारकज्ञानस्य विशेषणतावच्छेदकप्रकारकज्ञानविधया हेतुतायाः ज्ञा सत्त्वासाह्याकाराणां विरहेण च निर्विक

मु. ३६

त्वस्यानंतरं तस्या वृधाभाववोधानापत्तेरिस्पत्तंप्रतियोगितावच्छेदकप्रकारकज्ञानस्यस्वतंत्रहेतुत्तपेत्याकुः। अतिन दीनास्तत्साधारपत्येवत
स्यस्वतंत्रहेतुतां। किंचिकत्पकोत्तरं केवलं विशेष्ये विशेषणं तत्र च विशेषणं तदमिति रीत्या घटो नास्तीत्याकारकत्तौकिकप्रत्यक्षस्यप्रतियो
गिज्ञानजन्यकाले च प्रतियोगपमिमितस्यनेत्याकारकात्तौकिकप्रत्यक्षस्य च वारणाय अभावत्वप्रकारकत्तौकिकप्रत्यक्षे प्रतियोगितावच्छेद
कप्रकारकज्ञानस्य हेतुत्वात् तस्माच्च पूर्वकं च अभावत्वप्रकारकत्वानिविशेषादिदं तमइत्याकारकतेजोभावादिप्रत्यक्षेनव्यभिचारः। अयथ प्र
तियोगितावच्छेदकप्रकारकज्ञानस्यप्रतियोगितावच्छेदकप्रकारकज्ञानत्वेनसामान्यतोभीतुबुद्धिहेतुत्वे पटादिज्ञानादपि घटाभाव
प्रत्यक्षापत्तेरिति विशेष्य घटत्वादिप्रकारकज्ञानत्वेन हेतुता वाच्या एवं च वास्तव घटाभावविषयकप्रत्यक्षे तत्त्वं यदि घटत्वादिप्रकार
कज्ञानजन्यतावच्छेदकं तदा पदिमाणं नास्तीत्याकारकप्रत्यक्षे संख्यात्वादिप्रकारकतज्ज्ञानस्य व्यभिचारः। यदि तदभावप्रकारकप्र
त्यक्षप्रति तदभावप्रतियोगितावच्छेदकप्रकारकज्ञानत्वेनानुगमय्य संख्यात्वपरिमाणत्वादिप्रकारकज्ञानानां हेतुत्वं स्वीक्रियते तथा
पि परमाणुभावप्रतियोगितासंबंधेन घटादिप्रकारकज्ञानस्य व्यभिचारो दुर्वार एव। तदानीं घटत्वादिरूपप्रतियोगितावच्छेदकज्ञान
भावादिति तत्प्रतियोगितावच्छेदकप्रकारेण प्रतियोगिविशेषणकाभावबुद्धित्वमेव जनकप्रकारकज्ञानजन्यतावच्छेदकं वा
च्या एवं च प्रतियोगिज्ञानहेतुतामते विप्रतियोगिविषयकाभावबुद्धापत्तिर्दुर्वारैवातामेवं। घटत्वावच्छिन्नप्रकारताभिन्नप्रतियो
गितासंसर्गावच्छिन्नप्रकारत्वानिरूपिताभावविषयताशाल्यभावत्वप्रकारकाभावप्रत्यक्षत्वमेव घटत्वादिप्रकारकज्ञानजन्यताव
च्छेदकं। एवं च प्रतियोगिज्ञानजन्यकाले प्रतियोगविषयकस्याप्यभावलौकिकप्रत्यक्षस्यानापत्तिः संभवः। तस्याप्येतादृशाकार्यतावच्छे

राम ३६

दक्राक्रांतत्वात्। घटो नास्तीत्येतादृशज्ञानीयाभावविषयतायामपि घटत्वावच्छिन्नप्रकारताभिन्नाभावत्वत्वावच्छिन्नप्रकारतानिरूपि
तत्वात् तत्संग्रहः इति प्रतियोगितासंसर्गावच्छिन्नत्वं प्रतियोगिकोटौ निर्विशेषणस्य तत्त्वप्रसक्तानुप्रसक्त्या कृतत्वादिकं इत्यादिनापि प्रा
वादिसंमताभावपरिग्रहः। यथाश्रुते त्वनुपपत्तिं स्फुटयति। अत्रेयदीति। लौकिकः संबंध इति। तेनाणुत्वेन यत्किंचिदणुपक्षितौ संयोगा
दिलक्षणलौकिकसंनिकर्षाभावेपि चन्नसकलाणुगोचरमानसबोधानुपपत्तिः। अनित्यापाः गणाद्देः लक्षणसामान्यप्रत्यासत्तेः।
तदाहरणमहापत्रैव इति प्रत्यासन्निरिति। एतेन संशयत्वापादिनाप्रकारस्यापि घटत्वादेर्विशेषणतया स्वाश्रयकालादेः प्रत्यासत्ति
त्वं स्यादिति प्रसक्तम्। परंपरया प्रत्यासत्तेस्य घटत्वादेरेव प्रत्यासत्तित्वसंभवादाह। किं चेति। इदमुपलक्षणं। ज्ञायमानसामान्यस्य
प्रत्यासत्तित्वकल्पनागौरवीयत्वप्रवेशगौरवं चेत्यादि बोध्यं। ननु ज्ञानरूपसामग्री केतस्तस्याप्यभावमाह। आसत्त्यर्थ इति। तदसामान्यलक्षण
या ज्ञाने नोत्पत्तिसमये चक्षुःसंयोगादिकं इत्यादिना आलोकसंयोगदोषाभावादेः संग्रहः। एवं च सामान्यज्ञानहेतुतायां तादृशेन्द्रिय
जन्यत्वं न देयं। इन्द्रियभेदेन हेतुत्वाभेदापेक्षया तादृशेन घटत्वप्रकारकघटप्रत्यक्षे घटज्ञानत्वेनैव हेतुत्वात् विनिगमनाविरहा
च्च सकलं घटमानादिति। अन्यथानुपपत्तेरिति। संशयेऽगृहीतव्याप्तिकस्य एव धूमो विषय इति शंकामपनेतुं प्रागगृहीतधूमवह्निसंबंध
स्यगृहीतत्वादिदमुक्तं। सामान्यलक्षणया सौरभत्वसामान्यलक्षणया। सर्वं दैवेति। घ्राणाद्यभावेपीत्यर्थः। अनुमाखण्डस्योमानुमा
व्याप्तिं गम्यमानं इत्यादौ अनुमानपरत्वस्य दर्शनादाह। अनुमिताविति। करणे निर्दिष्ट एव व्यापारकं ज्ञातस्योक्तलयव्याहृति
तमपि करणमादायैवाह। अनुमितिज्ञानकरणमिति। स्वानुमितिकारणताम् आह। तथाहीत्यादिना। तदेवानुमितावित्यपि तेन नाभिधेयं

मु॰
३७
37

धूमवत्त्वे व्याप्तिरेवासिद्धा गोपालघटिकायां व्यभिचारादित्याशयेनाह। अनवच्छिन्नमूलत्वमिति। तथा चाव्याप्यो ऽयं चतुःषष्टिविशेष
णविशिष्टस्य धूमो वह्निव्याप्यस्तादृशस्य च गोपालघटिकायामिति न व्यभिचार इति भावः। ननु अस्तानसादावुत्पन्नस्य व्याप्तिज्ञान
स्य द्वितीयधूमदर्शनेनोद्बुद्धत्वात्स्वार्थलिंगपरामर्शः स्यादित्याशयेनाह। तदनंतरमिति। धूमदर्शनानंतरमित्यर्थः तथा च व्याप्तिस्म
रणस्य विलंबाभावाल्लिंगपरामर्शः स्यादेवेति भावः। तस्येत्यस्योद्बुद्धसंस्कारस्येत्यादिः। तदनंतरं। परामर्शानंतरं। अनुमितौ पर
मर्शो न हेतुरपि तु लिंगपरामर्शस्तथा च विशिष्टस्य कारणतया कारणविशेषणस्यापि हेतुतापत्तिः। एवं च परामृश्यमानलिंग
स्य लिंगपरामर्शस्य वा हेतुत्वे तत्र विनिगमनाविरहादुभयोः कारणतासिद्धौ तत्र च व्यापाराभावान्न परामर्शस्य तेति लिंगस्यैव कर
णतेति वदताचार्याणां मतमाह। अत्रेत्यादिना। लिंगस्य तदानीमिति। धूमध्वंसादेर्लिंगस्य सत्त्वात्कथं व्यभिचार इति। वाच्यं तादृशासं
बंधस्य हेतुतावच्छेदकसंबंधत्वे स्मरणत्वप्रयोगेण असतीति बाधके विशेषणस्यापि हेतुतां गृह्णातीति नियमे इदमुपलक्षणमिय
त्वादिना दिनातादप्यनुमित्यापत्तेः। इत्यपि द्रष्टव्यं वह्निव्याप्यधूमवान्पर्वत इत्येवमाकारकज्ञानविषयत्वोऽमात्राज्ञानत्वेन
वहेतुत्वात्। न च वह्निव्याप्यधूमवान्पर्वत इति ज्ञाने प्रमेयवान्पर्वत इति ज्ञानव्यावृत्तो विशेषोऽनुभवसिद्धः तथा वैतादृशविषय
ताविशेषसंबंधेन ज्ञानविशिष्टविषयस्य हेतुत्वमिति वाच्यं कालांतरीयपरामर्शविषयादपि लिंगादनुमितिप्रसंगात्। कारणतावच्छे
दकेन यदा कदाचिदाक्रांतस्य वृत्तिकारणस्य कार्योत्पत्तिनियामकत्वान्नतु तद्विशिष्टसत्त्वस्य गौरवात्। अनुमित्युपधेयपरामर्शविशि राम
ष्टसत्त्वस्य प्रयोजकत्वाभिधानेन परामर्शसत्त्वेन [illegible] विशिष्टसत्त्वविशेषणसत्त्वस्यावश्यकत्वात्परामर्शस्यैव हेतुत्वं तत्र च ३७

नातिप्रसंगः प्रांकापि। नचैवसंयुक्तेंद्रियहेतुत्वे यदा कथंचिद्विषयसंयुक्तेंद्रियादपि कार्यायत्यातत्संयोगमविशिष्टं इंद्रियस्य हेतुत्वे वक्तव्यो तत्।
घवादावव्यापकत्वात् — — — इंद्रियसंयोगसत्वेपि यदा तु यज्ज्ञानानुदयात्स्वतज्ज्ञानान्वयव्यतिरेकाभ्यां चक्षुरादीनामपि कारणत्वविधा
रणात् व्यापारेण व्यापारिणोन्यथासिद्धेश्च। किंच। चैत्रेण परामृश्यमाणाल्लिंगादपरामृष्यतोपि मैत्रस्यानुमित्यापत्तिः। तस्मात्स्वी
यानुमितिप्रति तत्पुरुषपरामृश्यमाणलिंगत्वेन हेतुत्वे चानंतकार्यकारणभावप्रसंगः॥ यथा चैत्रीयज्ञानस्य कृतौ चैत्रीयायाः सुखे च
मैत्रस्य दुःखे वा धूमस्य स्मरणे निर्णयस्य स्मरणे तु निर्णयस्य तद्विशिष्टज्ञाने विशेषणज्ञानस्य प्राग्घटबोधे पदार्थज्ञानस्य हेतुत्वे सामानाधिक
रण्यप्रत्यासत्तिर्न तु पि तत्पुरुषीयत्वमवच्छेदकं तथानुमितौ परामर्शस्य हेतुत्वे सामानाधिकरण्यप्रत्यासत्तिरिति नातिप्रसंगः प्रांकायी
ति प्यखेत्वं व्यापाराभावान्न परामर्शस्य कारणत्वमिति तद्वयैव किंतु ज्ञानं कारणं परामर्शो व्यापारः न चैतच्च लिंगपरामर्श इति चिंतामणिवि
रोधः इति वाच्यं। तत्कृत्यस्यान्यार्थकत्वात्। तथाहि। लिंगपरामर्श इति। लिंगव्याप्तिविशिष्टं व्याप्तिरिति व्यावृत्तं तस्य परामर्शो ज्ञानं व्याप्ति
ज्ञानमिति समुदितार्थ इति। यत्तु रत्नमिश्राः परामर्शजनकत्वेन व्याप्तिसिद्धघटकतत्पदार्थज्ञानानां वा कारणत्वमिति। तन्न। स्वरूपप्रतिसर्वत्र हेति
त्वेन हेत्वेवतया व्यवच्छेदेनान्यथासिद्धत्वात्। न चैत्रपाकानुगुणमन्यप्रतीतिवाच्यं गौरवात्। न चैवं भ्रमिजनकतावच्छेदकत्वम
पि दंडे घटजनकतावच्छेदकं न स्यात्। इष्टत्वात् दंडत्वेनैव तथात्वात् क्वचित् दंडाद्घटानुत्पादे भ्रमिरूपव्यापारविरहात्। तद्वक्तव्ये भ्रमिजन
नसमर्थ्यात् महाचक्रसमवहितात् दंडादनुत्पन्नत्वात् तस्य प्रयोजकतायामव्यापकत्वात्। उपाधायकतासंबंधेन भ्रमिविशिष्टत्वेन जनकत्वे च
क्रादीनामपि प्रयोजकारणतावित्तायापत्तिः। नस्याच्च घटार्थितया निष्कंपचक्रे प्रथमं भ्रमेरुपाधानानिर्णयादिति कृपक्षा विशेषणेकत्व

सि॰ मितौ पक्षविशेषणकः परामर्शः पक्षविशेष्यानुमितौ च पक्षविशेष्यकः सर्वैरनुमितिरभिव्याप्तिमनमाह। तत्र व्याप्येत्यादिना पक्षः साध्य
२८ वानित्यतेन। अयमभिप्रायः। यत्र साध्यव्याप्यत्वापेक्षया पक्षतावच्छेदकं लघु यथा पर्वतो वह्निमान् धूमादित्यादौ तत्र व्याप्यविशिष्टपक्षक एव प
रामर्शो हेतुर्न तु पक्षविशेष्यकः तत्र वह्निव्याप्यधूमवान् पर्वत इत्यादि पक्षविशेष्यकपरामर्शस्य हेतुत्वे ज्ञानत्ववह्निव्याप्यप्रकारकज्ञान
38 त्वादिविशिष्टधर्मिकवह्निव्याप्याभाववद्विशेष्यकवह्निव्याप्यप्रकारकत्वादिरूपाप्रामाण्यग्रहाभावस्य कारणतावच्छेदकस्य घटकत्वा
वश्यकतया महत्त्वेन गौरवापत्तेः। यत्र तु साध्यव्याप्यत्वापेक्षया पक्षतावच्छेदकं गुरु तत्र पक्षविशेष्यक एव परामर्शो हेतुर्यथा वह्निव्या
प्यालोकवत्सर्वो पर्वतो वह्निमानित्यादौ यत्र च साध्यव्याप्यत्वपक्षतावच्छेदकं समशरीरं तत्र तु पक्षविशेष्यकः पक्षविशेषणक
श्चाविनिगमनाविरहात् हेतुरिति। पक्षविशेष्यकत्वमेव सर्वत्रानुमितौ नियतमिति नवीनमतेनाह। द्विविधादपीति। द्विविधयोरपि पराम
र्शयोः स्वान्यवहितोत्तरानुमितित्वावच्छिन्नं प्रति तादृप्येण हेतुत्वं ह्यं। वस्तुतोऽनुभवबोधान्पक्षविशेष्यकपरामर्शस्यैव हेतुत्वं। अत एव
च वह्निव्याप्यधूमानाम्नायमित्याकारकः पक्षविशेष्यक एवोपनयः सर्वसंमत इति ध्येयं। मीमांसकाः शंकते। द्वित्वमविवदितं तथा वह्नैक
ज्ञानादप्यनुमितेरुपपत्तेः आवश्यकत्वादिति। परामर्शहेतुत्ववादिना नैयायिकेनापि ह्यनुमितेः सर्वव्याप्यतावच्छेदकधूमत्वादिरूपेण
व्याप्तिपक्षधर्मतयोर्ज्ञानमवश्यमंगीकर्तव्यं। तथा चातिरिक्तस्य वह्निव्याप्यधूमवानिति विशिष्टज्ञानस्य परस्परं तत्र वान्यथासिद्धत्वमिति यत
सर्ववृत्तित्वयोग्यकल्पनापेक्षयोभयवादिसिद्धनियतपूर्ववर्तिनोर्द्वयोरेव ज्ञानयोर्हेतुत्वकल्पनालाघवादिति भावः। गौरवात्कल्प राम
नागौरवात् व्याप्यतावच्छेदकेति। अपमातो कोऽधूमो वेति संदेहदशायां व्याप्यतावच्छेदकनिर्णयाभावेपीत्यर्थः। वह्निव्याप्यवानिति तिवस २८

भावव दष्टत्रिमानितीत्यर्थः। ननु धूमसमानाधिकरणोत्या दिरूपव्याप्तिविशिष्टवद्दत्रिमानितीत्यर्थस्तत्र हेतुतावच्छेदकभानं नैयत्पात्। म
नुपपत्तवत्तादेव व्याप्यतावच्छेदकप्रकारकज्ञानकल्पनीयं तत्राह तत्ताद्यवगाहेति। तद्यत्वावच्छेदकत्वविषयकज्ञानस्य हेतुतया कारणत्वा
भावाल्लनायाध्यनकापत्तादिति भावः। ननुभयत्ववच्छेदकत्ताद्यवकल्पनात्ताद्यवमेवम मीमांसकानांमस्तत्भविप्रतिपत्तत्राह। किंचेति
एकरूपेण कारणात्वमाभावयनिराकृतेनचेति। अत्र वक्यस्पवर्जमानताया अभिहितत्वान्नकालौतदीयताह प्रागरस्मादायदोषं त
दानंतेति। नन्वपायेछावृतिहेतुसाध्यनताज्ञानत्वेन हेतुत्वं एवं च ... विष्टयत्वं तत्र च तत्र तत्सुक्तं श्रीयेत्वादिप्रवेशेन कार्यकारणभावद्वा
कुत्वंयया नैयायिकेन स्वीक्रियते तथा मयात्रापीति चेन्न। तत्फलेच्छायाः तत्फलतसाधनताज्ञानस्य च सामानाधिकरण्यप्रत्यासत्त्यैव हेतुत्वे
तुमहावात्। तदाकार्यकारणभावद्वयमिति। ननु स्वीयव्याप्तिप्रकारज्ञानिरूपितविशेष्यतावच्छेदकधर्मावच्छिन्नप्रकारताकत्वस्य सामाना
धिकरण्योभयसंबंधेन व्याप्तिज्ञानविशिष्टपक्षधर्मताज्ञानत्वेन हेतुत्वे शैतु न पृथक्कार्यकारणभावद्वयमिति चेन्न तथापि हेतुतावच्छेदकाभे
देन कारणतावाकुत्वं मीमांसकमते दुर्वारमेव। नैयायिकमते तु तावच्छेदकमानिवेशः पक्षसाध्यव्याप्यतावच्छिन्नप्रकारकत्वेनैव हेमालोकादि
लिंगकपरामर्शानां हेतुताकल्पनत इतिनतद्भेदेन कारणतावाकुत्वं पन्नतु नाप्तिप्रकारकपक्षधर्मताज्ञानत्वेन पक्षधर्मताज्ञानत्वेन पक्षधर्म
ताविषयकव्याप्तिप्रकारकज्ञानत्वेन वा हेतुत्वे तस्यद्वयोर्विनिगमनाविरहेण हेतुताद्वयं तत्र वा ... तत्राह व्याप्तिन्याप्यत इति तथा च न्यायनये हे
तुताद्वयं मीवारेपि व्याप्यत्वावच्छिन्नप्रकारकज्ञानस्य हेतुत्वागीकारात्त्राकौ...सिद्धायतिति भावः। ननु यत्रानुमितेः पूर्वं ज्ञानद्वयमेवासी
न्नतु विशिष्टज्ञानं तत्र का गतिरित्यत आह। इष्यचेति। तथा च कारणत्वानाकं कार्यमेव प्रमाणं इत्याशयः। व्याप्तिज्ञानं विना व्याप्यज्ञानं नस

मुं० ३९ भवतीति व्याप्तिलक्षणं प्रकृति। व्याप्योनामेत्यादिना तत्र व्याप्ये समव्याप्ये वृत्तित्वं तथा च व्याप्यनिष्ठा व्याप्तिः का किं स्वरूपेत्यर्थः। वह्निर्यावान्ध्व
मादित्यादौ साध्यवदन्यास्मिन् इत्यादौ स्वाश्रयसंयोगादिना धूमादेः संबंधेनाव्याप्तेर्व्याप्तिः साध्यवदन्यास्मिन् संबंधेन इति स्वलक्षणं सा
तमात्रमाह। वह्निमानिति। तथा च प्रकृतस्थसंबंधेपदस्य वृत्तित्वपरत्वमिति भावः। पक्षमाणव्याप्तेराह। अत्रेति। तेनैव हेतुतावच्छेदक
मिति। अथ वेति। अथ वेतिलक्षणस्यावतारणिकामाह। नन्विति कालान्यः कालिकेन घटादित्यत्रातथाप्यतिव्याप्तिः साध्यवह्निन्नेमस्या
कालेकालिकसंबंधेन वृत्तिमत्त्वात्रननु केवलान्वयिलक्षणकालेसर्वत्रैव च यन्नानुमितिः व्याप्तिज्ञानरूपकारणाभावादित्यतः किंचेति
जातेरित्यादावित्यादिना गुणवान् घटादित्यादेः संग्रहः नन्वस्वाधिकरणावृत्तिसाध्यवदन्योन्याभावस्य कालिकसंबंधेन वृत्तेर्विरोधि
तानियामकदेशिकविशेषणतावच्छेदेन वृत्तित्वस्याप्रसिद्धाव्यापकत्वजात्यभाववान् सत्ताभावादित्यादावव्याप्तेः सत्ताभावाधि
करणविरोधिता नियामकसमवायेन वृत्तेरप्रसिद्धेः विशिष्टसत्ताभाववान् द्रव्यत्वाभावादित्यत्राव्याप्तेः भेदत्वाभावकत्वे त्वाभावयो
रन्यतरत्वेनाभावे साध्यत्वेऽसत्त्वेनेतिव्याप्तेश्च। साध्याभाववदन्योन्याभावस्यानुवृत्तिताभावात्मकस्य स्वाधिकरणवृत्तित्वात्। हेतुसन्निवेशे वि
रहोऽयस्येति चक्रवत्। स्वप्नमानिरासायाह। हेतुमतीति। भवति चेदं वह्निमान् धूमादित्यत्र धूमाधिकरणवृत्तिघटाभावप्रतियोगि वह्नि
सामानाधिकरण्यस्य धूमे सत्त्वात्। एवं चाव्याप्तैतव्यादित्यादौ तादृशविषयेऽदृष्टमवान् पक्षेरित्यत्रातिव्याप्तेर्हेतौ। वह्निमन्निष्ठधूमाभावप्रतियो
गित्वाद्धूमस्य प्रत्यक्षमात्मत्वादित्यादौ गुणादिवृत्तित्वाभावप्रतियोगित्वादव्याप्त्वस्या व्याप्तिवारणाय हेतुमन्निष्ठेति। हेतुसंबंधि राम
वृत्तीत्यर्थः। तेन संयोगेन वह्निसाध्यकतादात्म्येन धूमे भवतीति हेतौ नाव्याप्तिः। वह्निमान् धूमादित्यत्र सर्वत्रैव वह्नीनां चालनी ३९

पृ=[illegible]

यन्मायेन हेतुसमानाधिकरणाभावप्रतियोगित्वेपि व्यधिकरणधर्मावच्छिन्नवह्निसामानाधिकरण्याभावेन समानाधि
करणयोरेव व्याप्त्यंगीकारादव्याप्तिर्न्नदोष इति मन्वानं प्रत्याह नन्वेति। करद्वित्वावच्छिन्नप्रतियोगिताकभावमादाय व्याप्तिर्न
त्वधिकरणपर्वतादिहृदिमहानसीयमहानसीयवह्न्युभयाभावप्रतियोगित्वान्महानसीयवह्न्यादेः उभयोः प्रतियोगित्वे
एकस्य सुतरां प्रतियोगित्वादित्याह। तदन्तरमपीति। प्रतीतिरन्त्रेद्वित्वावच्छिन्नप्रतियोगिताकाभावेमानमाह। एकसत्त्वेपीति। द्वि
त्वभावप्रतियोगिनो विरोधात्कथमेकसत्त्वे द्वित्वावच्छिन्नप्रतियोगिताकाभावं शोऽदि। नन्वप्रतियोगितावच्छेदकभेदेनाभावभेदा
दि द्वित्वावच्छिन्नप्रतियोगिताकाभावः सिध्यतीति वाच्यं। तथापि तदुभयाभावप्रतिद्वित्वावच्छिन्नप्रतियोगिताकाभावस्यासिद्धावपि एक
सत्त्वेपि एकसत्त्वे तस्यासिद्धेः प्रतियोगिनो विरोधिनः सत्त्वात्। नन्वप्रतियोगितावच्छेदकावच्छिन्नस्याभावविरोधित्वादेकसत्त्वेपि
तदुभयाभावेनाविरुद्ध इति वाच्यं। तौ च वा प्रतियोगित्वेनैव विरोधात्। न च पर्वतीयवह्न्यादिमति ज्ञायमानायाः तादृशोभयाभा
वप्रतीतेः का गतिरिति वाच्यं। तस्याः पर्वतीयवह्न्यभावादिविषयकत्वेनैवोपपत्तेरित्यत आह पुरुषाणां चेति। सर्वेषामेव गुणा
२।।×४ संपादनीयन्यायेन प्रत्यक्षसाक्षिकत्वस्य भावप्रतियोगित्वादिति भावः। तोरे कथमिति तत्पाप्ये हेतो साध्याधिकरणे साध्यव्याप्तिरेतयोरेव
व्याप्तिरिति पत्र वक्ष्य प्राकृतमिति हेतौ वाच्या व्याप्तिरितितदर्थः। असंभवस्त्वे तद्रूपवानेत्र साध्यादिसाधावेतद् साध्याधिकरणवृत्त्यभावप्र
७।×२ तियोगित्वादेतद्रूपादेर्लक्षणगमनेन नोपन्यस्तः। वह्निमान् धूमादित्यत्र तत्र हेतु भावमादाय सर्वत्र हेतुक्रमव्याप्तिं वारयतीति
व्याप्तीति। तथा च वह्निमान् धूमादित्यत्र हेतु [illegible] [illegible] नचादि प्रतियोगितावच्छेदकमहानसीयवह्नि

मु॰ ४० त्वादिभिन्नसाध्यतावच्छेदकवह्नित्वावच्छिन्नवह्निसामानाधिकरण्यस्य धूमे सत्त्वान्नाव्याप्तिरिति भावः। एवं गुणवान् द्रव्यत्वा
दित्यत्राप्यव्याप्तिनिरासोऽदृष्टव्यः। परंपरासंबंधस्य। स्वाश्रयसमवायवत्त्वः। रूपत्वव्याप्यजातित्वावच्छिन्नप्रतियोगिताकाभाव
स्यपृथिव्यमवृत्तिवृत्तित्वेयुक्तिमाह। रूपत्वव्याप्येति नव्यानामतमाह॥ साध्यादिभेदेनेति। तेन हेतुपदस्य हेतुतावच्छेदकविशि
ष्टपरत्वेन। इह हेतुतावच्छेदकं विवक्षानकार्या। तदावरणीयायां विशिष्टहेतुकव्याप्तौ हेतुतावच्छेदकं संबंधं विवक्षयैव वा
रणात्। तथाहि विशिष्टहेतौ हेतुतावच्छेदकः संबंधः किं समवायादिः उत विशिष्टनिरूपिताधिकरणता। उभयातिरिक्तो वा
नाद्य। विशिष्टस्यानतिरेकेण सत्तासमवायस्य गुणेऽपि सत्त्वेन व्यभिचारापत्तेः। न च विशिष्टस्यानतिरेकेऽप्युभयात्मकविशि
ष्टनिरूपितत्वविशिष्टसमवायो हेतुतावच्छेदकसंबंध इति वाच्यं। विशिष्टानतिरेकेण सत्तासमवायात्मकस्यापि तस्य गुणे स
त्त्वात् हेतुतावच्छेदकविवक्षायावैयर्थ्यापत्तेश्च। न तृतीयः समवायाद्यतिरिक्तसत्तासंबंधे प्रमाणाभावात्। तस्मात् द्वितीयकल्पा
य हेतुतावच्छेदकसंबंधस्वाश्रयणीयस्तत्र च हेतुतावच्छेदकाविवक्षायां विशिष्टनिरूपिताधीरतासंबंधेन संबंधित्वस्य गुणे
भावेनाव्याप्त्यभावात्। न चैवं समवायस्यैकत्वेन पृथिवीत्वयत्समवायस्य गुणेऽपि सत्त्वेन गुणस्यापि पृथिवीत्वसमवायितयाव्य
भिचारायत्त्वात् द्रव्यपृथिवीत्वादिस्थले समवायो हेतुतावच्छेदकसंबंधो न स्यादिति वाच्यं। पृथिवीत्वनिरूपितसमवायसंबंधा
वच्छिन्नाधारतायाएव हेतुतावच्छेदकसंबंधत्वेनेष्टत्वात्। न चैवं समवायस्य हेतुतावच्छेदकत्वमेव क्वापि न स्यादिति वाच्यं जा राम
तिमत्सत्त्वादिस्थले च समवायस्यैव संबंधत्वात्। हेतुतावच्छेदकसंबंधेनेत्यस्य प्रलयमाह। तेनेति। साध्यतावच्छेदकसंबंध ४०

निर्मरोऽनुवह्निसंयोगवान् धूमादित्यादावव्याप्तिः। साध्यतावच्छेदकसमवायसंबंधेन धूमाधिकरणे धूमाभाववति धूमसंयोगस्यासत्वा
त्। अभावः प्रतिः। वक्तव्यः। प्रतियोगिवैयधिकरण्यविवक्षायाः फलमाह। नेनेति। अभावविशेषणीभूते प्रतियोगिवैयधिकरण्ये प्र
तियोग्यनधिकरणस्थत्वरूपं निवेश्य धूमसंयोगप्रतियोग्यधिकरणावृत्तित्वस्य संपन्नविधिमुखं चेति द्विकल्प्याद्ये दूषणमाह। पदेति। यत्स्यै
वेति। नेन प्रतियोगिव्यधिकरणपदद्वैयर्थ्यमपीति सूचितं। तस्यैवेति। गुणादिवृत्तिसंयोगाभावस्यैव यथोः अधिकरणभेदेनाभावभे
दानभ्युपगमादिति भावः॥ द्वितीये दूषणमाह। यदीति। सत्ताधिकरणवृत्तिः। तथा च हेतुसमानाधिकरणः प्रतियोग्यधिकरणावृत्तिः संयो
गाभावादन्य एवाभावस्तत्प्रतियोगितानवच्छेदकसंयोगत्वावच्छिन्नसामानाधिकरण्यस्य सत्तायां सत्वादतिव्याप्तिरिति भावः। प्रतियोग्यन
धिकरणवृत्तित्वरूपप्रतियोगिवैयधिकरण्यमध्यस्यादिवारणार्थं वाच्यत्वाभावेन वृत्तित्वांशपरित्यागेन प्रतियोग्यनधिकरणत्वमेव तत्र हे
तुसमानाधिकरणाभावस्यैकदेशे सत्वव्यधिकरणे न्वेति। अभिप्रायेण समाधत्ते। सत्वव्यधिकरण इति पर्यवसितार्थमाह। स्वेति। स्वयं दत्तदाण
घटकप्राथमिकाभावपरं। तथा च वह्निमान् धूमादित्यादौ स्वस्य घटाभावादेः प्रतियोगी घटादिस्तदनधिकरणी भूतेत्यर्थः सत्वव्यधिकरणप
र्यन्तादिस्तवतिघटाभावादिमादाय लक्षणसमन्वयः॥ इति निष्कर्षः असम्भवात्। निष्कर्षः। विशिष्टसत्तावान् जातेरित्यादौ प्रतियोगिव्य
धिकरण्यः साध्याभावभिन्नो योऽभावस्तत्प्रतियोगितानवच्छेदकं यत्साध्यतावच्छेदकं विशिष्टसत्तात्वं तदवच्छिन्नसामानाधिकरण्यस्य स
त्तायां सत्वादतिव्याप्तेराह। प्रतियोग्यनधिकरणमिति। यथाश्रुते दूषणं स्फुरयति। जात्यधिकरणेति। न हि तत्र नातिव्याप्तिः। ननु ज्ञान
वान् सत्वात्यत्र ज्ञानाभावस्य प्रतियोगिव्यधिकरणस्य च न घटादेर्विषयतया ज्ञानाधिकरणत्वात् किंतु घटाभावादिरेव तत्प्रतियोगिता

मु
४१

नवच्छेदकत्वात्। ज्ञानत्वस्येत्यतिव्याप्तिरत आह। अत्रचेति। प्रतियोग्यनधिकरणत्वमिति। प्रतियोग्यसंबद्धत्वमित्यर्थः। तेन वृत्त्यनियामक
संबंधेन साध्यतायां तेन प्रतियोग्यधिकरणाप्रसिद्धावपि। व्याप्तिसामानाधिकरण्यादावपि संबंधित्वमेवज्ञेयमानीयं। न
त्वधिकरणत्वं। एवं च तादात्म्येन व्याप्यत्वं व्यापकत्वं च निर्बाधं। अत एव तादात्म्या तद्भिन्नयोर्व्याप्तिरिति संगच्छते। द्रव्यं च वृत्त्यनियाम
कसंयोगेन द्रव्यत्वादिव्याप्यत्वं पृथिवीत्वादिव्यापकत्वं च गगनादेः संभवति। अधिकरणत्वप्रवेशे तु तादात्म्यादेर्वृत्त्यनियामकतया तदसं
भवादित्यवधेयं। यथाश्रुते दूषणमाह। तेनेति। साध्यतावच्छेदकसंबंधविलक्षणेनेत्यर्थः। सत्तावान्द्रव्यत्वादित्यादिनापरिग्रहसी तेजातिमान्सा
वत्त्वादित्यादौ जात्यादीनामेकार्थसमवायादिना जात्याद्यधिकरणत्वेऽपि न भवतीत्यव्याप्तिः। नत्ततिमान्तिव्याप्तिः। ननु प्रतियोगितावच्छेदकसं
बंधेनैव प्रतियोग्यनधिकरणत्वमुच्यतां तावतैव वाग्ज्ञानवान्सत्त्वादित्यादावतिप्रसंगादित्यत आह इत्थं चेति। साध्यतावच्छेदकसंबंधवि
लक्षणेनेत्यर्थः। तदवच्छिन्नानधिकरणत्वमिति। तदवच्छिन्नसामान्यानधिकरणत्वमित्यर्थः। अव्याप्तिमेव विवृणोति। कपिसंयोगेति। सर्व
स्यैवेति। पूर्वक्षणावृत्तित्वविशिष्टयत्किंचिद्घटाभावः तदभावः पूर्वक्षणावृत्तित्वविशिष्टघटाभावाभावस्तदात्मकोऽपि प्रतियोगी तदधि
करणवृत्तित्वात् घटाभावादेरित्यर्थः। तथा च। अव्याप्तिमेव विवृणोति। कपिसंयोगेति। सर्वस्यैवेति। पूर्वक्षणावृत्तित्वविशिष्टयत्किंचिद्घटा
भावः तदभावः पूर्वक्षणावृत्तित्वविशिष्टघटाभावाभावस्तदात्मकोऽपि प्रतियोगी तदधिकरणवृत्तित्वात् घटाभावादेरित्यर्थः। तथा चा
भावमात्रस्य पूर्वक्षणावृत्तित्वविशिष्टस्वाभावात्मकप्रतियोगिसामानाधिकरण्यादसंभव इति भावः। घटाभाव इति। अभावाधिकरण राम
काभावस्याधिकरणानतिरिक्तत्वादिति भावः। अधिकरणातिरिक्तत्वे त्वाह तत्पदेति। अव्याप्तिमेवोपपादयति। तत्रेत्यादिना। अत्रा ४१

सिषंक्ते। नह्निति। ननु महाकाले कालिकसंबंधेन महाकालभेदस्य सत्वादव्याप्तेरनेन प्रतियोग्यधिकरणः प्रतियोगिनो घा
स्य महाकालभेसत्ताद्धूमैवान्नासिरतस्त्राह वस्तुत इति। वह्निमान् धूमादित्यादौ समवायसंबंधावच्छिन्नधूमसमानाधिकरणवह्न्य
भावप्रतियोगितायाः साध्यतावच्छेदकवह्नित्वावच्छिन्नत्वादव्याप्तिवारणाय यत्संबंधावच्छिन्नत्वप्रवेशः। तत्रैव संयोगसंबं
धावच्छिन्नघटाभावप्रतियोगितायां यत्संबंधावच्छिन्नत्वाभावादव्याप्तिवारणाय धर्मावच्छिन्नत्वप्रवेशः। संयोगसंबंधाव
च्छिन्नघटाभावप्रतियोगितामादाय धूमवान् वह्नेरित्यादावतिव्याप्तिवारणाय सामान्यप्रतिसर्पोक्तमव्याप्तिं वारयति। अयं चेत्या
दिनानुक्तरूपेण साध्यतायामव्याप्तिमाशंकते। नन्विति। प्रतिप्रतीत्येति। प्रतिस्वावसिकप्रतीत्येत्यर्थः। तथाचानुक्तरूपेण साध्यता
यामव्याप्तिरितिभावः। अत्रावच्छेदकत्वं व्याप्त्यनूह्यस्वनवच्छेदकत्वं वा अवच्छेदकतात्पर्यीस्याधिकरणाभिन्नत्वं। तेन वह्निस्व
रूपता स्वावच्छेदकतत्त्वह्नित्वानतिरेके दिनस्तति। अवच्छेदकतायां स्वरूपवह्नित्वे पर्याप्तेः इष्टपक्षेयं ननु तत्व्याप्तेरभावे
साधारणतया ताद्रूप्यव्याप्तिविशिष्टपरामर्शादप्यनुमित्यापत्तिरिति चेन्न स्वरूप कथमत्वसंबंधेन निरूपकव्याप्तिप्रका
रकज्ञानस्यानुमितिजनकत्वेनादोषान्नतु तादृशसामानाधिकरण्यविशिष्टधर्मत्वाज्ञानस्य गौरवादिति। अत्र पक्षतानिरूपणमसंग
तमाशंक्याह। पक्षतात्वमिति। तथा च सर्वव्याप्तिविशिष्टस्य पक्षवृत्तित्वज्ञानमनुमितौ कारणमुक्तं तज्ज्ञानाय मेव च पक्षतानि
रूपणमितिभावः। अत्र पक्षतात्त्वलक्षणस्य स्पष्टतयानुक्तेः पक्षतात्वलक्षणे प्रकारीयितुमर्थमाह। सिसाधयिषा विरहेति। घनगर्जि
तेन मेघानुमितिस्थले व्याप्त्यासिसाधयिषामात्रस्य पक्षतात्वे निषेधे सिसाधयिषा सिसाधयिषामात्रमितिमेघानुमानान्मेघा

मु॰टी॰ नुमितेः। अत एव वक्ष्यमाणदूषणं दिवसिसाधयिषाविरहस्य विशेषणस्य प्रयोजनमाह सिद्धेः सत्त्वामिति तया वमदानसोसिसत्त्वावयिषा
५२ कालीनसिद्धिसत्त्वेऽप्यात्विवारणाय सिसाधयिषाविरहेति विशेषणं इति भावः। सत्त्वामिति। सिसाधयिषाविरहस्य विशेष्याभयाभा
वाद्विशिष्टाभावात्तीति भावः। असत्त्वामपीति। विशेष्याभावाद्विशिष्टाभावइति भावः। यत्र सिसाधयिषा तत्र सिद्धेः सत्त्वेऽसत्त्वे वा पक्षता
निरावाधैव साध्यायत्र सिसाधयिषेति। सिद्धौ सत्त्वामिति। विशेषणाभावाद्विशिष्टाभावइति भावः। असत्त्वा चेति उभयाभावाद्विशिष्टा
भावइति भावः सिसाधयिषाविरहेति विशेषणोपदत्ते प्रागुक्ताव्याप्तिर्व्वस्तीत्याह। यत्रेति। सिद्धौ सिसाधयिषाविरह नैयायिकं चैतत्का
लावच्छेदेनैकालमहानित्वनेनकालिकेन सिद्धौ सिसाधयिषाविरहस्य सत्त्वेऽपि तद्गतिः परामर्शात्पक्षकारणसत्त्वे सिद्धिरूपविरोधिसत्त्वे
यद्यनुमित्सास्यात्तदानस्यपक्षत्वेजकत्वसंभाव्येतनचैतत्संभवति योग्यविभुविशेषगुणानां त्रयाणामयुगपदवस्थानासंभवादिति वक्तुंसं
भावितेत्युत्तेजकताकास्यलंभावेत्यतिनन्विति। अन्यथापि। क्रमेणानुत्पन्निस्यलेपि याद्दृश्यायाद्दृशोत्पादिभवत्येवेति। प्राग्दूदिसामग्रम
वकालइति शेषः। तस्मिन्‌गवात्त्वेमवेशस्यफलमाह॥ स्वमिति। विशिष्य निर्वचनस्य प्रयोजनमाह तेनेति। सिद्धिमात्रमिति। मात्रपदं कृत्स्ना
र्थकं। नत्वनुमितिविति तदभतेरसाक्षात्कारोमीत्यनुव्यवसायस्यैवोदयादिति भावः। नक्षुसमानेविषयेलौकिकप्रत्यक्षसामग्रीसत्त्वेन्नु
मितिसामग्रीसत्त्वेवलौकिकप्रत्यक्षमेवोत्पद्यतेनुमितिकुतोनोसघतद्रूपाप्त्वावयसमानेविषयेतौ लौकिकप्रत्यक्षसीमग्र्यायाअनुमिति
प्रतिबंधकत्वमाहइदत्विति भिन्नविषयस्थलेत्वनुमितिसामग्र्याबलवत्त्वमाहस्वमिति। तन्नक्षणंहेत्वाभासलक्षणं। चस्त्वर्थः। यद्दच्छार्थे राम
विहारेणेति तिया द्दीति। त्वेयभिचारादयः। नन्वनुमितिसामग्र्या चत्तवत्त्वमाहस्वमितिसामग्र्याबलवत्त्वमाहस्वमिति। तल्लक्षणंहेत्वाभास ५२

लक्षणं। चकारार्थः। यद्यप्युभयविद्वज्जनोक्तितियादीतितिव्यभिचारादयः। नन्वनुमितिप्रतिबंधकपक्षविशेष्यकभ्रमविषये साध्याभावे सद्धेतुनिष्ठे
तिव्याप्तिरतोयद्विषयकेत्यस्यार्थमाह। यद्विषयकत्वं चेति। सत्प्रतिपक्षस्यानित्यदोषतां मन्वानः शंकते। नचेति। अन्यथा हेत्वाभासत्वे बाध
स्यापीति। अनुमितिप्रतिबंधकीभूतबाधभ्रमविषयत्वात्तस्यापि स्येतिभावः। तस्य सद्धेतुत्वेनुमितिप्रतिबंधेन स्यादत आह। भ्रमादिति
।मात्रपदव्यवच्छेद्यमाह। हेतुस्त्विति। येन केनापीति। तादृशस्य नेत्यर्थः। पक्षधर्मविशिष्टमप्याह। परे त्विति। ननु सत्प्रतिपक्षस्य तत्त्वेव व्यभा
वव्याप्तिविषयकज्ञानविरोधित्वमेव च व्यभावनिष्ठव्याप्तेरभावात्कथं सत्प्रतिपक्षितत्वव्यवहार इत्यत आह। सत्प्रतिपक्षितेति। सद्धे
तौ च न तु पक्षज्ञानविषयतयेत्यर्थः। तद्वत्त्वस्य तद्व्याप्याभाववत्त्वस्य। अव्याप्तिमपि हरति। तत्रज्ञानस्येति। अत्र न च भ्रमादौ तत्कल्पनात् ज्ञानसं
बंधत्वकल्पनात्। ननु सद्धेतावपि बाधितप्रतिबंधकत्वेन व्यवहारेण संबंधत्वकल्पनं ज्ञानस्य भविष्यतीत्यत आह। तत्रेति। तत्र। सद्धेतौ प्रसुतायंन
बाधितः पुरुषस्ताभ्रांतस्तेषु व्यवहारादितिभावः। यथाश्रुतत्यागे वीजमाह। तेनेत्यादिना। ननु तद्धेतुकतत्साध्यकानुमितिप्रतितद्धेतो
तत्साध्यव्यभिचारस्याभावो हेतुर्वाच्यस्तत्राह। तदभावेति। नन्वेतिः। नासंभवः। याहशसाध्येति। याहशेतिसर्वत्रविशेषणं। तथा चयाह
शपक्षकयाहशसाध्यकयोर्हेत्वोरितार्थः। तत्संभवेति। वायुर्गंधवान्स्नेहवत्त्वादित्यादौ सर्वहेत्वाभाससंभव इतिभावः। नन्वेतस्यानुमि
तितत्कारणीभूतज्ञानान्यतरविरोधिज्ञानविषयत्वाभावेन कथं हेत्वाभासत्वमत्यतो दूषकताबीजमाह। नन्विति। एवमग्रेपि सर्वत्र दूष
कताबीजोक्तिर्हेत्वाभासत्वप्रदर्शनाय बोध्या। असाधारण्ये लक्षणमाह। असाधारणइति। तेन। असाधारणेन। प्राचीनमतमाह अ
न्ये त्विति। असाधारणलक्षणघटकं सपक्षं लक्षयति। सपक्षत्वेति साध्यसंदेहदशायामेव हेत्वाभासता नतु निश्चयदशायामित्याह। इ

दी०टी० स्यं चेति। अनुपसंहारिणं लक्षयति। नन्वेवं साध्याभावग्रहजनकात्सत्प्रतिपक्षात्तद्विरुद्धस्य भेदो न स्यादत आह। सत्प्रतिपक्षे त्विति। प्रतिहेतुः प्रति

४३ कूलो द्वितीयो हेतुः इति विशेषः। इति भेदः। विरुद्धसत्प्रतिपक्षयोरिति शेषः। भेदकांतरमप्याह। साध्याभावेति। क्रमप्राप्तं सत्प्रतिपक्षं लक्ष

यति। साध्याभावेति एकपरामर्शे प्रामाण्यज्ञाने विद्यमाने परेण परामर्शेन साध्यतदभावान्यतरानुमितिजननादगृहीताप्रामाण्यकेति

ति×४ रत्नकोशकृतां मतं दूषयितुमनुवदति॥ अत्र केचिदित्यादि ग्राह्याभावव्याप्यवत्ताज्ञानस्य प्रत्यक्षादौ प्रतिबंधकत्वाभावमुपपाद्य सत्प्रतिपक्षेऽपु

पपादयति तथेति। ननु विरुद्धोभयसामग्र्यामन्यतरनाधिकबलत्वकार्यं ज्ञेयमत आह। फलबलेति। ग्राह्याभावनिश्चयो यथा प्रतिबंधक

४३ एवं तद्व्याप्यवत्ताज्ञाननिश्चयस्यापि प्रतिबंधकतया संशयाकारानुमित्यसंभव इत्याह। तदभावेति। तस्य तदभावव्याप्यवत्ताज्ञानस्य। उपनीत

भानविशेष इति। दोषविशेषाजन्योपनीतभान इत्यर्थः। तथा चेति॥ अनुमितेरपि प्रतिबध्यतावच्छेदकाक्रांतत्वाद्विशेषदर्शने सति न संश

ति×५ यरूपानुमितिरिति भावः। ननु तस्मिन्सत्प्रतिपक्षस्थले संशयः कस्य [illegible] हेतोरत आह। यत्र चेति। अन्यथा। अप्रामाण्यज्ञानाभावे आश्रयासि

द्ध्यादीनां प्रत्येकं हेत्वाभासत्वापत्त्या हेत्वाभासाधिक्यापत्तिरिति विभाजकमाह। असिद्धिस्त्विति। क्रमेणातिस्रोऽसिद्धीरुदाहरति। यत्र का

नमयत्वादिना साध्याप्रसिद्ध्यादीनामपि विभजनमाशंक्याह। साध्याप्रसिद्धीति। साध्याप्रसिद्धिरिति स्वरूपमाह॥ साध्य इति क्रियप्रामत्त्वाध्य

तत्त्वयति। बाधस्त्विति। तद्धर्मिकतदभावनिश्चयः तेन संदिग्धप्रामाण्यकस्य निश्चिताप्रामाण्यकस्य पातदभाववतिश्चयस्य सत्त्वे त

द्विशिष्टबुद्ध्युदयेऽपि न क्षतिः। लौकिकसंनिकर्षकाले तद्विशिष्टबुद्धेरनुभवसिद्धत्वादाह। लौकिकेति। शंखो न पीत इति निश्चयेऽपि राम

पित्तात्मकदोषवशाच्छंखः पीत इत्यलौकिकभ्रमस्यानुभवसिद्धत्वादाह दोषेति। भ्रमसामान्यजनकदोषवारणाय यदि दोषेति। बाध ४३

निश्चयेसतिसंशयस्याप्यनुदयान्निश्चयत्वमपहायसामान्यतोज्ञानत्वप्रवेशः। ज्ञादोवह्न्यभाववानितिनिश्चयेविद्यमानेपिह्रदंवह्निमदि
तिज्ञानत्वरूपेणह्रदेवह्निबुद्ध्युदयान्नज्ञानमितावच्छेदकोतिप्रतिबध्यप्रतिबंधकतयोर्विशेषणं। नत्विति। युक्तमित्यपिमेणान्वितं। नन्वेवं
बाधादिनिश्चयकालेसंशयत्वज्ञानाभावादेवानुमित्यभावोपपत्तौबाधनिश्चयस्यनानुमितिविरोधित्वमितिहेत्वाभासत्वंनस्यादतआ
ह। यद्विरोधितयेति। अनुमितिविरोधितयेत्यर्थः। साध्यसंशयेति। यदापक्षसंशयेति। यदात्वंसंशयाकालीनःपरामर्शस्ततोनुमितिर्जायते
ज्ञानस्यादित्यर्थः। आदिनासिद्धिपरिग्रहः। नचसंशयांतरमेवानुमितिरितिवाच्यं। सतिविशेषदर्शनेसंशयायोगात्। पक्षविशेष्यकसाध्या
भावज्ञानप्रमात्वनिश्चयोनुमितौप्रतिबंधकस्तदभावःकारणं इतिकस्यचिन्मतंदूषयति। एवमितिबाधकमप्याह। अन्यथेति। साध्याभा
वज्ञानप्रमात्वनिश्चयस्यप्रतिबंधकत्वइत्यर्थः। ननुतर्हिसाध्याभावज्ञाने ऽप्रामाण्यज्ञानसत्वेनुमित्यापत्तिरतआह। किंत्विति। बाधस्येति
पक्षेहेतुर्गमकोनवेतिविकल्पाद्येदूषमाह पक्षेहेतुसत्वइति। द्वितीयेत्वाह। पक्षेहेत्वभावइति। तथाचकिंबाधस्यदोषत्वांगीकारेणे
तिभावः। बाधज्ञानस्येति। बाधज्ञानसत्वेपिसाध्याभाववद्धेत्वोःपरस्परसंबंधविषयकज्ञानाभावेनव्यभिचारज्ञानाभावादितिभावः। ननु
यत्रपरामर्शानंतरंबाधबुद्धिर्व्यभिचारलौकिकप्रत्यक्षात्मिकातत्रव्यभिचारज्ञानाभावान्नैवप्रतिबंधकास्तुज्ञातसत्वादित्यतोस्तीबाध
स्यत्वमास्तित्वेति। अनुमितिकारणीभूतपरामर्शविघटकतयाव्यभिचारादेर्दोषत्वंचतुसाध्यविरोधिविषयकत्वाभावान्नयत्स्वपराम
र्शजातेव्यभिचारज्ञानादेर्निष्प्रयोजनत्वंइतिभावः। मध्यप्रागभावकालावच्छिन्नत्वापिगंधसाध्यनेबाधस्यावस्यायपयति। एवमिति। विरु
द्धसाधारणेपिनित्यहेतुतिरित्याह। वस्तुतइत्यादिना। सर्वत्रैवमेवेति। अन्येत्विति। यथाद्वितानैकांतिकलक्षणे। सामानाधिकरण्येनसाध्यसिद्धेः।य

मु॰ टी॰ ४४

हेतावच्छेदकावच्छेदेनानुमितावविरोधित्वादाह। अदंविति। फलो। क्रमुक्तदोषाद्युपेक्ष्यलक्षणांतरमाह। तथापीति पर्यवसितं विरुद्धलक्षणमा
ह तथा चेति। तद्भिन्न इत्यंतं। सर्वपक्ष। सिद्धेरनुक्तत्वेन पक्ष। सिद्धिरिति। फलितमयुक्तमतो व्याचष्टे। आश्रया सिद्धि दित्यर्थ इति। नीलधूमादिहेतो
आभावे हेतुमाह। नीलधूमत्वमिति। स्वरूपाविरुद्धघटितत्वादाह। अंतरेनेति। भिन्नेनेत्यर्थः। तद्घटितत्वं च तद्विषयकप्रतीतिविषयकत्वं नी
लधूमत्वं तु न धूमत्वाविषयकप्रतीतिविषय इति तद्धरणं। हेतुविशेषणीभूतस्य विरुद्धत्वस्य प्रयोजनमाह किंपीति। यद्वी। रतो घटो गंध
कत्वात् साध्यशून्य इत्यादि फलमतो व्याचष्टे। यत्रेति। नव्यतिः। नाप्ता हि। तथा चोत्पत्तिकालविशिष्टे घटे गंधशून्यत्वमस्त्येवेति भावः। क
पिसंयोगी नवच्छेदकमत्वावच्छिन्नहृदे कपिसंयोगसाधने बाधमोक्त्वादिप्राप्तसंग्रहणं तं दर्शयति। एवमिति। ननु गोसादृश्यविशिष्टपिंड
ज्ञानस्य करणत्वे न संभवति व्यापाराभावाद्व्यापारवतो ह्यसाधारणकारणस्य करणत्वादित्यतो व्यापारं दर्शयति। तदनंतरं गोसादृश्याद
ति। तत्र तस्मिन् सति उपमितिस्वरूपमाह गवय इति। एतावद्भूवयत्वधर्मितावच्छेदकगवयपदवाच्यतानुमुपमितिरिति कस्य चिन्मतं दू
षयति। नचेति। असंगताभिधानशंकानिरासायाह। शाब्दबोधेति। शाब्दबोधं प्रतिज्ञापमानपदमेव करणमिति वैशेषिकमतं दूषय
ति। नत्विति। तत्र युक्तिमाह। यदभावेऽपीति। मौनिश्लोकादावित्यादिना लिंग्वादिसंख्याबोधकहस्तचेष्टादिसंग्रहः। पदज्ञानं तु करण
मिति फलितं तत्र तु शाब्दस्वार्थे तथा च पदज्ञानमेव करणमित्यर्थः। तन्नैति। पदज्ञाने करणे सतीत्यर्थः। ननु यामन्यराणां शाब्दश्रवणमात्रेण
शाब्दबोधः कुतो न भवतीत्यत आह। तत्रेति पदज्ञाने करणे सतीत्यर्थः। वक्ष्यमाणदोषादाह मुक्तत्वापदजन्येति। अन्यथा। पदार्थस्मरण राम
मात्रस्य व्यापारत्वे द्रष्टमुपलक्षणं। इदं समासगर्भविभावमतोऽक्रूरदंडचानितिवाक्याद्क्रूरदंड इति तत्र स्फुटनिश्चयवतः पुंसो रक्तोऽडयामिति ४४

शाब्दबोधयतिश्रोत्रस्पशिष्टत्वं। ननुपदज्ञानरूपकारणाभावादेवशाब्दबोधोनभविष्यतीत्यतः पदज्ञानवतइति। आदिनानुमानसंग्रहः। अत्रप्र
भाकराः द्वारमित्यादौपदतदर्थज्ञानकल्पनापेक्षयालाघवेनार्थाध्याहारेणतज्ज्ञानकल्पनात्तदन्वयबोधेपदजन्यतदन्वयप्रतीतेरनुपस्थि
तेरेवहेतुत्वान्नपदजन्यैवोपस्थितिर्हेतुः। अस्यचोपस्थितकत्वापादेश्चसतितात्पर्यज्ञानेशाब्दधीविषयत्वमिष्टमेवेत्यूचुः। तदयुक्तं। लाघ
वेनद्वारार्थकत्वेनज्ञातपदोत्तरविभक्तिजन्यकर्मतोपस्थितित्वेनद्वारकर्मताशाब्दबोधेपिधानार्थकत्वेनज्ञातपदोत्तरविभक्तिज्ञानज
न्यकर्मतोपस्थितित्वेनचपिधानान्वयकर्मताशाब्दबोधेहेतुत्वात्तत्रपदस्यैवाध्याहाराच्चद्वारकर्मताकपिधानबोधेप्युक्तस्यैवानि
यामकत्वात्तथान्यथाद्वारकर्मतापिधानमित्यादितोपितद्बोधापत्तेरिति। तत्रापि। पदजन्यपदार्थस्मरणेपि। अन्यथा। हेत्वापदजन्यता
युक्तौ। ननुवृत्तिः शक्तिस्तयाचगंगापदात्तीरादेर्बोधोनस्यात्। शाब्दपदजन्यपदार्थोपस्थितिरूपकारणाभावादित्यतआह। शक्तिश्चे
ति। ननुपदज्ञानस्यशाब्दबोधकरत्वेपभ्रंशानामपिशाब्दबोधः स्यादित्याशंक्यभ्रमात्तत्रशक्तिधीः सहकारिणीत्युक्तंतत्रतदप्रसक्त्य
ग।६ वच्छित्तपूर्वोपस्थितपदार्थधीपरामर्शकइतिप्रतिभातितत्त्वायुक्तं शक्तिज्ञानस्यपदार्थबोधासत्कापित्वादित्याशंक्यस्तलसत्वत
पदपरामर्शकतयाव्याख्यातुमाह। अत्रैवेति। हेत्वापदजन्यपदार्थस्मरणएवेत्यर्थः। एवकारेणशाब्दबोधव्यवच्छेदः। शक्तिज्ञानस्य
पदार्थस्मृतिहेतुत्वेबीजमाह। एवमिति। तत्संबंधेनशक्तिरूपसंबंधेन। ननुपदज्ञानेजातेपदार्थएवस्मर्यतेनतुत्वन्यदित्यत्रकिंनि
यामकमित्यत्राह। पदज्ञानस्यहीति। यथाह्येकस्मिन्संबंधिनिहस्तिपकेदृष्टेऽपरसंबंधीहस्तीस्मर्यतेतथाप्रकृतेप्येकस्मिन्संबंधिनि
पदेज्ञातेऽपरसंबंधीपदार्थः स्मर्यतइत्यर्थः। कारणीभूतशक्तिज्ञानविषयीभूतशक्तिंनिरूपयति। शक्तिश्चेति। सचेति। यस्मात्पद

वै. टी. टस्य मूलघटो वो द्वग्ध्रतिद्वस्थिरे छायपरोपितस्यापि एवयदिदं चसतिकथं साधुरूपदस्य शक्तिरिति तथापि घटत्वाद्युपस्थितायास्तस्याः शक्तित्वं ना
४५ तदंगनच्चैवंगंगायदाश्रीरस्यैवा घोषभवलक्ष्यार्थत्वाद्वको छायाः स्वत्वाल्लक्षणोच्छेदप्रतिवाक्यं। गंगायां पदेतीरिशक्तं शक्त्या कामकग्रामालिंग्यवक्ता रा २
वाभावेनताद्दृशो छायाश्चसत्वात्। ननु शक्ते रस्थिरे छायारूपत्वेऽश्र आधुनिकचैत्रादिपदेशक्तिर्नस्यादित्यापंक्याह आधुनिकइति। ननु त
थाप्यपभ्रंशे शक्तिर्नस्यादत आह। आधुनिकसंकेत इति। तथाचापभ्रंशस्यदेशभेदेन नानात्वान्नतत्र शक्तिरिति भावः। संप्रदाय
मते ऽस्वसंप्रकटयति। नव्यास्त्वित्यादिना। तथाच संप्रदायमते गौरवमित्याशयः। ध्रुवं वदंति। स्थिरेच्छानशक्तिर्ज्ञानकृतिभ्यामस्म
दादिसर्वमित्यादिज्ञाने ऽस्य विनिगमनाविरहात्। किं — विशेः पदार्थ इति। शक्तेश्चनतानुवर्णनमात्रेऽहेतुरपितु पदं छठ्यमिति। तत्र
चसंसर्गविधयाकविशेषः किं क्वचिल्लक्षणाभासत इति। ननुविषयतयाशाब्दबोधः सतिशक्तिज्ञाने स्यात्तदेवनसंभवत्युपायाभा
वादित्यत आह। शक्तिग्रहस्त्विति। व्याकरणादीत्यादिना उपमानादिपरिग्रहः। ननु व्याकरणादेः शक्तिनिर्णायकत्वे किं प्रमाणं
पांशावयपशक्तिग्राहक प्रतिपादकं प्राचीनश्लोकंसंमतित्वेनाह। शक्तिग्रहमितिपाद्यं शब्दभूतपादक व्याकरणस्य शक्तिग्राहकत्वं
प्रतिपादयति। धातुप्रकृतीति। धातुः पच्यादिः। प्रकृतिः प्रातिपदिकं। प्रत्ययाः सुबादयः। आदिना गादिसंज्ञापरिग्रहः। ननु व्या
करणस्य शक्तिग्राहकत्वे कथमाख्यातस्य कर्तृवाचकत्वं नस्वीक्रियते नैयायिकादिभिरत आह। क्वचिच्चेति। आख्यातस्यकर्तृ
रि शक्तौ युक्तिमाह। चैत्र इति। पचतीत्यादावित्यनंतरं हातिप्रायः। तथाच वैः पचतीत्यादावभेदान्वयप्रश्नात्कर्तुर्वाच्यत्वमित्यर्थः राम
तत्रेतिआख्यातस्यकर्तृवाचकत्वं चेत्यर्थः। तर्हि किंकुत्र शक्तिरत आह। किंत्विति। कर्तृसंख्येति। कर्तृगता या संख्या तस्याश्चानभिधा ४५

रा: २

नस्येत्यर्थः। तत्र। तृतीयायां। तंत्रत्वात्। प्रयोजकत्वात्। ननु कर्मगतसंख्याया अभिधीयते त्वयांशे च संख्याभिधानयोगपद्यं कर्तरि दर्शयति
।संख्याभिधानेत्यंतं। तत्रादिपदुदासीनयोः कर्मत्वाद्यनवच्छिन्नेति। ननु चैत्रो ग्रामं गच्छतीत्यत्र त्यादीनामाख्यातेनैकवचनत्वेनाभिधानेनैका
या। संख्यायाश्चैत्रे ग्रामे च विषयः स्यात्कर्मत्वाद्यनवच्छिन्नत्वात्प्रथमांतपदोपस्थाप्यत्वाच्चैत्रपदार्थस्य कर्मत्वादौ तस्यार्थमाह। विशेषणत्वेति
यद्यपि न कर्मादौ विशेषणत्वं तात्पर्यं तदा चैत्रादेर्तादृशसत्त्वात्संख्यान्वयः स्यादितः प्रथमदलार्थमाह। धात्वर्थेति। तथा च चैत्रे
गमनरूपधात्वर्था ति तिरिति तस्यां प्रविशेषणत्वान्न संख्यान्वय इति भावः। लकारसामान्यस्यानुकूलव्यापारे शक्तिरिति मीमांसक
मतं दूषयति। एवमिति। गौरवादिति। व्यापारे शक्तौ तु प्रमाणानां जन्यत्वरूपव्यापारत्वस्य शक्यतावच्छेदकत्वं वाच्यं। तत्र च गौरवं
जातिरूपयत्नत्वस्य शक्यतावच्छेदकत्वे तु लाघवमित्यादाशयः सुधीभिश्चैतत्। पचति पाकं करोतीति यत्नार्थकं करोतीति नाम्ना व्याख्यात
विवरणात् तत्र व्यवहारादिव बाधकं विना विवरणादपि व्युत्पत्तेः किंकरोतीति यत्नप्रश्ने पचतीत्युत्तरस्य यत्नार्थकत्वं विनानु
पपत्तेः। नन्वाख्यातस्य न यत्नार्थकत्वे रथो गच्छतीत्यादौ धात्वर्थानुकूलयत्नाभावेऽप्याख्यातप्रयोगादित्यत आह। रथ इति। अत्र
च गमनानुकूलव्यापारवाच्यानुपपत्त्या आश्रयत्वं लक्षणया तत्प्रयोजकत्वे वेति। लक्षणा निरूढलक्षणा तत्त्वं च प्रयोक्ता ग्रं। ४
वच्छेदकाभावे वत्वे सत्यनादिप्रयोगवत्त्वं च सुजानातीत्यादौ व्यापारजनकत्वलक्षणायाः स्वीकारान्नाश्रयत्वलक्षणानियतेतत्व
दस्त्यादीति। आदिना गच्छतीत्यत्र तेऽपि विद्यतेनिद्रातीत्यादेः संग्रहः। पचतीत्यादौ चानुकूलत्वं पाकस्य कृतौ संबंधो भासते च
चैत्रस्तंडुलं पचतीत्यादौ द्वितीयार्थः कर्मत्वं तच्च विक्लित्तिरूपं पाकेऽन्वेति तत्तु पाककर्मकपाकानुकूलकृतिमांश्चैत्र इति बोधः। चैत्रेण पच्य

श॰टी॰
४६

तेतंडुलत्वइत्यादौफलत्वप्रकारकबोधस्यानुभविकत्वात्फलमात्मनेपदार्थः। तृतीयार्थः कृतिः साचकर्तृत्वसंबंधेनपाकेफलेतत्रचतंडुलेन्वे
ति। एवंचैत्रकृतिजन्यपाकजन्यफलशालीतंडुलइतिबोधः एवमन्यत्रापिइतिदिक्। कर्तृतातुकर्त्राकर्मचार्थस्तत्रैत्रः पक्वातंडुलाः पक्वाइत्य
भेदान्वयानुरोधात्त्रामार्थयोर्भेदेनान्वयस्याव्युत्पन्नत्वादितिकृतंपल्लवितेन। भावव्युत्पत्तावप्ययणोनाह। एवमानमिति। तयोरामितिप्र
प्रमाननिरूपणीवसरइतिशेषः। कोशेनेति। गुणवतिवाच्यासतिगुणिनोविशेष्यस्यपद्धिंगंतल्लिंगंभवतिसुशक्तोऽप्ययंशब्दइत्यर्थकेन
गुणिलिंगास्ततद्धतीत्यनेनकोशेनगुणविशिष्टेचशक्तिर्व्युत्पादितेत्यर्थः। नीलादिविशिष्टेत्विति। गुणवचनेभ्योमतुपोलुगिष्टइतिका
त्यायनोक्तेरत्रलुप्तेनमतुपैवविभितार्थबोधसंभवेऽयंग्रंथः प्रामादिकः। तदवधार्येतिततद्घटानयनंतेनननुदण्डाकार्यवाचकत्वेविधि
समभिव्याहारमूल्याद्भूतलेघटइतिवाक्याच्छाब्दबोधोनस्यादित्याशंकेष्टायत्यापरिहरतिइत्थंचेति। तद्धेतुतयेति। शाब्दबोधहेतुत
येत्यर्थः। व्यभिचारादिति। कार्यान्वितघटादिविषयकशाब्दबुद्धित्वावच्छिन्नंप्रतिहेतोः कार्यतावाचकपदसमभिव्याहारस्याभावेन
व्यभिचारादित्यर्थः। ननुशाब्दबोधरूपकार्योत्पत्तिरेवाध्याहारेबीजंइत्यतआह। चैत्रपुत्रइति। स्वयमहमुपसंहरति। इत्थंचेति। व्यतिरेक
व्यभिचारेणकार्यतावाचकपदसमभिव्याहारस्यकारणत्वाभावेचेत्यर्थः। व्यवहारस्यशक्तिग्राहकतांव्युत्पाद्यार्थवादस्यशक्तिग्राह
कतांव्युत्पादयति। एवमिति। ननुकथंतर्हियववयदस्यकंगौप्रयोगइत्याशंक्याह। कंगौत्विति। ननुतत्रापिशक्तिः कुतोनभवतीत्यतआ
ह। नानाशक्तीति। नन्वेवंसूर्यादिपदेपिनानाशक्तिकल्पनंनस्यादित्यतआह। सूर्यादिपदादौचेति। प्रकृतेचआर्यप्रयोगएवकेनि राम
गमकइतिभावः। शक्तियहइति। अयंचानुमानिकः। यथाघटपदंघटत्वविशिष्टवाचकंतद्वाचकपदभिन्नत्वप्रमानार्थकत्वादिति।अ ४६

शिमो पिपिकः पिकपदवाच्य इत्युदाहृतं तत्र घटादिपदत्वादिति प्रसिद्धपदस्येति प्रसिद्धार्थकपदमित्यर्थः। प्रसंगात् घटादिपदानां गोत्वाद्
शाब्दबोधकत्वादिति दिव विशेषशक्तिव्यवस्थापयितुं गवादिपदानां गोत्वादावेव शक्तिर्न तु व्यक्तावितियदंतं अंशमिति सकारान्तमतंतत्
बहूपयत्तितत्रजातानवानानुगम इति। इच्छामित्रस्य शक्तिर्लवघटतां नव्यानां मते कदाचिन्नैव पि घटाक दाचिद्व भैवायेघटशक्तिरयन
नुगम इत्यर्थः गोत्वादेरेवेतियथा च प्रतिदंडं नियतदर्शवर्त्तितायामित्र त्वेपिकारणतावच्छेदकैवपात्कारणत्वापाए इतथेवघ्नेति
विशेषतावच्छेदविवेतिव्यभिचारादिति। व्यक्तिषु शक्तिकल्पने घटशाब्दबोधत्वावच्छिन्नं प्रतितद्व्यक्तिशक्तिज्ञानत्वेन हेतुनायाव्य
तिरेकाव्यभिचार इतिभावः। आनंत्यादिति। व्यतिरेकव्यभिचारवारणायतत्तद्व्यक्तिशाब्दबोधावच्छिन्नं प्रतियत्तद्व्यक्तिग्रहत्वेनका
रणत्वेऽपि चानंत्यमितिभावः। ननु व्यक्तेरपदार्थत्वे शाब्दबोधविषयतानस्यादित्यत आह। शक्तिंविनेति। घटत्वविशिष्टशक्तिग्रहत्वे
नहेतुत्वमपेक्ष्यलाघवात् घटत्वशक्तिग्रहत्वेनैव हेतुतासिद्धौ च न व्यक्तिभानानुपपत्तिर्घटपदं घटत्वशक्तमितिज्ञानस्यैव विशिष्ट
शाब्दधीहेतुत्वादित्याशयः दकैवघटक्तेरैक्यमित्याशयः नन्वेतावच्छक्तावयविशक्तिर्जातिशक्तिमनेनैवतत्त्रान्न — — लाघवा
दित्यस्परत्वाद्रूपांतरमाह किंचेतितयाचसमवायेन गोविशेष्यकगोत्वप्रकारकशाब्दबोधत्वावच्छिन्नं प्रतिसमवायेन गोत्व
विशिष्टशक्तिग्रहत्वेन कारणत्वास्याभिप्रेतत्वान्नस्वमते समानप्रकारकत्वघटित निवेशाद्व्यभिचारस्तपदोष इतिभावः। व्र
यहत्तिसंबंधेन गोत्वादिप्रकारकपदविशेष्यकपदं गौरित्याकारकं ज्ञानं गोत्वप्रकारकशाब्दबोधोहेतुर्नातोगोत्वप्रकारकपदार्थस
रणाद्यनुपपत्तिरित्यपरसादाह। किंचेति। उपसंहरति। तस्मादिति। यत्तु पदात् केवलघटत्वोपस्थितेरिदं साश्रयं जातित्वादित्यादेया

मु.टी. देवमपिशीलामङ्गतिभाषवदंति। तदपिन्नजातिवादेः शाब्दादनुपस्थितेः। शाब्दबोधे पदजन्यपदार्थोपस्थितेः कारणत्वात्। विभक्तीनांप्रकृत्य
४१ र्थ्यान्वितस्वार्थबोधकत्वात्। व्यक्तौ तदनन्वयापत्तेश्च। शक्तिश्च शक्यतावच्छेदकरूपेणैव बोधयतीति तेन घटादिपदान्न द्रव्यत्वादिनोपस्थि
तिः। तदादिपदानामपि बुद्धित्वादिविशिष्ट एव शक्तिः। तत्र बुद्धित्वादि विषयतावच्छेदकाच्छिन्ने शक्तिमित्याकारकः। एवमिदंपदादिष्वपि एतेषां
बुद्धत्यत्वादिरूपशक्यतावच्छेदकभेदानेकार्थता। तदाहुः इदमः प्रत्यक्षगतं समीपतरवर्त्ति चैतदो रूपं। अदसस्तु विप्रकृष्टं तदिति प
रोक्षे विजानीयादिति। किंपदस्य च जिज्ञास्याविषयत्वविशिष्टे शक्तिः। सर्वपदस्य च व्यापकत्वे घटास्तु पर्वतः इत्यत्र घटत्वव्यापकं
रूपवत्त्वमिति बोधः। अस्मत्पदस्य च तत्कालीनसम्बोध्यत्वे नत्वादिशक्यतावच्छेदकं। एवमहंपदस्य तत्कालीनस्वतंत्रोच्चारयितृत्वे
नत्वादि। तत्र च पदाय शरीरावच्छिन्नोपदर्शपदेस्तत्तत्रोच्चारयिता तदा स एव तेन बोध्यते स्वातंत्र्यं अन्यावाच्यस्त्वयामद्वचनात्सारजे
ष्वादेनमस्यदात्केर्वोध इत्यास्तां विस्तरः। समुदायशक्त्या तु यच्च शक्यावसम्बन्धात्तत्वान्वयशाब्दबोधोत्पत्तेर्न तद्भिन्नज्ञानस्य यंकजनिकत्वं
त्वप्रकारकबोधे प्रतिबंधकत्वमिति नव्यमतमाह। वस्तुतस्त्विति। लक्षणा द्विविधा जहत्स्वार्था अजहत्स्वार्था च लक्षणा च तत्राद्यां
प्रदर्शयति। गंगायामिति। नन्वन्वयानुपपत्तेर्लक्षणाबीजत्वे यष्टीः प्रवेशयेत्यत्र यष्ट्यन्वयानुपपत्तेरभावेन यष्टिधरे लक्षणा नस्या
त्तत्राह। तात्पर्यानुपपत्तिर्बीजमिति। ननु व्यवहारादौ रापेक्षा निरात्त्विति चेन्न। गौरवज्ञाने सति तत्प्रयोगात्प्रवाहवतीरे भारप्रयोगाभा
वाच्च। यत्र तु प्रयोगे तुल्यजातत्वामूयत्रशक्तिः। यथा नानार्थसैन्धवादिपदे। क्लिष्टीयाप्रदर्शयति। एवं काकेभ्य इति। दध्युपघातके। विड राम
लादौ तेनैव रूपेणेति। न च जहत्स्वार्थायां गंगायामित्यादेर्गंगातीरत्वेन भाने गंगापदमादाय युगपद्वृत्तिद्वयविरोध इति वाच्यं। गंगायां घो ४१

षमतस्या विसंत्रेविविरोधाभावात्। अतएवगंगातीरंगंगापदसंबंधीतिलक्षणाजन्यगंगातीरत्वविशिष्टस्मरतेरेव। नत्वलक्षणेति गंगापदशक्यप्रवा
हसंयोगस्यतीरएवसत्वादितिभावः। प्राचांतावच्छेदके शक्तिरिवलक्ष्यतावच्छेदकेपिलक्षणास्त्येवान्यथाशक्यतावच्छेदकेपिशक्तिर्नस्यादिति
नवीनमाह। परित्विति। व्यंजनानुतस्यांतरंलक्षणायैवसतितात्पर्यशैत्यपावनत्वादिप्रत्ययसंभवादितिसंप्रदायः। लक्षितलक्षणायामन्या
येकपमांप्रवर्जस्वार्थयामेवीतमीवमाह। यत्रत्विति। पदपरासंबंधरूपः। स्ववाच्यैकफलपघटितपदवाच्यत्वरूपः। ननुशाब्दबोधः
शक्यपदज्ञानस्यकारणंविनाकथमित्यतआह। किंत्विति। अन्वयप्रतियोगिशाब्दस्यसमीपदज्ञानादेवहेतुत्वादितिभावः। ननुशाब्द
बोधंप्रतिशक्तिलक्षणान्यतरसंबंधेनपदानामेवकारणत्वाद्वाक्यस्यलक्षणायाबोधकतानस्यादतआह। वाक्येत्विति। ननुगभीरायांन
द्यांघोषइत्यादौनदीपदस्यगभीरपदस्यवातीरलक्षणास्वीकारेणगभीरपदार्थनदीपदार्थयोरन्वयेस्वीक्रियमाणेएकदेशान्वयाप
त्तेः पदद्वयलक्षणायाअसंभवेनचवाक्येलक्षणास्वीकार्येवेतिवैयाकरणाः प्राकामेकदेशान्वयस्यादोषत्वांगीकारेणपरिहरति। यत्रत्वि
ति। क्वचिदिति। यद्वेत्यादावेकदेशाभेदेनान्वयांगीकारादित्यर्थः। संप्रदायविदांमतेनपरिहरति। यदीति। नन्वेवंगभीरपदवैयर्थ्यमतआ
ह। गभीरेति। ननुगभीरपदादेस्तीरलक्षणायांनघोषमित्यनान्वितंतीरस्यनदीत्वाभावादितिप्रत्युक्तंनदीपदस्यतात्पर्यग्राहकत्वं बहुव्रीहौतुचित्र
गुपदेगोपदस्यगोस्वामिलक्षणायांनान्वयानुपपत्तिश्चित्रत्वस्यगवान्वयसंभवादिलक्षणानुपपत्त्यासमुदायस्यचित्रगोस्वामिनिश
क्तिरावश्यकीतिवैयाकरणमतंप्रत्युक्तमेवेत्यतआह। बहुव्रीहावपीति। एवंपदार्थमेवदर्शयति। तत्रहीति। तस्यावलक्षणायैवोपपत्तेर्न
समासेशक्तिरनन्यलभ्यस्यैवशाब्दार्थत्वादितिभावः। अत्रगोपदंचित्रगोस्वामिलक्षकंचित्रपदंतात्पर्यग्राहकं चित्रपदंवाचित्रगोस्वामि

मु॰ लक्षकं गोपदं तात्पर्यग्राहकमित्यत्रापि विनिगमनाविरहः। उभयत्रापि पदे लक्षणेति प्राञ्चः। नवीनाः पुनरुत्तरपदस्यैव लक्षणा न च विनिगम
४८ नाविरहः। गोपदलक्षणानियामकस्य प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वनियमस्य सत्त्वात्। अव्यवहितपूर्ववर्तिन एव च प
दस्य प्रकृतित्वमन्यथा राजपुरुषमानयेत्यत्रापि राज्ञानमानयेति बोधप्रसंगादिति वदंति। नन्वेवं नरपदे वैयर्थ्यमत आह। चित्र
पदमिति। चैत्रादीनामेतत्पदे इत्यादौ तद्गुणसंविज्ञानबहुव्रीहिरित्यादि प्राचीनमते तल्लक्षणा। चैत्रपदादिकं च तात्पर्यग्राहकं अत्र
त्रापरे। चैत्रत्वमैत्रत्वादिनानारूपेणैव लक्षणा युगपद्वृत्तिद्वयविरोधस्यानभ्युपगमात्। पुष्पवतादिपदेना। नास्त्येकरूपेणैव
नानारूपेणैकलक्षणायाः स्वीकारादिति। तद्गुणसंविज्ञानबहुव्रीहिस्थले सखपदप्रकृतिपदार्थस्यान्यपदार्थान्वयिमात्रान्वयः। ल
वंकर्णमानयेत्यत्र लंबकर्णविशिष्टस्यानयनान्वये समानकालीनत्वसंबंधेन लंबकर्णस्यापि तत्रान्वयात्। यत्र च प्रकृतिपदार्थस्या
न्यपदार्थान्वयिनानान्वयः सोतद्गुणसंविज्ञानः। धनवंतमानयेत्यादावानयनान्वये धनादेरनन्वयात्। तत्पुरुषे राजपुरुषादौ पु
रुषादौ राजादिसंबंधस्य बोधो न संसर्गविधया नामार्थयोः [illegible] त्वयि नामार्थयोः प्रभृतादात्म्यातिरिक्तसंबंधेनान्वयस्याव्युत्पन्नत्वादि
तिराजपुरुषादिसमुदायस्य राजपुरुषादौ शक्तिरेवेत्यपि निराकरोति तत्पुरुषे लक्षणेति। अन्यथा नामार्थयोर्भेदेनान्वयबोधे तथा
बोधश्रुतिभेदेनान्वयबोधस्यार्थ॥ घटो नेति। घटपदसमानविभक्तिकपदसमभिव्याहृतनञो प्रतिपादितस्यान्योन्याभावस्य प्र
तियोगिताभ्यामन्वयबोध इत्यर्थः। नञ इति। नञर्थान्योन्याभावस्य। न च नञः प्रतिपादितावच्छेदकसंसर्गाभावत्वमन्योन्याभावत्वं च त राम
घटो न पट इत्यादौ कथं नान्योन्याभावबोध इति वाच्यं। भूतले न घट इत्यादौ नञ्पदजन्यभूतलनिष्ठदंडसंसर्गाभावबोधे भूतला ४८

घुपस्थापकपदोत्तरसप्तमी। ज्ञानं हेतुः लक्षणस्य ज्ञाप्यत्वात्। न चैवं त्रोनपचतीत्यादौ द्वितीयार्थस्य कर्तृत्वादेः संसर्गाभावस्य बोधो न स्यात्त
त्सम्यं ताधिकरणवाचकपदसमभिव्याहृततन्त्रोसत्वादितिवाच्यं। प्रातिपदिकपदार्थाभावबोधकत्वस्य कार्यतावच्छेदकत्वेनाभिप्रेतत्वा
त्। न्यसमर्थस्त विभक्तेरपीति। इदं चोपलक्षणं। षष्ठीतत्पुरुषापेक्षया लक्षणाविरहेति वंधनकर्मधारयलक्षणीयस्त्वं न स्यादित्यपिद्रष्टव्यं
।ततः। राजपुरुष इत्यादिवाक्यात्। उपसंहरति तस्मादिति धवखदिरावित्यत्रेतरेतरद्वंद्वे दि मत्नुपनीतादित्वस्य धवखदिरयोर्न मत्वे
कामन्वयो धवद्वयस्य खदिरद्वयस्य च बोधाभावादिति धवखदिरवृत्तिद्वित्वबोधानुपपत्त्या धवपदे खदिरसाहित्याश्रये लक्षणेति मी
मांसकमतं। दूषयति। ननु साहित्यमिति। तथा च ययोरेवैन्द्रियसंनिकृष्टयोर्धवखदिरयोर्द्वित्वं प्रत्यक्षेण बोध्यते तयापि मत्वर्थापितयो
र्द्वित्वबोधप्रत इत्यनुपपत्त्यभावान्न साहित्यलक्षणेति भावः। तद्व्यक्तत्व साहित्यं सहवृत्तित्वमेकक्रियान्वयित्वं वेति कल्पनाद्वये दोषमाह
।न चेति। द्वितीये दोषमाह। न चैकेति। नहि धवखदिरयोः साहित्यं स्वरूपद्वयातिरिक्तमस्ति ज्ञापयते वेत्याह। साहित्यस्येति। राजपुरोहिता
धिकरणे ओतेन राजपुरोहितौ सायुज्यकामौ यजेयातामित्यत्र राजपुरोहितपदेन षष्ठीतत्पुरुषः पूर्वपदे लक्षणापक्षे नैव कर्मधारयो
वा लक्षणाएव पुरोहितत्वेन वरीतव्य इति श्रवणेन राज्ञः पुरोहितत्वासंभवात्किंतु द्वंद्वस्तत्रापि न कस्यचित्पदस्य लक्षणेति सिद्धांतितं तदपि सा
हित्यलक्षणावादिनो न किंतु नास्माकमित्याह। अत एवेति। नन्वेवं लक्षणाया अभावेन द्वंद्वस्य कर्मधारयात्को विशेष इत्यत आह। विभि
त्ति। निपुर्नतरमुपपद्यतदितमिदमग्रस्तात्। तत्र नीलपदस्येति। तत्र नीलघटयोरभेद इति वाक्ये। नन्वभेद इत्यनुपपन्नं नीलत्वघटत्वयोर
भेदाभावादित्यत आह। अभेद इत्यस्येति। परंपरासंबंधेन। स्वाश्रयवृत्तित्वादिना। तदन्वयात्तत्त्वादनकर्मत्वान्वयात्। एवमिति। परपदेति

सु.टी. वहुत्वैकधर्मेण लक्षणेत्यर्थः। सचैकोधर्मः सेनादावि वद्वि वकृत्वसंख्यापेक्षा बुद्धिविषयत्वं वा। नवीनमतमाह। परे त्विति। ननु समाहाराप्रती
४९ तौ संज्ञाविशेषेण स्याद्विवचनाद्यापत्तिरित्यत आह। समाहारसंज्ञा चेति। अन्यत्र स्वरबोधकाभावे। विरूपैकशेषोपि पितरावित्याद्वैकस्य
पितृद्वयासंभवाद्गत्या लक्षणेत्याह। पितराविति। एवमन्यत्रापीति। ब्राह्मणवात्स्ययोर्यादौ दंपती। एजाद्यकरणे ब्रमाणां स्वरेण ब्राह्म
णीपरत्वात्क्रमेपुमान् स्त्रियेति विरूपैकशेषत्वाद्ब्राह्मणपदे स्त्रीपुंसलक्षणेति भावः। स्वविशिवेनमत्कार्यो इत्यत्र नमस्यशिवं तर
भावात् शिवश्रिवयोर्लक्षणा। भ्रातरौ पुत्रावित्यत्रापि प्रमाणांतरेण स्त्रीपरत्वज्ञाने भ्रातृपुत्रौ स्वसृदुहितृभ्यामिति विरूपैकशेषात्
भ्रातृपदे भ्रातृस्वस्रोः पुत्रपदे च पुत्रदुहित्रोः न तत्र लक्षणेति। वकृत्वान्वयपयोगपाज्ञाने कोपस्थितः शक्तिनस्त्वसंभवादिति भावः। अत एव
वक्ष्यमाणे हेतो रेवानन्वतत्पुरुषइति। स्वीक्रियत इति शेषः। वेदानाधिकारादिति अध्ययनविधिसिद्धज्ञानाभावादित्याशयः। नन
निषादस्थपतिद्याकल्पने गौरवमत आह। लाघवेनेति। तत्संबंधिनि। आसन्निधानमिति। ज्ञानरूपायाव क्ष्यमाणायाः। आसत्तेस्वरूपोक्त्वा
त। संनिधानं तु पदस्यासन्निरितिस्मरतो ऽक्रमासहितलक्षणं। गिरिर्भुक्तमग्निमान्देवदत्तेनेत्यादावनासत्तोपिगतमनो ऽव्याचष्टे। यत्पदार्थे
नसहेति। नशाब्दबोध इति गिरिपदार्थाग्निमत्पदार्थयोः तिंक्तपदार्थदेवदत्तपदार्थयोश्चाव्यवधानेनोपस्थित्यभावादिति भावः। वाक्यै
कवाक्यतास्थलेऽश्रीतरात्तिकपदार्थोपस्थितेर्नव्यवधायकत्वमिति सूचनाय यत्पदार्थेनेत्यादित योदितंपतमन्वयप्रतियोगीत्यर्थकं।
तात्पर्यगर्भेति। पदाव्यवधानतात्पर्यनासन्निरित्यर्थः। मौनिश्लोकादावुच्चारणाभावेन तात्पर्यघटितायाश्चासत्तेरभावप्रसंगादिति। राम
नीलो घटस्त्वव्यवहितापट्योपस्थितिरिति भ्रमादित्यर्थः। ननु नीलोपस्थित्यव्यवहितापटोपस्थितिरिति भ्रमस्यैव पटोपस्थितितयास ४९

त्रिसत्त्वादासत्त्विभ्रमेण शाब्दभ्रम इत्ययुक्तो मतमाह। भ्रमन्त्रेभ्रमेणेति। प्रत्येकवर्णानुभवजनितसंस्कारास्त्वेकपदानि स्मारणीयानि तैस्तत्पदैः
स्मार्यो। प्रत्येकस्मारणी याः प्रत्येककालं तावत्पदार्थस्मृतिस्त्वात्कार्यप्राप्तितो धरत्याशंकयते। नन्विति। नानासंनिकर्षेदिति। नादिजन्मकेन्द्रियसंनिः
कर्षैरित्यर्थः। एकप्रत्ययस्येति। समूहालंबनप्रत्ययस्येत्यर्थः। अन्यथा। नानासंस्काराणामेकस्मृतिजनकत्वाभावो। नानावर्णैरिति।
प्रत्येकवर्णैरित्यर्थः। एकस्मरणं। नानावर्णानुभवाजनितसंस्कारजन्य … स्मृत्युत्पन्न इत्यस्यां तदा …रित्यादि। अत्र हि पूर्वपरिस्थितिः कोपा
तैः प्रत्येकत्रिसंनिहितकालोत्पन्नानां पदार्थानां सामग्रीबोध्य मिश्रमतमाह। परेत्विति। यत्र प्रथमं … चरमपदाद्यस्मरणात्तत्खंडवाक्यार्थबो
धस्तो चत्वाम्य… तद्वधान… चमत्कार वाक्यार्थज्ञानसामग्रीत्त्वखंडवाक्यार्थबोधपूर्वकस्त्वमहावाक्यार्थबोधइत्याह। तथाचेति। खं
डवाक्यार्थेति। अवान्तरवाक्यार्थेत्यर्थः। तथैवेति। अवांतरवाक्यार्थज्ञानेनैवेत्यर्थः। … अवान्तरवाक्यार्थस्थले … तस्य …
नाना विशेषणक विशिष्ट … तु नावांतरवाक्यार्थबोध इति तत्र समूहालंबनस्मृतिनियमइति। … रित्यस्वरसो … एवं …
तु अवांतरवाक्यार्थबोधपूर्वकमाह। वाक्यार्थस्थले … महावाक्यार्थज्ञानार्थं समूहालंबनस्मृतिरपेक्षितेवन वा अवांतरवाक्यार्थज्ञा
नैतत्कारणं तस्याविनष्टत्वादिति। … चैकवर्णात्मकमेकं पदं वर्णान्तरात्मकं च द्वितीयं पदं प्रथमपदप्रत्यक्षानंतरं द्वितीयपदप्रत्यक्षं
तदनंतरं प्रथमपदप्रत्यक्षेण विनश्यता प्रथमपदार्थस्मृतिस्ततो द्वितीयप्रत्यक्षेण विनश्यता द्वितीयपदार्थस्मृतिस्ततश्च विनष्टपदविन
ष्टपदचतुष्टया … प्रथमपदार्थद्वितीयपदार्थस्मृतिभ्यां … ज्ञानं तत्र समूहालंबनरूपपदार्थस्मरणं नापेक्षितमिति। अवांतरवाक्यार्थ
बोधपूर्वकमहावाक्यार्थबोधस्थले … वांतरवाक्यार्थस्मरणमेवकारणं न तु समूहालंबनस्मृतिः। नहि शाब्दबोधे पदजन्यपदार्थोपस्थितिः का

टी॰ शाब्दं। लाघवेनपदार्थोपस्थितेरेवहेतुत्वादतएववाचाध्याहारइतिप्राभाकरमतंदूषयितुमाह। इदंत्विति। पदजन्येति। पदार्थोपस्थितिमात्र
५० स्यशाब्दबोधकारणत्वेघटःकर्मत्वमित्यत्रापिशाब्दबोधापत्तिरितिभावः। ननुतथापिघटःकर्मत्वमित्यादौशाब्दबोधायत्वन्मतेपदस्यापदजन्य
पदार्थोपस्थितेस्तत्रापिसत्त्वादितिवाच्यं। पदजन्यपदार्थोपस्थितेरितिपदस्यान्वयाविरोधिपदजन्यपदार्थोपस्थितेरित्यर्थात्। नन्वन्वयाविरोधि
पदजन्यपदार्थोपस्थितित्वस्यविशेषधर्मस्यकारणतावच्छेदकत्वमपित्वमयविरोधिपदजन्यपदार्थोपस्थितित्वस्यसामान्यधर्मस्यसत्ता
घवादतएवचप्रत्यक्षाद्युपस्थितेनान्वयबोधनंकिंविघातकमतआह। किंचेति। साकांक्षितत्वादिति। क्रियापदादियोग। एवंद्वितीयादि
साधुताप्रयोजकोऽननुतदर्थयोगः घटमानयेत्यादावपिद्वितीयाद्यापत्तेरितिभावः। ननुसाधुत्वार्थंपदाध्याहारेऽपिशाब्दबोधन
तदपेक्षासाधुत्वज्ञानस्यापभ्रंशादौव्यभिचारेणशाब्दबोधाहेतुत्वात्सौंदर्यादिगुणाभिप्रायेणघटइत्याभिधानेसुंदरादिपदाध्याहारानु
पपत्तिश्चेत्तेनपदंविनापिघटपदस्यसाधुत्वादित्यतआह। तथापुष्पेभ्यइति। स्पृहयतीत्यादिस्यादिनाक्रुध्यतिद्रुह्यतिर्ष्यत्यसूयत्यादि
परिग्रहः। चतुर्थ्यनुपपत्तेरिति। पुष्पाणांस्पृहयतिनिरूपितेष्टत्वाभावेनसंप्रदानसंज्ञायाअभावादितिभावः। मतेपदार्थेतत्रतच्छ्रो
नैनैकपदार्थनिष्ठोपरपदार्थएवयोग्यतेतितत्स्वापुत्रंयोग्यतायाःपदार्थस्वरूपत्वाभावादतोव्याचष्टे। एकपदार्थइति। योग्यताज्ञान
स्यशाब्दबोधहेतुत्वेसाधकमाह। तज्ज्ञानाभावाच्चेति। असत्त्वादिति। शाब्दबोधासंभवमसंभवादित्यर्थः। क्वचिदिति। जलंतत्रघटोऽस्तीतिभ्रमस्य
कनिर्णयोत्तरमाविनिश्चयान्वयबोधे। ननुबाधाभावस्यहेतुत्वेनान्यथासिद्धिः। यद्विषयकमनुमित्यादिकंनजातंमाकबोधःघवज्जातस्त राम
त्रतादृशाभाववत्तापेक्षयालाघवाद्योग्यताज्ञानत्वेनकारणत्वकल्पनात्एवंचयद्विशेषयोःसामान्यकार्यकारणभावइत्यादिनाशाब्दे ५०

धमत्रेत ज्ञानं कारणमिति संप्रदायः। ग्राह्याभावनिर्णये नैवायोग्यताज्ञानकाले शाब्दबोधाभावान्नयोग्यताज्ञानं कारणमिति वदन्ती नवीना
स्तन्मतमाह। नव्यास्त्विति। नशाब्दबोध इति। अयोग्यतानिश्चयाभावस्यैव कारणत्वादिति भावः। ननु योग्यताज्ञानमेव हेतुरस्तु लाघवादयो
ग्यतानिश्चयस्य गौरवादित्यत आह। तदभावनिश्चयस्येति। लौकिकसंनिकर्षकाले तद्विशिष्टबुद्धेरनुभवसिद्धत्वादाह। लौकिकेति। भ्रमत्वान
लीढ इति निश्चयेऽपि पित्तादिदोषवशात्पीतः शङ्खः पीत इत्यत्र लौकिकभ्रमस्यानुभविकत्वादाह। दोषविशेषेति। भ्रमसामान्यजनकदोषवार
णाय विशेषेति। बाधनिश्चये सति संशयस्य। अनुदयान्निश्चयत्वमपहाय सामान्यतो ज्ञानत्वं प्रवेशः। ननु विनायोग्यताज्ञानं शाब्दबो
धानुदयाद्योग्यताज्ञानं कारणं स्यादित्यत आह। योग्यताज्ञानेति। [illegible]णेति। संसर्गतात्पर्यज्ञानं तात्पर्यज्ञानविषयसंसर्गज्ञानं
विनिगमनाविरहाद्धेतुः तदेव च योग्यताज्ञानमिति तत्त्वचिन्तामणीयं। योग्यतायाः संशयस्यापि हेतुत्वात्तात्पर्यस्य च निश्चयस्यैव तया ता
त्। वस्तुतस्तु कर्मत्वविशेष्यकनिरूपकत्वसंसर्गकघटप्रकारकबोधे तात्पर्यमित्याकारकतात्पर्यग्रहस्तत्र संसर्गस्य ज्ञानस्यैव विशेषण
त्वात्। नवीनमते यत्राङ्कुरविशेषे शाब्दबोध एव जातो योग्यताज्ञानं पश्चाच्च न जातं तत्रायोग्यताज्ञानाभावकारणमावश्यक
मायोग्यताज्ञानमेव हेतुर्लाघवादित्याचार्यमतेनेत्यस्य योग्यतानिर्णये [illegible] योग्यताज्ञानसत्त्वे शाब्दबोधोदयात्तदेव हेतुर्वाच्य
च [illegible] भावस्य धर्मितावच्छेदकात् भविनैव च नव्यमते हेतुत्वादित्यपाकृतः। येन पदेनेति। यथा यदर्थोपस्थितिस्तत्पदार्थः। घटः कर्मत्वमित्यादौ घटस्व
भावतस्त्वेवानुभावकं स्वतन्त्रतया पदोपस्थितिरिति रेकप्रयुक्तमिति भावः। यत्पदस्येति। यत्पदोपस्थितेरित्यर्थः। अन्वयानुभावकत्वं
तात्पर्यविषयान्वयानुभवजनकत्वं येनाकाङ्क्षा [illegible] त्वमिति भावः। तेन सहेति। तत्पदज्ञानेन सहेत्यर्थः। तस्यात्तत्पदज्ञानस्य। घटेति। घट

परत्वानयेतत्र प्रकारो ह्याकांक्षा भ्रमः तदुत्तरत्वेनानुसंधीयमानविभक्तिर्वाकांक्षा। अत्र संस्कृतपदजन्यत्वमपि कार्यतावच्छेदके देयं। तेनेदु
५१ शानुपूर्वीज्ञानं विनाप्यर्थं प्रत्यवबोधेपि न क्षतिः। तेन तत्पुरुषीय संस्कृतपदजन्यघटीयकर्मतावोधे तत्पुरुषेण घटं पश्येत्याघटीयत्वेन ज्ञातपदोत्तरत्वे
नानुसंधीयमानकर्मत्वीयविभक्तित्वमाकांक्षा एवमानयनप्रकारकत्वे कृतिविशेष्यकशाब्दबोधे आनयनोपस्थापकधातूत्तरत्वाख्यातत्व
तदुपस्थापकप्रत्ययत्वं वाकांक्षा। तेनानेतव्यो घटः इत्यर्थे कर्त्रैकदेशे कृतावानयनान्वयेपि न क्षतिरित्यत्र विस्तरः। आकांक्षाज्ञानं। आकांक्षा निर्व
याकत्वमिति। अन्वयव्यतिरेकाभ्यामिति शेषः। तेन। आकांक्षाज्ञानस्य हेतुत्वेन। इत्यादौ विभक्त्यादिनाजनितान्वयबोधस्यायमेतिपुत्रो
राजपुत्रादेः संग्रहः। नरोऽस्य बोधः इति। निरूपकत्वादिसंसर्गकनरशाब्दबोधस्यार्थः। तेनाभेदान्वयबोधे ह्याकांक्षाज्ञानस्यैव पि न क्षतिः। ननु राज
प्रतिपदं पुत्रेण सह जनितान्वयवोधमपि पुरुषेण सह जनितान्वयबोधत्वात् तत्साकांक्षस्यापत्त आह। अयमेति पुत्र इति। नन्वेवं तात्पर्यज्ञा
नस्यैव हेतुत्वमस्तु शाब्दबोधे किमाकांक्षाज्ञानस्य हेतुत्वेनेति चेत्। आह। एवमुभयत्र सिद्धाः तात्पर्यं द्विविधं राजपदं पुत्रपदेन सहान्वयबो
धजनकमिति पदतात्पर्यं राजपदस्य परपदार्थान्वितराजान्वयतीति प्रतीतिर्मितिपदार्थतात्पर्यं च। तज्ज्ञानमपि न विनिगमकं। अपरपदार्थः पुत्र
वः पुरुषो वेति संशयापातुष्कादादिति पुत्रपदेन सहान्वयबोधजननपरं राजपदमिति पदतात्पर्यज्ञानस्याकांक्षाज्ञानत्वेन हेतुत्वमावश्यकं इदं च
पदतात्पर्यं सैन्धवपदमानयनपदेन सहान्वयबोधपरमित्याकारकं न तत्र विनिगमकं सैन्धवपदार्थस्तुरगो लवणं वेति संशयात् तुष्कादादि
स्वपरपदार्थान्वितलुरगान्वयबोधपरं सैन्धवपदमिति पदार्थतात्पर्यज्ञानं तात्पर्यज्ञानत्वेन हेतुरिति। अन्वयान्वयादुभयस्य प्रतिबंधकत राम
यातदभावरूपाकांक्षास्वरूपसत्येव हेतुर्न ज्ञातेति चेन्न। एवं प्रायव्यतिरेकोऽयत्र प्रतिबंधकीतन्निश्चय तत्र हेतुरिति वा। स्याकांक्षा ५१

निर्णयस्य हेतुतासिद्धेः। अत्र प्राञ्चस्तु केचित् तथाप्यनाकांक्षाज्ञानस्य प्रतिबंधकत्वं तया तदभावस्यैव हेतुर्नाकांक्षा। निश्चय इति अत्र चिन्तामणिः। आ
तःत्वाद्यवेनाकांक्षानिश्चय एव हेतुरनुमितावव्यभिचारनिश्चयवत् किंचाकांक्षानिश्चयः हेतुत्वं विना निराकांक्षत्वाज्ञानस्यैव प्रतिबंधकत्वाभावः
ग्राह्याभावानवगाहिज्ञानस्य जनकज्ञानविघटनद्वारैव प्रतिबंधकत्वादिति। शाब्दबोधे एतद्वाक्यं एतदर्थसंसर्गप्रतीतीच्छयानेन वक्त्रानु
संहितमित्याकारकतात्पर्यज्ञानस्य हेतुतां व्यवस्थापयति। यदीयेति। यदितात्पर्यज्ञाने क्वचित्वेति। इदमुपलक्षणं क्वचिदुभयोरित्यपि बो
ध्यं। इति न स्यादिति। इति नियमो न स्यादित्यर्थः। प्रकरणादीनामिति। अत्र चादिपदेन संयोगविप्रयोगसाहचर्यं विरोधिता। अर्थः प्रक
रणं लिंगं शब्दस्यान्यस्य सन्निधिः। सामर्थ्यमौचिती देशः कालो व्यक्तिस्वरादयः। शाब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः इत्यनेनोक्तानां संयो
गादीनां परिग्रहः। तात्पर्यव्याप्यत्वेन ज्ञातत्वमेव कारणतावच्छेदकमित्यभिप्रेत्याह। तात्पर्यज्ञानेति। तात्पर्यज्ञानेति तात्पर्यवशादेव चकारमि
त्यादौ कदाचित् घटे कदाचित् घटप्रसङ्गादिपदाध्याहारः। स चाश्रुतपदानामनुसंधानं। अत एव सर्वार्थेदयाजघनात् व्यवहितः स्वस्थाना
स्थितस्य पुनरनुसंधानमाहुः। नेदीयःस्थानान्तरस्थितस्यानुसंधानमनुषंगः दवीयःस्थानान्तरस्थितस्यानुसंधानमनुवृत्तिरिति च सिद्धवल्लौकि
तमङ्कवाद्युतिगगास्त्रोतोभेदान्विधेति। इदमत्राकलनीयं। पदसंधिः एकवेपदमस्यत्वं वर्णोभयपरतया भिसितिश्रोत्रा चोभयान्वयपरतया च ग
मं। तत्रोभयान्वयबोधस्यैकदेववदपदं युगपदिमावर्थौ बोधयत्विति तात्पर्यज्ञाने उभयपदार्थोपस्थितेः। न च समूहालंबनरितास्तत्पदार्थप्रत्यय
सु तत्पदेरेकपदं एकदा एकमात्रानुभवकमिति व्याप्तेश्च न पदे वसत्तस्य यातात्पर्येण नवाक्येषु तस्या तात्पर्यज्ञानमिति वाच्यं पुष्पवंतादिपदेषु
त्यत्रिव्याप्योर्व्यभिचारात्त्रैवकदेयोभयान्वयबोधात्। न च यत्रैकोच्चारणं तभावेन शक्तिः सदन्यपरा कुत्रचित्रिर्था। ज्ञिप्स्येतिवाच्यं। अप्रयोजकत्वा

त्र। एकमात्रानुभवपरवाक्यपरतयैव स्मृत्यादिवाक्योपपत्तेः। ध्यासैमात्रांतर्भावेनगौरवात् उभयतात्पर्यके क्रमेणान्वयबोधेवि। निगम
५२ नाविरहाच्चेति। इत्थं चेति। तात्पर्यज्ञानस्य शाब्दबोधहेतुत्वसिद्धावित्यर्थः। तात्पर्यज्ञानार्थी। तात्पर्याधीनशाब्दप्रामाण्यसिद्ध्यर्थं वा
त्यपत इति। अन्वदीयतात्पर्यस्यासंभवादिति भावः। तत्र विदस्थले। तात्पर्यज्ञानमिति। कारणमिति शेषः। आगमेति। नाहीनपात्रेने
नभोनभूमिर्नासीत मोन्नोतिरन्तरन्न चान्वदित्याद्यागमेत्यर्थः। इत्थं च। तात्पर्यज्ञानस्य शाब्दबोधे हेतुत्वे सिद्धे च। शुकवाक्येपि सं
वादि शुकवाक्यजन्यशाब्दबोधेपि तत्रसीति। स्मरणे इत्यर्थः। आगमेति। अनुभवत्वेन कारणत्वमित्यर्थः। स्मरणोत्तरं। स्मरणं च सत्त
तोष्णु। स्मरणानुत्पत्तौ हेतुमाह समानप्रकारकेति। ज्ञानत्वेन कारणेतावदिनस्तोकवाप्यनुपपत्तिरित्याह। मन्मत इति। तेनैव प्राथमि
कैनैव। यत्र घटपटत्वं भविष्यप्रकरणकसमूहालंबनानंतरं घटपटत्वं भक्तितावविषयकसंस्कार। ततः क्रमेण घटादीनां स्मरणं तत्रैकक्षा
न्नायायाघटस्मृतेः संस्कारनाशकत्वे पटादीनां स्मृतिर्नस्यादेतच्चरमस्मृतिरेव संस्कारस्य नाशिकावाच्या एवं स्मृतिजन्यानंतसं
स्कारकल्पनमित्यनुभवत्वेनैव कारणत्वं वदन्मतेत्यादि। नानानुभवस्थलं एकानुभवजन्यसंस्कारनाशोप्यनुभवांतरजनित
संस्कारादेव स्मृत्यंतरोत्पादः स्यादतः समूहालंबनयथार्थतानुधावताघातस्येति। क्रमिकस्मरणस्येत्यर्थः। प्रथमस्मरणेनैव समूहा
लंबनसंस्कारनाशात् उत्तरतद्विषयात्स्मरणानुपपत्तेरिति भावः। कालस्य रोगस्येति। च दृष्टांतार्थे यथा कालो रोगो वा संस्कारनाश राम
कस्तथा चरमस्मृतिरपि नाशिकेत्यर्थः। न च कालरोगयोर्नाशकत्वे प्रमाणाभाव इति वाच्यं। रोगाच्चिरकालाद्वानुभवविषयाविषय ५२
कस्मरणाभावस्यैव एकसकलतो लोकानुभवसिद्धत्वात्। ननु चरमस्मृतेर्न संस्कारनाशकत्वं कालरोगजन्यसंस्कारनाशव्यभिचारा

दिति चेन्न। विजातीयसंस्कारस्यैव नाशकत्वेनाभिप्रेयत्वात् केचित्तु कालादेर्न संस्कारनाशकतानुरोधात् कविरहेणैव स्मरणविरहसंभवेन
स्मृत्यनापत्तेः संस्कारो न विनाश्यतामाहुः। ननु संस्कारस्य स्मृतिनाश्यत्वे क्षणिकतापत्तिः संस्कारोत्पत्तिद्वितीयक्षणेन नाशकायाः स्मृतेः
सत्त्वादिति चेन्न प्रतियोगितासंबंधेन संस्कारनाशत्वावच्छिन्नं प्रति फलीभूतयत्किंचित्तासंबंधेन स्मृतेर्नाशकत्वात्। स्वाव्यवहितोत्तर
वर्तित्वस्य नाशकतावच्छेदकसंबंधत्वस्य एकस्यैव स्मृत्यात्मगतनिर्विकल्पसंस्कारनाशापत्तिरिति कृतं पल्लवितेन। तथा चेति। चर
मफलस्य नाशकत्वे चेत्यर्थः। स्वजन्यसंस्कारसंबंधेन पूर्वानुभवस्य सत्त्वादिति भावः। इदं स्मृतिप्रयोजको जातिविशेषस्तद्वाहि
न्नं च पुनः पुनः स्मरणे स्वं च स्वजन्यसंस्कारसंबंधेन स्मृतित्वविशिष्टं स्मृतित्वमिति केषांचिन्मतं दूषयति नचेति। कुवितीति। इष्टिसु
धकं स्यपरसापेक्षतयातिरिक्तो दाऽखपदार्थप्रमाणाभाव इत्यर्थः। नाहित्तत्र स्मृत्यपेक्षप्रमाणं तस्यातीन्द्रियत्वादिति भावः। सामान्यधर्मेण
तिरिक्ततिप्रसक्तरूपेणैव कारणतायाः संप्रदायसिद्धत्वादिति भावः। अन्यथेति। सामान्यधर्मेण कारणत्व इत्यर्थः। अनुभवत्वेन का
रणतायां प्रतिबंधकं व्यभिचारसंभवान्निषेधनि। नचांतरालिकेति निरूपितमिति। लक्षणस्वरूपादिभिः कथमितर्भिन्नमित्यर्थः। आ
त्मेति। प्रथमं लक्षणमाहेत्यर्थः। एतेनेति। सुखादिसाक्षात्कारादिषु सकारणत्वं सिद्धं प्रातःसिद्धसाधनतापादत इत्येवेति। सक
रणकमिति। इंद्रियरूपकरणकमित्यर्थः। तेन नात्मना शरीरेण अर्थांतरसिद्धसाधनं वा। भगवत्साक्षात्कारे व्यभिचारवारणायाह
जन्येति। करणस्य। इंद्रियरूपकरणस्य। करणस्येत्यनंतरं सिद्धौ तस्य गंधादिग्राहकसंनिकर्षप्रतियोगित्वनायाथित्वसिद्धौ चे
तिशेषः। एतत्तु मानस्याप्रयोजकतामाशंक्याह। एवमिति सुखादीनां किंचिदसमवायिकारणमवश्यं वक्तव्यं भावकार्यत्वात् सास

मु.टी. मवायिकारणत्वनियमात्। तच्चापरिसंस्कात्सुखादिकं संयोगासमवायिकारणकहत्त्रिगुणत्वव्याप्यजातिय। विभुविशेषगुणत्वात् नित्य
५३ दृष्यानित्यविशेषगुणत्वाद्वा प्रत्यवत्याकजरूपादिवच्चेत्यनुमानाच्च संयोगस्य तदाश्रयतया मनःसिद्धिरित्यर्थः। मतसो विभुत्वेवा
धकमाह। विभुत्वेवेति। तदानीं। विषयासंबद्धकाले। तथा सतीति। अदृष्टविशेषस्यैव कारणत्वे सतीत्यर्थः। तत्रापाद्यादीत्यादिवे
53 त्यन्निपरियदः। शिरोमणिमतं त्वनानारूपाणि। एकचित्रपस्य यत्तु नानात्वपवहस्ता घनेकाद्भ्यसंयुक्तपदाविवश्वमष्टवा। अतए
वलोहितेत्यस्य वर्णानि सुखेपुच्छे चपांडुरः। श्वेतः खुरविषाभ्यांसनीलो हषकृष्यतमतिमा[illegible]त्र्यता रूपकोस्याद्यो[illegible]वसारम्भ
पपद्यते। एवंस्पर्शेप्यव्याप्यवृत्तिः। अतएव सुकुमारकठिनाभ्यामारब्धेवयविनि सुकुमारावयवावच्छेदेन त्वक्संयोगे कठिनस्याप
त्तांभप्रसंगः। नचसुकुमारत्वकठिनत्वेसंयोगविशेषावितिवाच्यं। चाक्षुषत्वापत्तेरिति। रूपादिभिन्नाचार्यास्तु। तत्रतत्रावयवि
ष्वव्याप्यवृत्तिनीलादिचित्ररूपरसगंधस्पर्शाश्च पिठरा[illegible]। चित्ररूपाद्याकारानुगतप्रतीतेश्चित्ररूपत्वादिजातिमंतरेणोपपाद
यितुमशक्यत्वात् विजातीयनानारूपवत्वादेरननुगतत्वात्। अनुगतप्रत्ययाय नीलपीतेनीलत्वादेरपि दिक्लोपप्रसंगादित्याहुः। जत
प्रमाणमित्यादि[illegible]तते सन्निकृष्टेसंतं निगदव्याख्यात। प्रक्रियेति। निरूप्यतइतिशेषः। तद्वदाकारे। विभागजविभागमंकारेतिर
वेदस्येति। विभागस्येतिशेषः। आरंभकसंयोगेति त्वे विभागजनकत्वे। परमावांतरेणविभागइति। परमाणोरितिशेषः। आरंभ
कसंयोगेति। आरंभकपरमाणुद्वयसंयोगस्येत्यर्थः प्रांकते। तथापीति। ततोविभागइति। विभागः परमाणुद्वयविभागः आरंभकसं राम
योगेति परमाणुद्वयसंयोगस्यार्थः। द्व्यणुकनाशेत्यादि नाऽथर[illegible]द्वितीयेस्वेसं ५३

योयस्तुयावत्ततोपरदेशसंयोगश्चतुर्थे परमाणुकर्मनाशः पंचमे ह्युत्तरचात्मसंयोगवशाद्द्व्यणुकांतरारंभिकापरमाणौ क्रियाच
तुपरमाणुपूर्वदेशविभागः सप्तमे परमाणुपूर्वदेशसंयोगनाशोऽष्टमे परमाण्वोरारंभकसंयोगोनवमे द्व्यणुकस्योत्पत्तिर्दशमेतद्
यस्योत्पत्तिरितिदशक्षणेतिप्रक्रियामुत्पाद्यप्रथमेक्षणे द्व्यणुकनाशो द्वितीये विभागजविभागस्तृतीये पूर्वसंयोगनाशश्चतु
र्थेत्तरसंयोगः पंचमेकर्मनाशः षष्ठे द्व्यणुकांतरारंभिकास्तमेविभागः अष्टमेपूर्वसंयोगनाशः नवमे परमाणुद्वयसंयोगोदश
मेद्व्यणुकं। एकादशेतद्रूपादिरित्येकादशक्षणं। प्रक्रियामुत्पादयति अथैकादशक्षणेत्पादिन्यां ततो रक्तादीत्पत्तेनग्रंथेन। अत्र
कत्रपरमाणौ द्व्यणुकनाशिका क्रियायामा एवंततरे द्व्यणुकांतरोत्पादिकेतिमतेनपंचषट्सप्तक्षणं। प्रक्रियांप्रदर्शयति। परमाणुं
तरेकर्मचिंतनादिनि। अथपरस्तोस्यनिरितीति। अथपंचमक्षणे। तथाहीति। अथद्वितीयक्षणे। अथतृतीयक्षणे। ततः। चतुर्थक्षणे।
रक्तोत्पादिकं। ततो द्व्यणुकोत्पत्तिरिति। ततः पंचक्षणपरस्परयः। तेषां नैयायिकानां अयंवक्ष्यमाणः। इत्यच। अवयवे अवयव्याकार्यी
कारेमत्यभिदेतिसमासरूपेतिशेषः कालादावतिप्रसंगवारणायाह। गगनञ्चवृत्तारासाधारणमिति। द्वित्वादपरत्विति। नित्यवृत्ते
कारेमत्यसंख्यामात्रमपेक्षाबुद्धिरूपनिमित्तकारणजन्यमित्यर्थः। सदाचार्यास्तुसुखादिसाक्षात्कारइंद्रियप्रयोजन्यसाक्षा
त्कारत्वादिसनुमानान्नमतःसिद्धिरिंद्रियत्वस्यमनोनाश्रयत्वात्तदसिद्धेःसाध्याप्रसिद्धस्वभावकार्याणांसमवायिकारणत्वा
नियमयोनाभावानांनुमानांतरादपि एवंचमनसोसिद्धौकारणत्व — — रतस्त्वेनचैवंयुगपज्ज्ञानोत्पत्तिरसनास्यात्तिःस्या
दितिवाच्यं। इष्टापत्तेः कथमन्यथारूपादिस्पैवादिकेपरस्परतोजातायामीतादिकमुत्सायायासत्पवचपाठवेगीतादिश्रवणं। कुत्र

मु.टी. सा दृष्टादितिचेन्नात्मैव बुभुत्सा मनसः। क्रियादिकं कुरुते। नह्येवं बुभुत्सायामहमिमायदसौ न यन निमन्नमयिमन। समाहृत्य स्व
५८ ण विचरत्येवस्याप्यते विनैव चा मनः संयोगं साक्षात्कारः। सत्यां बुभुत्सायामभिमतबोधकारणमनःसंयोगार्थं मनोऽस्य नाडी।
प्रयत्नो जायते तया नाडीतं च मनः क्रमेण तेन तेनेन्द्रियेण संबध्यते ततस्तद्बुभुत्सितोऽर्थबोध इति चेन्न क्रियासरा अपि इन्द्रियम
नःसंयोगस्य कारणत्वविदं ति असरणेन त्वां किमिदानीमस्यानाडीमनोदिष्वलसंयुज्यते च तेनेन्द्रियेण दर्शनोदनादिनेति
निश्चितं। तस्माददृष्टवशादेव व्यासंगादौ ज्ञानोत्पादनियमः अथवा दीर्घतिवादेव परमाणवो मनांसि तेन न मनसोऽस्ति
किंचन सर्वं परिस्तीत्यादिष्कातिविरोधः अनंतधर्म्यातिरिक्तोज्जानि कल्पना गौरमपि शतिवदंति॥ इति श्री भारद्वाजभट्टवात्त
सुस्यातान्नमहादेवनहस्तोभिरु कावली प्रकाशस्य तृतीयपरिच्छेदः समाप्तिमगमत्॥ इदं पदार्थमेव दर्शयति। द्रव्येति। ननु रूप
त्वस्य सत्तायां वा गुणनिष्ठकारणबोधकत्वस्यादिस्यांशकाह। नहीति रूपत्वादित्यादिना रसत्वादिपरिग्रहः। कर्मादावितिआ
दिना सामान्यपरिग्रहः। स्तद्भये लक्षणसत्त्वं प्रतिपादयति। भवतीति। द्रव्यत्वेति। द्रव्यत्वस्य यावद्गुणनिष्ठव्यापकता तस्या अवच्छे
दिकानुसंरहृतिः सत्ताभिन्नायद्गुणत्वजातित्वमित्यर्थः द्रव्यत्वव्यापकतावच्छेदके त्यस्य फलमाह द्रव्यत्वमिति। जा
तिपदस्य कृत्यमाह। द्रव्यत्वत्वमिति। सत्तान्यजातिमादाय द्रव्यादावतिव्याप्तिवारणाय सत्ताभिन्नेति। सत्यंतयोर्विशेष्यस्य च फ राम
लमाह। जात्यादीनामिति। तत्रातेषु। एते मूर्तगुणा इति। मूर्तगुणत्वं च मूर्तगुणावृत्ति संस्कारत्वान्यगुणत्वव्याप्यजातिमत्त्वमू ५८
र्तत्वं। अत्र च मूर्तत्वं तेन संख्यादेर्बुद्ध्यादेश्च व्युदासः। वेगस्थितिस्थापकोपग्रहणाय संस्कारत्वान्येति। एते अमूर्तगुणा इति। अमूर्तगुण

न्वे च मूर्त्तगुणवृत्तिसंस्कारत्वान्यगुणत्वव्याप्यजातिमत्त्वं। अमूर्त्तत्वं तेन संख्यादिरूपादिषु दासः। उभयेषां गुणा इति। उभय
गुणत्वं च कालवृत्तिद्वित्वादिगुणसत्त्वव्याप्यजातिमत्त्वं। अनेकाश्रिता इति अनेकाश्रितत्वं च स्वाश्रयप्रतियोगिकान्योन्याभावसमानाधि
करणगुणत्वं। एकैकवृत्तय इति। स्वाश्रयान्योन्याभावव्याप्यकात्यंताभावप्रतियोगिन इत्यर्थः। विशेषगुणत्वं च संस्कारत्वान्यवायुवृत्ति
स्पर्शावृत्तिधर्मसमवाय्यन्यत्वे सति गुरुत्वजलद्रवत्वान्यगुणत्वं अत्र षट्। पदार्थावारणाय सत्यंतं। भावनासंग्रहायाद्यमन्यांतं। स
न्नादिकमादायासंभववारणाय स्पर्शावृत्तीति। द्वीन्द्रियेति बहिरिन्द्रियं … ग्राह्यगुणत्वव्याप्यजातिमंत इत्यर्थः। संख्यात्वादेस्त
नु सत्वगुणयग्राह्यत्वात्संख्यादेः संग्रहः। अकारणेति। स्वारंभक … करणसमवायिकारणजन्या इत्यर्थः। कारणगुणेति। जन्य
त्वे सति स्वाश्रयसमवेतजन्या इत्यर्थः। मुक्तावल्यां मूर्त्तगुणा इत्यादि। कर्मजन्यवृत्तिगुणसत्त्वव्याप्यजातिमत्त्वं वा ध्यामित्यतस्तु गमनाद
तमन्यत्रापीति। अयथार्थादेरिको भवेदित्यादिमूलेन संयोगादिरूपविशेषगुणानाम आप्यवृत्तित्वरूपसाधर्म्यप्रदर्शनात्मे
तत्रापि स्वसमानकालीनस्वाभाववत्समानाधिकरणगुणत्वमित्यर्थो बोध्यः यथा … इत्यर्थः। द्विविधं का
रणत्वं प्रदर्शयति। तथाहीत्यादिना। एवं नीलत्वादीत्यादिना चित्रत्वादिपरिग्रहः। अन्यथा नीलादीनामेकव्याप्तिकत्वे नचेतत्सा
वादेव नीलादीनामतत्त्वैकस्येत्यत इत्याह। लाघवं त्विति अन्यथेति। लाघवादेकमात्रोपगम इत्यर्थः। ननूत्पन्नो घटो न षो
ष्ट इति प्रतीतेर्घटादेरीकं न भविष्यतीत्यत आह। उत्पादेति। एतेन। प्रत्यक्षप्रमाणोपदर्शनेन नीरसादिकी। रसत्वादिकमित्यर्थः। अ

दिनाम भुरतदवांतरजात्यादिपरिग्रहः॥ संयोगादावति व्याप्तिमाशंक्याह। चक्षुर्ग्राह्यमतीति चक्षुर्ग्राह्यमित्यस्येत्यर्थः॥ तेन चक्षुरिति
प्रावयुतीकियत्वेपि न क्षतिः॥ अप्रत्यक्षत्वप्रसंगादिति। द्रव्यचाक्षुषादौ समवायसंबंधेनोद्भूतरूपस्य हेतुत्वादिति भावः॥ व्याप्यवृत्तिजा
तीयेति। व्याप्यवृत्तिजातिमत्त्वस्य विषयावृत्तित्वं विवक्षितम्। तेन व्याप्यवृत्तौ स्वरूपज्ञानजातीयस्यासंभवदादिज्ञानस्याव्याप्यवृत्तित्वेपि न क्षतिः।
ननु चित्ररूपस्याधिकरणेवयववृत्तिनीलादिभिः कुतो नीलादीनि नोत्पद्यंते तत्राह। इत्थं चेति। चित्ररूपसिद्धिं न क्षतिः॥ ननु
चित्ररूपाधिकरणेवयववृत्तिनीलादिभिः कुतो नीलादीनि नोत्पद्यंत इत्याशंक्याह। इत्थं चेति। चित्ररूपसिद्धौ चेत्यर्थः॥ प्रतिबंध
कत्वेति। समवायेन पीतादिकं प्रति स्वाश्रयसमवेतत्वसंबंधेन प्रतिबंधकत्वकल्पनाद्य इत्यर्थः॥ एतेनेति। स्पर्शेपि चित्र इत्यर्थः॥
स्पर्शेपीत्यत्रापि संग्राह्यम्। तथा रसादौ त्वादिना गंधपरिग्रहः॥ किं तर्हि चित्ररसः स्वीक्रियतइत्यत्राह न किंत्विति। ननु कथं तर्हि चित्रा
वयविनि तिक्तादिप्रत्यय इत्यत आह। रसवत्येति। तथा च परंपरयावयववृत्तितिक्तादिकमेव विषयीकरोतीत्याशय इति भावः॥ ननु नीरस
वन्नीरूप एव पर्यवसरीक्रियतां। केन चावयविनो प्रत्यक्षत्वायत्वेपि तिवाच्यम् समस्त्वे सत्युद्भूतरूपवत्समवेतत्वस्यैव द्रव्यचाक्षु
षत्वे प्रयोजकत्वादिति चेन्न। चित्ररूपावयवारब्धेऽवयविनि रूपवत्समवेतत्वाभावात्। रूपवत्समवेतत्वापेक्षया रूपवत्त्वस्य ल राम
घुत्वाच्चेत्यभिप्रायेण व्याचष्टे। अव्याप्यवृत्तेर्व्याप्यवृत्तिजातीविरोधमानाभावाद्व्याप्यवृत्तीत्येवमवापि कारणं तु सर्वत्रैकत्वमे
वेति बोध्यम्॥ ननु येन पादित्वादवेवापेक्षाबुद्धिस्तु रसकुलोतादियद्वित्वादन्देतुत्वकृतिचेन्न योग्यवृत्तित्वादपेक्षाबुद्धिजन्यत्वं ५५

तींद्रियद्रव्येषु सर्वदा द्वित्वादिधीरोत्पादापत्तेः। अथापेक्षाबुद्धेर्हेतुत्वेपि कथमविरलक्रमेण यावदपेक्षाबुद्धिसत्वं तद्द्वित्वाद्युत्पत्तिः। अत्र केचि
त्समादधिरे। अपेक्षाबुद्धेरुत्पत्तिसंबंधेन हेतुत्वात् यावदपेक्षाबुद्धिसत्वं द्वित्वाद्युत्पत्तिरिति। नितान्तरमणीयमाचार्याः कापेक्षाबुद्धिभिः सर्वत्र
धारावाहिकद्वित्वाद्युत्पत्तेर्दुर्वारत्वात् भगवदपेक्षाबुद्ध्या धारावाहिकद्वित्वाद्युत्पत्तेर्दुर्वारत्वाच्च। तद्बुद्धेर्नित्यत्वेनोत्पत्तिसंबंधेन तद्धेतुत्व
स्य दुर्वचत्वात्। वस्तुतस्तत्तत्पुरुषीयापेक्षाबुद्धिजानेकसंख्यात्वावच्छिन्नं प्रति तत्पुरुषीयापेक्षाबुद्धिजानेकसंख्यादेः प्रतिबंधकत्वो
पगमान्न यावदपेक्षाबुद्धिसत्वं द्वित्वाद्युत्पत्तिरिति। द्वित्वादिसंबंधस्य पर्याप्तिरूपस्य समवायादिसंबंधातिरिक्तत्वे प्रमाणमाह। यद्य
पीत्यादिना। ध्वन्यत इति। द्वित्वमात्रस्यापि तदुत्पत्तेः। तदुत्पादिका। द्वित्वोत्पादिका। तन्नाश्यः। अपेक्षाबुद्धिनाश्यः। तन्नाश्यः। तन्नाश
कः। द्वित्वादिनाशकः। तेनैवात् तत्पुरुषीयो वा द्वित्वप्रतीतिः। समवायसंबंधेन द्वित्वोत्पत्तिप्रतिविरोधितासंबंधेनापेक्षाबुद्धेर्हेतुत्वादि
त्यर्थः। ननु द्व्यणुकादावतीन्द्रिये द्वित्वाद्युत्पत्तिर्न स्यात् तत्र मदाद्यपेक्षाबुद्ध्यभावादत आह। द्व्यणुकादाविति। द्व्यणुकस्यादिविति मुत्पत्त्या
द्व्यणुकादिपरिमाणजनकपरमाणुरिति वदन्तीति। अतीन्द्रियस्येति। सर्गादौ योगिनामभावादाह। सर्गादाविति। ननु तथाप्यतीन्द्रियस्थले कथं योगिना
मपेक्षाबुद्धिः। नु किंचिच्छरीरीयापेक्षाबुद्धिर्द्वित्वादिकारणं मिथ ननुगमात् अत आह। ब्रह्माण्डेति। ननु द्वित्वत्रित्वादिकं जातिरेवास्तां अपेक्षा
बुद्धिविषयत्वकालीनपर्वादाश्रयसन्निकर्षादेव देशाश्रयद्रव्यादिप्रत्यक्षात् न च व्यासज्यवृत्तित्वमेव तस्य जातित्वबाधकं जातेरव्यासज्यवृत्ति
त्वादिति वाच्यं। तादृशनियमस्याप्रयोजकत्वात्। न च द्वित्वत्रित्वादेर्जातित्वे परिमाणत्वसमवायिकारणत्वं न स्यात् असमवायिका
रणत्वं गुणकर्मणोरेवेति नियमादिति वाच्यं। तादृशनियमे प्रमाणाभावात् इति चेन्न तावता तद्द्वित्वादिकं न जातिर्व्यासज्य
वृत्तित्वादेतत्वमपि न जातिज्ञाने सत्येवोत्पत्तेरिति वस्तुतस्तु द्वित्वमुत्पन्नं द्वित्वं नष्टमित्यादिप्रतीतेः विद्यमानत्वेन तस्य जातित्वासंभवात्

मु०
॥५६
56

द्वित्वादेर्जातित्वे यावदाश्रयसंनिकर्षविरहेपि प्रत्यक्षतापत्तिः । आश्रयासत्त्वेपि नित्यगुणत्वं जातिविशेषाश्रयप्रत्यक्षे यावदाश्रयसंनिकर्षादे
रपेक्षितत्वात् बहुत्वं चैकत्वद्वित्वादप्यतिरिक्तं ज्ञातं । जातिविशेषस्त्रित्वादिव्याप्यपर्यंतत्वहेतुत्वात्स एकत्वबहुत्ववचनप्रवृत्तिनिमित्तं अत एव
बहुत्वप्रत्यक्षे त्रित्वादिसंशयः । एतेन बहुत्वं त्रित्वादिवत्संख्यांतराभिमतिका रल्लीवारमतमपास्तं । उक्तरीत्यैवोपपत्तावतिरिक्तकल्पने गौ
रवात्मानाभावाच्चेति दिक् । मानव्यवहारकारणं इति यथाश्रुतं कात्त्वादपत्तिमाशंक्यासंगतमतो व्याचष्टे । परमिता ति । अणि्वति । अ
णुत्वह्रस्वत्वे दीर्घत्वमहत्त्वे च समनियतमिति ध्येयं । तत्प्रत्यक्षे चावधिज्ञानं कारणं । अस्माद्दीर्घोस्मान्महानिति व्यवहारात् के चित्तु दीर्घ
त्वादिर्जातिर्ह्रस्वदीर्घादिव्यवहारे च अवधिज्ञानं हेतुरित्याहुः । महत्त्वे नित्ये नित्यमुदाहृत्य प्रचयादेर्जायत इति चोक्तं । तत्र किमित्याकांक्षायाः
सत्त्वात्प्रसंगेनाव्याचष्टे । नित्यमित्यत्रेति । तत्रातेरणुमध्येऽणुत्वं ह्रस्वत्वं च द्व्यणुकस्य कृत्स्नमाह । द्व्यणुकादाविति । सजातीयद्व्यणुकस्य प्रकृतमाह । त्रसरेणाविति
महत्त्वे संख्यावदित्यत्र वा तिनाशात्कस्य पूर्वोक्तं तदेव स्पष्टयति । नित्यतादिकमित्यादिना तथैवेति । नित्य एव पृथक्त्वं नित्यमनित्ये च तदनित्यमित्य
र्थः । द्वित्वादिवदिति । यथा चवसर्वादि द्वित्वादिकमिति तथा पृथक्त्वादिकमपीति नियमे वैसादृश्यः । परंपरासंबंधः । स्वाश्रयसमवेतत्वरूप
पः । अपसंसरतीति । तस्मादिति । न च व्याप्तः । पृथक्त्वमन्योन्याभावः । ननु गुणांतरं । नैवं पृथक्त्वं वाच्यकपदोत्तरं पंचमीविधानात् घटात्पटः
पृथगिति वघटात्पटो नेत्यपि स्यादिति वाच्यं । पृथग्विनानाभिः तृतीयान्यतरस्यामित्यादिना तु विशेषयोगे चतुर्थ्याद्रव पृथगन्यादिशब्दविशेषयोग एव पंच
म्यादिविधानेनानतिप्रसंगात् । नत्रोगेपचम्याः सासुत्वादेत्याहुः । महत्ते अन्योन्यमतरकर्मज इति । ननु संयोगत्वेनान्यतरकर्मणः
कार्यतावच्छेदकं । उभयकर्मजसंयोगसंयोगसंयोगे व्यभिचारादिति चेन्न । विजातीयकर्मत्वेन विजातीयसंयोगत्वेन समवायेन हेतुहेतुमद्भावा
त् । उभयकर्मजसंयोगादेश्च तादृशवैजात्याभावेन व्यभिचाराभावात् । वियोगो न गुणांतरमानाभावादिति ये मन्यंते तान्प्रति दूषणं वक्तुं विभा राम ५६

गात्वलक्षणं प्रदर्शयति विभक्तप्रत्ययेति। अथ विभागे मानाभावः न च विभक्तप्र- तीतेरनुपपत्तिरिति वाच्यं। तस्याः संयोगनाशविषय
कत्वेनैवोपपत्तेः। न च संयोगनाशो विभागो विभागप्रागभावो वा संयोग इत्यत्र विनिगमकाभावाद्विभागसिद्धिरिति वाच्यं घटयोर्यो विभक्त
देशावस्थानादिप्रत्यायामविभावि विभागप्रागभावमादाय संयुक्तप्रत्ययप्रसंगादिति। अत्र समाधिं बुद्धिमनोपाध्यायचरणाः अपमस्मा
द्विभक्तप्रत्ययबाधितोक्तो विविक्तप्रत्ययानुपपत्या अतिरिक्तविभागसिद्धिः। संयोगनाशस्यासत्प्रतियोगित्वेऽपि सावधित्वाभावात्। तस्यापि सावधि
त्वे अस्मात्संयोगनाशवानिति प्रतीत्यापत्तेः। न त्वप्यमेतस्माद्विभक्तप्रत्ययस्यायमेतत्समवेतसंयोगनाशवानित्येवविषयो न त्ववधित्वमिति वा
च्यं। अनुभवविरोधादिति। तेनैव कर्मणेति। घटारंभकसंयोगप्रतिद्वंद्वि कर्मणेत्यर्थः। अन्यथेति। कमलदकर्मणानारंभकसंयोगप्रतिद्वंद्विविभा
गस्येवारंभकसंयोगप्रतिद्वंद्विविभागस्यापि जननं स्यादित्यर्थः। उपसंहरत्यतदतिदैशिकपरत्वस्य निमित्तकारणमाह। वकुत्तरेति। अत्र समवा
यिकारणं तु दिक्पिंडसंयोग इति बोध्यं। दैशिकापरत्वस्य निमित्तकारणमाह। एवमिति। अत्राप्यसमवायिकारणं दिक्पिंडसंयोग एव। त्वेय
त्वकनिष्ठत्वयोर्न तृतीयापेक्षा त्वहानं ज्येष्ठो राघो रामात्कनिष्ठो लक्ष्मण इत्येव व्यवहारादिति दैशिकपरत्वापरत्वस्थल एव तृतीयापेक्षा
ह। अत्रावधित्वार्थमिति। न चायं पुनर्बहुतरसंयोगान्तरितत्वरूपविप्रकृष्टत्वाल्पसंयोगान्तरितत्वरूपसन्निकृष्टत्वाभ्यां दैशिकपरत्वादिव्यवहा
रस्य बहुतरस्पन्दान्तरितजन्यत्वरूपज्येष्ठत्वाल्पतरसंयोगान्तरितजन्मत्वरूपकनिष्ठत्वाभ्यां च कालिकपरत्वादि। व्यवहारस्योपपत्तेः न तयोर्गु
णान्तरत्वं। यत्र च यत्काले ज्येष्ठत्वबुद्धिस्तत्र तत्काले तत्कालमादाय स्पंदसंबंधस्य नाधिकता वसेयातो न कनिष्ठे चिरजीविनि परत्वव्यवहारापत्ति
रिति वदंति। तदभाववतीति द्वंद्वं च ममायामतिव्याप्तिवारणाय। तदभाववद्वृत्तित्वाप्रकृतदभावप्रकारकज्ञानायामव्याप्तिवारणाय तत्प्रकारक

अनु० ५७
57

मिति। इच्छायामतिव्याप्तिवारणायज्ञानमिति। तदभावाप्रकारकमिति। इदं संशयेतिव्याप्तिवारणाय। अत्र च तद्विशेष्यकत्वावच्छिन्नतदभा
वादिप्रकारकत्वमन्यतद्विशेष्यकत्वावच्छिन्नतत्प्रकारकत्वत्वव्यापकत्वं तत्पनिश्चयत्वमवसेयं न तु यथाश्रुतं तत्तत्प्रकारकत्वमस्यैवेयपर्यग्रा
त्पसहानसंवह्निमन्नवापर्वतोवह्निमान्निप्यस्यपर्वतेवह्निनिश्चयत्वानापत्तेर्महानसेपितदापत्तेश्चेति। ज्ञानपदं च इच्छायामतिप्रसंगवारणा
य। एकधर्मिकेति। ह्रदपर्वतौवह्नितदभाववंतावित्यादिज्ञानेतिव्याप्तिवारणायैकधर्मिकेति। एकधर्मितावच्छेदकाविशिष्टविशेष्य
कत्वावच्छिन्नेत्यर्थः। घटोद्रव्यंपृथिवीत्यादिज्ञानेतिव्याप्तिवारणायाह। विरुद्धेति। विरुद्धत्वेनभावाभावप्रकारकमित्यर्थः। तेनहृदयः सं
योगवान्संयोगाभाववांश्चेत्यादिबुद्धेर्निरासः। भावाभावसमूहालंबनंवारणायप्रकारकेति। इच्छाद्युदासोमावेशेष्यभागः। अत्र च यद्रू
पेणयेनसंबंधेनविरोधयत्स्से तन्नूपेणतत्संबंधेनचकारत्वंबोध्यं। तेनायंजलवान्स्नेहसमवायिकारणतावच्छेदकजात्यभाववांश्चे
त्यादिर्निरासो निरासश्च संयोगविशेषणताभ्यां विरुद्धयोर्घटतदभावयोः कालिकविशेषणतया भूतलधर्मिकज्ञानस्य। यत्तु संदे
हमीत्यनुव्यवसायिकोजातिज्ञातिविशेषएवसंशयत्वमितितन्न। चाक्षुषत्वादिनासंकरापातात्। ननुसाधारणधर्मज्ञानस्यसंशयप्रतिका
रणत्वेविप्रतिपत्तिजन्यनिसंशयेव्यतिरेकव्यभिचारइत्यतआह। विप्रतिपत्तिस्त्विति। व्याप्तिज्ञानादिनामित्यादिना तीदंशब्दवाक्यार्थज्ञा
नसंग्रहः। निश्चयमात्रेति। तथा च शब्दो नित्यो न वेत्यादिविप्रतिपत्तिवाक्येन नित्यत्वनित्यत्वाभावादिप्रकारकवाक्यार्थबोधजन्यतेनतुसंश
यइतिभावः। न च तस्य निश्चयरूपत्वे तदुत्पत्तिरेव कथंस्यात्। ग्राह्याभावनिश्चयस्यकार्यसहभावेनविशिष्टबुद्धौप्रतिबंधकत्वादितिवा राम
च्यंप्रामाण्यानयायविशिष्टबुद्धेरेवप्रतिबंधकत्वात्। न च तथापि तदनंतरं कथं मानसः संशयइतिवाच्यं। नादिवाक्यत्वेनाप्रमाण्यज्ञानानंत ५७

रमेवमानससंशयात् । प्रथममात एवं व्याप्येति । ननु यथा व्याप्यसंशयस्य व्यापकसंशयं प्रति हेतुत्वे किं मानं कोटिस्मरणादित एव व्यापकसंशयसंभवात् ।
क्वचित्तदनुविधानं तु व्याप्यतदभावयोर्व्यापकतदभावसाहचर्यस्य गृहीतत्वेन तत्स्मरणस्योपक्षीणत्वात् । तदयहेतुव्याप्यसंशयात् व्याप्यसं
शयात् व्यापकसंशयस्याप्यभावात् । इति चेत् । उच्यते । महानसे कृतापानो नमात्त हृदइति स्मर पर्वतादिकमपि पश्यतां धूमादिसंशय
भावाभावाभ्यां कृतात् संशयभावाभावदर्शनात्तस्यापि तद्धेतुत्वात् । अत एवोक्तमेककोटिकं व्याप्यसंशयाद्व्यापकस्यापि तुल्यकोटिकसंशय
यः । कारणोक्तेरन्वयिकार्यात्कर्षात् । नन्वेतद्भगवत्सूत्रकृदनभिमतमिति वाच्यम् । सूत्रस्थचकारस्यानुक्तसमुच्चायित्वात् । तथा हि । समानास
नानेकधर्मोपपत्तेर्विप्रतिपत्तेरुपलब्ध्यनुपलब्ध्यव्यवस्थातश्च विशेषापेक्षो विमर्शः संशय इति सूत्रम् । तस्य चायमर्थः समानधर्मः समानजातीय
मसमानजातीयं चानेकं तस्माद्भिन्नो वा कोऽपि धर्मोऽनेकधर्म इति स च तित्पत्वतरभावादिव्याहत्तः प्राप्तत्वादित्यस्योपपत्तिरित्यानितस्मादेकः संशयः
विप्रतिपत्तिर्विरुद्धार्थप्रतिपादकं वाक्यं तस्माद्द्वितीयः । उपलब्ध्यनुपलब्ध्योरव्यवस्था । एकतरानिश्चयोऽप्रामाण्यसंशय इति यावत् । तस्मा
त्तृतीयः । विशेषापेक्षः । विशेषस्यैककोट्याद्यपेक्षाज्ञानं तथा च जिज्ञासैवास्ति न ज्ञानमिति विशेषादर्शनमनेन सूचितं तस्माच्चतुर्थः
ति । तत्राव्यवस्थातश्चेति चकारोऽनुक्तस्य व्याप्यसंशयसमुच्चायक इति । इत्यादिकमिति । आदिना साधनाव्यापकव्याप्यसंदेहद्वारा साध्यव्या
पकत्वसंदेहात् साधनाव्यापकत्वसंदेहो वोपाधेः । धर्मिज्ञानमिति अथ धर्मिज्ञानस्य प्राप्तत्वं प्रति हेतुत्वे मानाभावः । न च धर्मिज्ञानमन्त
रेण संशयः स्यादिति वाच्यम् । सति धर्मीन्द्रियसंनिकर्षे इष्टत्वात् तत्राह धर्मी द्विपेति पित्रादीत्यादिना वंशोरगभ्रमजनकीभूतमंडुक
वसाञ्जनस्य पदोपपरिग्रहः । अनुमानसिद्धत्वमेव प्रदर्शयति । यथेति । भगज्ज्ञानव्यभिचारवारणपरेतोऽनन्यो इति । अर्थात्तरतं त्रिरा

मु ५८ कुरुतेनचेति। तथाचेति। दोषाभावानांकारणत्वेचेत्यर्थः। गुणस्यापीति। अचिरेवार्थैतथा चगुणस्यैवेत्यर्थः। दोषाभावस्य चनकारणते।
पास्थितिर्गौरवादिति भावः। ननु तत्तत्प्रमायांकथमनुगतंहितु तान्नतावत्प्रत्यक्षप्रमायांभूयोवयवेंद्रियसंनिकर्षः। पाश्चादित्प्रत्यक्षेव्यभि
चारात्तनाप्यनुमितौ लिंगपरामर्शः उत्पत्तिकालीनोघटोगंधवान्पृथिवीत्वादित्यत्रसत्यपियथार्थपरामर्शेप्रयोत्पादेप्रसंगात्। नास्यु
पमितौसादृश्यधीः वैधर्म्योपमितौव्यभिचारात्तनापिप्राकप्रमायांयथार्थवाक्यार्थज्ञानंगुणः शुकबालकप्रमायांव्यभिचारादितिचे
त्। अत्रमहामहोपाध्याय श्रीनरहरिचरणाः। यावत्स्वेवानुगमस्तावत्स्वेवगुणत्वमस्तु। तथाहि। स्थूलत्वावयवादिप्रत्यक्षमितौभूयोवयवें
द्रियसंनिकर्षः। अनुमितौच यथार्थलिंगज्ञानं। नचप्रागुक्तोदोषः। दोषविशेषेणप्रतिबंधात्। सादृश्यगर्भितिदेशवाक्यार्थबोधस्वै
कोपमितौ। यथार्थसादृश्यज्ञानं। शाब्दप्रमायांयथार्थवाक्यार्थज्ञानंगुणः। नचशुकादेःशाब्दप्रमायांव्यभिचारइतिवाच्यं। तत्रैश्वरीयत
दृशज्ञानसत्वात्। प्रत्यक्षप्रमात्वाद्यवच्छिन्नेऽनुगतगुणासंभवदोषः परमवशिष्यते। सोपिनास्ति। प्रमात्वस्यपक्षत्वघटितत्वेनानु
तार्थ घटिततयाप्रत्यक्षप्रमात्वस्यकार्यतानवच्छेदकत्वादिति। मानसप्रत्यक्षस्थलेभूयोवयवेंद्रियवेंद्रियसंनिकर्षस्याहेतुत्वादाह
प्रकृतेति। एवमग्रेपीति। शाब्दबोधेतात्पर्यप्रमैवगुणइति भावः। तद्वद्विशेष्यकेति। तत्प्रकारकेप्रमेति। व्याप्तिवारणायतद्वद्विशेष्यकेति। र
जतएवत्प्रमितिरंजनेरजतत्वप्रमात्वापत्तिरतस्तत्प्रकारकेति। ज्ञानपदंचतादृशपरिपाट्यामिच्छायारंजतत्वप्रकारिकायामितिव्याप्तिवारणा
यतद्वत्वंचतत्संबंधित्वंतेनतादात्म्यसंबंधेनरजतादिप्रकारकप्रमायांनाव्याप्तिः। येनसंबंधेनतद्वत्वंतेनसंबंधेनतत्प्रकारकत्वमत्रबोध्यं। राम
तेनपरासंबंधेनज्ञानोहित्यवद्विशेष्यकेसमवायेनज्ञानोहित्यप्रकारकेज्ञानोहितोवह्निरितिज्ञानेनातिव्याप्तिः। मूलत्वावच्छिन्नोदकः कपिसंयो ५८

गीति ज्ञानं च संयोगांशे प्रमैव। अवच्छिन्नत्वांशे तु भ्रमः। यदि तु मूलावच्छिन्नसमवाय एव संसर्गस्तदा तेन संबंधेन तदवच्छेदकाभावाच्च न प्रसंगः शि
ष्यं सतीति। तद्विशेष्यकतत्प्रकारकज्ञानस्य प्रमात्वे सतीत्यर्थः। तस्मान्निर्विकल्पकस्य। स्वत्वेन प्रमात्वापि भ्रम इति यथा। चक्षुर्निर्विकल्पकं विशि
ष्टज्ञानवत्स्विन्नमप्रमावहिर्भूतमेवेति भावः। मुक्तावल्यां तान्त्विति। एवं तत्त्वं कपिसंयोगाभावज्ञानं संयोगाभाववद्विशेष्यकं संयोगप्रकारकं
संयोगाभावाप्रकारत्वे सति संयोगप्रकारकं त्विति भ्रमयोर्लक्षणस्य सत्वादिति भावः। तत्र। इष्टे। भ्रमत्वादिति। कपिसंयोगाभाववाच्छेदे
नकपिसंयोगस्यासत्वादिति भावः। ननु तद्विशेष्यकेत्यादिलक्षणे तच्छब्दवाच्यस्यैकस्याभावेनाननुगतं लक्षणं वाच्यं। घटविशेष्यकं घ
टत्वप्रकारकं ज्ञानं घटप्रमा। एवं पटविशेष्यकं पटत्वप्रकारकं ज्ञानं पटप्रमेत्यादितथा च लक्षणाननुगमो दोष इत्यत आह। तत्तद्यक्तीति
। तथा च लक्षणाननुगम एव सदोष इति भावः। अशेषैर्विपाकरक्तो घटः घटप्रमेत्यपवादात्प्रतीतेः प्रमात्वापत्तिरिति चेन्न दृष्टापत्तेः घटस्यैकस्यैव
दा चित्प्रपन्नत्वात्। वर्तमानत्वं च नमनुवर्त्यायं घटो विनष्टो इत्यादिव्यवहारात्। अत एव लक्षणे तद्वत्त्वमपि तत्संबंधित्वमात्रं तेन मतादि
स्योन रजतादिप्रकारकाप्रमायां नाव्याप्तिरिति। अत्र यं घटमहमनुभवत्वा घटितं ज्ञानत्वघटितमेव प्रमात्वं सुवचं तथापि तस्य स्मृतिसाधारणत
मातत्त्वकारणस्य प्रमाणं त्वतापत्याप्रमास्त्वे प्रमाणव्यवहारो पापिकस्तपमनुभवत्वघटितं तमेवानुमन्यते तेन त्रिकाः। वस्तुतस्तु विशिष्टवैशिष्ट्य
नुभवे विशेष्यणतावच्छेदकप्रकारकनिश्चयस्य कारणत्वात्। तज्जन्यतावच्छेदककोटिप्रविष्टतया अनुभवत्वस्य जातिविशेषत्वे सिद्धे ज्ञानत्व
स्यानुभवाप्रयटकत्वात् अनुभवत्वस्यैवेयर्थ्यमिति हृतं पर्यवसितेनः। प्रमात्वं न स्वतोग्राह्यमिति मत्वेन प्रमाण्यं स्वतो ग्राह्यमिति मीमांसकाम
तदूषणं क्रियते तत्र द्वैधा यं मीमांसमतं तावदन्वाभुवदति। मीमांसकाणीति स्वप्रकाशकत्वादिति। संबंधि ज्ञानं घटं घटत्वेन जानामीत्य

घाकारकं ग्रहणमिति । यार्थ्या विशेष्यत्वं तत्तृतीयार्थः प्रकारत्वं तथा च घटादौ विशेष्यकत्वे सति घटत्वप्रकारकत्वरूपं प्रमाण्यं ज्ञानेनागृहीतमेवे
तिभावः । तथा चेति । अयंभावः । ज्ञाततात्वलिंगकानुमित्या तद्ग्रहः । तथा हि । अयं ज्ञातता घटविशेष्यकघटत्वप्रकारकज्ञानजन्या । घटत्वे
ति घटत्वप्रकारकज्ञातताश्रयत्वात् । यन्नैवं तन्नैवं यथा पटादिका ज्ञातता सा तद्विशेष्यकतत्प्रकारकज्ञानसाध्या यथा पटे पटत्वप्रकारिका ज्ञा
ततेति व्याप्तिरिति । अनुव्यवसायेनेति । व्यवसायोत्तरभाविना ज्ञानेनेत्यर्थः । विषयइति । यद्विषये विषयी क्रियमाण एव ज्ञानावि
त्रिवेद्यो ज्ञानविषयी क्रियमाण एव । ज्ञानावित्तिवेद्यो ज्ञानविषयकप्रत्यक्षविषय । अनभ्यासदशापन्ने इति अनवधृतप्रामाण्य
सजातीयेत्यर्थः । ज्ञातमेव । निश्चितमेव । प्रपञ्चप्रकारव्याप्याया धर्मस्तद्वतीति तत्प्रकारकज्ञानत्वस्य तत्प्रकारकज्ञानप्रामाण्ये हेतु
तां प्रदर्शयति । इदं घटविशेष्यकीति । ननु कथं तर्हि प्रमाण्यस्यानुमेयता ज्ञाने प्रमाण्यस्य गृहीतत्वादित्यत आह तत्प्रकारकेति । सप्र
यानुरोधादिति । अथ किमर्थं प्रमाण्यानुमित्यनुसरणं पुरुषत्वव्यापककरादिदर्शनेनैव तत्संशयप्रतिबंधाद् [illegible] मार्थं निश्च
यादेवप्रवृत्त्याद्युपपत्तेः तद्दर्शने च करादिमद्विशेष्यकत्वस्य [illegible] तोरस्य [illegible] कथं प्रामाण्यानुमितिरपीति चेत् । अत्र भणंति । करा
दौ पुरुषत्वनिरूपितव्याप्यत्वे [illegible] प्रामाण्यादितः करादिमति पुरुषत्वज्ञानत्वादेः प्रमाण्यव्याप्यत्वादनुमिति । संभवत्येवेति दिक् । गु
रुः प्रांकते । नन्विति । प्रवृत्तस्याभावे विशेष्यज्ञानाभावस्तत्पदं हेतुस्तत्सूचयति । तदुमत इति । तदा प्राभाकरस्य । तत्रापि इति । ननु क्वचित् प्रज
तभेदाग्रहः [illegible] विशिष्टज्ञानं कारणं इत्यननुगमः स्यात् तत्राह । अस्तु वेति । तत्रापि सत्यरजतस्थलेपि विशिष्टज्ञानस्यापि यम
नस्यापि कारणत्वं तस्य नास्तीत्याशयः । हेतुतायामिति । नचात्र मानाभाव इति वाच्यं । रजतार्थिजन्यपश्चात्प्रवृत्तिरिष्टप्रवृत्तिविषयः विषि

रत्नानसाध्याप्रवृत्तिनिवृत्त्यानात्रारजतेरजतप्रकारकप्रवृत्तिनिवत्तइत्यनुमानस्यैवसत्वात्। नचाप्रयोजकत्वं। रजतत्वप्रकारकप्रवृत्तौ
समानविषयतयारजतत्वप्रकारकज्ञानहेतुत्वस्यानुकूलतर्कतात्। अन्यत्रापि। भ्रमस्थलेपि। ननुतच्चापिभ्रमस्थलीयप्रवृ
त्तौरजत्वादेरसत्वेनरजत्वविशिष्टवृत्तेरभावाद्व्यभिचारइत्यतआह। इत्थंचेति। नत्वेतिः। नव्यतिरेकव्यभिचारः। फलतमुरङ्गार
वस्यापिदोषत्वमाशङ्क्याह। किंचेति। तत्ररजतेनारजतभेदग्रहोनवारंगभेदइत्यत्रसतिपुरःपादिद्रियसंनिकर्षेरजतरंगयोरिभ ग्र
रजतेइतिज्ञानेनकिमपिवाधकंरजतत्वेनसमंसंयुक्तेसमवायस्यसत्वात्। तत्वहिदोषप्रभावात्तत्संयुक्तसमवायत्वेनास्तुत्वा
त्। रंगांशेचविशेषणवाहिदोषसंनिकर्षात्मकप्रमाणाभावात्प्रमाभावादेवप्रमानुत्पादादितिभावः। स्वतन्त्रोभयभेदाग्रहात्प्र
यकरंगरजतंचेतिसंशयेनधिर्मपिवाच्यकंसमंतुदोषमहिम्नैवरजतरंगयोरजतरंगभेदग्रहान्नसंशयइतिभावः। संशयत्वस्य
कार्यतावच्छेदकत्वाद्दाह। अपिचेति। ननुरंगरजतयोरंगरजतभेदाग्रहान्नयुगपत्प्रवृत्तिनिवृत्तीइत्यतआह। रंगेरंगभेदग्र
हेति। ननुकारणाभावादेवतेजायेतेइत्यतआह। तन्मतइति। प्राभाकरमतइत्यर्थः। ननुकारणाभावस्तज्ञानाविघटकस्यदोषस्य
प्रतिबंधकत्वोपगमान्नयुगपत्प्रवृत्तिरित्यतआह। किंचेति। वाधज्ञानाभावेक्रादेवहेत्वनुमितिसत्वमतस्यादित्यर्थः। भ्रमस्थलेप्रामा
कारणविशिष्टज्ञानानभ्युपगमाद्धादिचेत्तुक्त्वाइत्थंचेति। प्रवृत्तिप्रतिविशिष्टज्ञानस्यहेतुत्वेनान्यथासिद्धेश्चेत्यर्थः। प्रत्यक्षमि
वेति। एवंप्रत्यक्षाद्यपर्थे। ननुप्रमाणाप्रमत्वमनागमतदाभावेप्यनुमानेप्रामाण्यंभवेत्तदेवचनसंभवतिव्याप्तेर्ग्रहस्याभावेना
ज्ञानादित्यतःप्रामाण्यानुमितिप्रयोजकतयाव्यभिचारस्याग्रहोयसहचारग्रहस्यापेक्षितमत्वेनव्याप्तिग्रहोपयोगदर्शितेसत्वा २

तु.
२०
60

सुक्तेः स्वकारणीभूतव्याप्तिस्वरूपाज्ञानादित्यत आह। पूर्वं व्याप्तिरुक्तेति। अभिचाराग्रहस्य व्याप्तिग्राहकतामुपपादयंति। अभिचाराग्रह
स्येति। सहचाराग्रहस्य तामुपपादयति। एवमिति। भूयोदर्शनस्य कारणत्वं खंडयति भूयोदर्शनं त्विति। व्यतिरेके व्यभिचारमाह। सकृद्दर्श
नेपीति। इदमुपलक्षणं। व्याप्तिज्ञाने भूयोदर्शनस्य कारणत्वमंगीकर्तुं दर्शनानाप्रतीकं चाहेतुत्वे स्वरूपतो व्याप्यतावाचानुवृत्ते।
आद्येऽन्वयव्यभिचारः। द्वितीये अनुतरविनाशिनात्मैकाणुभूतलोकाभावेन व्यतिरेकव्यभिचारः। तृतीये स्वजन्यसंस्कारसंबंधेन
भूयोदर्शनस्य हेतुत्वेनान्वयव्यभिचाराभावेपि क्रमादिविशेषक सहचारसंस्कारस्य व्यापकसामानाधिकरण्यात्मकविशिष्टव्या
प्ति प्रकारकस्मरणजनकत्वासंभवः। स्मृतिसंस्कारयोः समानविषयत्वेन कार्यकारणभावात्। एकविषयकस्मरणाभ्युपगमेपि प्रसं
गः। किंच संबंधभूयोदर्शने भूयःसु स्थानेषु साधनसंबंधदर्शनं भूयस्त्वं साध्यसाधनानां वा दर्शनं भूयस्त्वं विशिष्टं साध्यसाधनसं
बंधदर्शनं वा। नाद्यः एकत्र रूपरसयोर्व्याप्तिग्रहणे व्यतिरेकव्यभिचारात्। एतएवन द्वितीयः। द्रव्यत्वघटत्वयोर्व्याप्तिग्रहणात्। न
तृतीयः एकविशेष्यकधारावाहिकज्ञाने सति व्याप्तिधियो उदयेनान्वयव्यभिचारात्। अपरं च भूयस्त्वस्य त्रिचतुरादित्वेनाननुग
मः। प्रत्यक्षः सहचरितयोरपि पार्थिवत्वलोहलेख्यत्वयोः हारकादौ व्यभिचारग्रहेण व्याप्त्यग्रहादित्यादिकमपि दूषणं द्रष्टव्यं। भूयो
दर्शनस्य हेतुत्वेपि प्रयोजकतामाह। क्वचिदिति। तर्कोपि तथेति। निरोधिकोव्यतर विषयक जिज्ञासा निवृत्तिद्वारा नियतकोटि
विषयकजिज्ञासायां तन्नतीयमन्वयव्यतिरेकाभ्यां तर्कः कारणं इति भावः। तर्कस्य तथा विरोधविशेषस्तत्त्वं चमानसत्वं व्याप्त्याजा
तिस्तर्कपार्थत्यनुभवात् जिज्ञासाविशेषजनकत्वेतदपायाद्वसिद्ध इति। न च तर्कस्य व्याप्तिमूलत्वेनानवस्थेति वाच्यं। यावदाशंकं तर्कानु

राम
६

सहेतु रणात् धूमं कार्यत्वस्य ग्राह्यत्वविधित्वात्। तदा कुत्रदयनाचार्याः। व्याघातावधिरांशंकातर्कः शंकावधिमंतर्क इति। तर्कं [illegible]छिवि
श्रो विषयपरिशोधको व्याप्तिग्राहकश्च तत्र विषयपरिशोधको निर्वह्निः स्यान्निर्धूमः स्यादित्यादिः। इत्र यो यदि वह्निव्यभिचारी स्यात्
वह्निजन्यो न स्यादित्यादिस्तु व्याप्तिग्राहकः। विस्तरस्तु चिंतामणावादाननुसंधेयः। विषयपरिशोधकतर्कमुपपादयति। तथा हि
तिसा। अप्रांका। व्याघातात्। विरोधात्। तर्वेति तर्कमूलत्वमूलत आहोश्रप्रयोजकत्वशंकोच्छाच्चस्पतयर्थः। तदिदमुक्तमिति। गंगेशो
पाठ्यायत्वरणोरिति प्रोक्तः। इदानीं व्याप्तिग्रहोपायं निरूपयन्नाह स्वजन्यव्याप्तिनिश्चयाभावप्रयोजकीभूतव्यभिचारशंकाकारणज्ञानाभाव
वयत्वेनोपाध्येः स्मरणकाले। तथा च प्रसंगसंगत्यापाद्यनिरूपणमिति भावः। सोपाधेऽसाध्यत्वसाधनत्वेन संभवतस्तत्त्वभिमतेति
योपदवच्छिन्नव्यापकत्वे सति यदवच्छिन्नाव्यापकः स तत्रोपाधिरित्यर्थः। पर्याप्त्याते भिव्याप्तस्यति विशेषणत्वेन यत्रान्तेदनिमा
नतत्राव्याप्तिः स्यात्। यदवच्छिन्नत्वविवक्षणे त्वविवक्षणे न च गुणकर्मान्यत्वविशिष्टसत्त्वात् जातेरित्यादौ संयोगीगुणकर्मान्य
त्वविशिष्टसत्त्वादिनाद्येद्रव्यत्वादीनाव्याप्त्यति व्याप्ती। व्यापकत्वाव्यापकत्वे एकप्रकारेण एकसंबंधेन च विवक्षिते तेन द्रव्यत्वे
न समवायसंबंधेन च वह्निप्रतिव्यापकस्य द्रव्यत्वस्य वह्नित्वादिना संयोगादिसंबंधेन वा धूमं प्रत्यव्यापकत्वेऽपि वह्निमान् धूमादि
त्यत्र द्रव्यत्वादौ नातिव्याप्तिः। साध्यव्यापकत्वाभावमुपपादयति। श्यामत्वस्येति। साधनावच्छिन्नसाध्यव्यापकोपाधावव्याप्ति
उत्तापक्षधर्मावच्छिन्नसाध्यव्यापकोपाधावव्याप्तिमाह। एवं वायुरिति। अव्याप्तिं परिहरति। मैत्रीतनयत्वेत्यादिना। अत एव
सहत्वे। निरुक्तधर्माभावादेवा। एतदवच्छेदुमारोपाद्यत्राव्रितपसाधारणतया। स्वस्य साध्य मिति परिष्कृतं गुरुराक्रमं व्यावर्तयितु
आणत्वचेति। नव्यास्तु। यदभावेन यद्वदन्यत्वेन वा साधनवति साध्याभाव उन्नीयते स उपाधिः। तत्त्वाद्वेवात्। अत एव जलत्वेते उदम

६० स्तदुभयत्वेन रूपेण न तु कश्चिदप्युपाधित्वं। करकापृथिवीकठिनसंयोगवत्वादित्यादौ च गंधवत्वादिकमुपाधिरेवेत्याकूतः। साधनाव
छिन्नसाध्यव्यापकोपाधिस्थलेपि साध्यव्यभिचारानुमानप्रकारं दर्शयति यथा सत्प्रमाम इति। वायुः प्रत्यक्षः प्रमेयत्वादित्यादौ तु प्रमेय
६१ त्वे प्रत्यक्षत्वव्यभिचारि महिर्द्रव्येउद्भूतरूपव्यभिचारित्वादित्यादि द्रष्टव्यं। बाध्योनुन्नीतपक्षेतर इति व्याप्तिं निरस्यति। बाधोन्नीते
ति। साध्यव्यापकेति साध्यव्यापकताग्राहकमनुकूलतर्कसहकृतमनुमानं तदभावादित्यर्थः। बाधोन्नीतपक्षेतरस्य तु तद्रूपत्वा
४५ देवतन्नातिव्याप्तिरूपो दोष इत्याह। बाधोन्नीतस्येति। पक्षेतरस्येति। अथात्र कश्चिदुपाधिर्भविष्यतीति शंकायाः दव पक्षेतरोपाधि
तच्छंकायाः अपि शंकापिशाचिन्यत्वान्न व्यभिचारसंशयाधायकत्वं। आहितायामपि वा पक्षीयव्यभिचारसंशयाद्व्यप्रतिबंधकत्वं
61 यथा निरूपाधिसत्त्वावमात्रप्रवृत्तानुमानोच्छेदप्रसंगादिति नायं संदिग्धोपाधिरपि त्वन्न। संदिग्धोपाधेस्तत्र साध्याभावव्यभि
चारशंकाधायकरूपवत्ता तेन तदाधानप्रयोजनत्वं तेन प्रतिबंधकत्वात्। अपि साध्यतावच्छेदकावच्छिन्नसाध्यसमुच्चितोति। नो
द्भावनीयः परप्रतीतिप्रोषः। अनुद्भावनहेतुमाह। बाधकेति। सत्प्रतिपक्षोन्नोपाधेर्दूषकतावादिनामतमाह। केचिदिति। इत्थं
चानुपाधेः सत्प्रतिपक्षोन्नायकत्वेच। वैदिकेति। स्वर्गकामो यजेतेत्यादिपदत्वेन पक्षताते न विशेषतः संसर्गसिद्धिरिति द्रष्टव्यं। ता
त्पर्यविषयेति। इदं चातात्पर्यविषयेण घटस्य करणत्वादिना व्यभिचारतावारणाय तात्पर्यविषयेति। तात्पर्यत्वानेइतरपदार्थत्वे
नेतरपदार्थस्य प्रवेशात्स्वरत्वादिनास्य तस्य संसर्गो न सिध्येदिति स्मारितेति। स्मारितत्वं च वृत्त्यावोधितत्वं तेन वक्ष्य पदात्समवायेन
काशत्वादिनोपस्थापितेन रूपेण संसर्गासिद्धभावेपि न क्षतिः। रतो चायमेति पुत्रो राज्ञः पुरुषोयमर्थतमित्यादौ राज्ञः पुरुष इत्य। राम
दिभागे राजपुरुषयोर्योग्यपाश्रयोस्तात्पर्याभावे साध्याभावाद्व्यभिचार इत्याकांक्षा विशेषणं। तच्च इदं पदमदमनेन पदेन संसर्गवत्के स ६१

सर्गेण तदर्थान्वितस्वार्थवाधेञ्जयत्विति पदतात्पर्यार्थकं। तेनाकांक्षाया स्तदं शैवैयर्थ्यादिकं नादरणीयं। वह्निनासिं चतीत्यादिवाक्ये
संसर्गभ्रमपूर्वकत्वसाध्याभावेन व्यभिचारवारणाय योग्यतापदं। तथा स्वहेतुत्वभावादेव न व्यभिचारः नीलो घटो द्रव्यं पट इत्यादौ नीतः
पर इत्यादिभागे नील पटयोराकांक्षायोग्यतासत्वेन हेतुसत्वाद्व्यभिचारवारणायासं निपदं। पदपदं च स्वस्वरूपकथनायकं दं च पदं चाकां
क्षादिदं नापरस्परस्य प्रतियोगित्वात्ताभायनुमन्यथा परस्परपदार्थघटितत्वेन साध्यस्य व्यभिचारतादवस्थ्यात् नान्विष्टतादवस्थ्ये
दवाप्रकारकप्रवृत्तिविषयविशेष्यकज्ञानस्य प्रवर्त्तकतया एतानि संसर्गज्ञानपूर्वकारणोत्पत्तस्मृतदभावात्कथं प्रवृत्तिः अनुमिते
र्वापकतावच्छेदकप्रकारकत्वनियमेन भ्रमापूर्वकत्वादिति तदर्थं प्राभ्रमाणस्वीकार आवश्यक इत्यत आह। यद्वेति। मिथः संसर्गवि
षयतितात्पर्यविषयपरत्वस्य संसर्गवत इत्यर्थः। तेन करणत्वादिकमादाय नार्थान्तरता। ननु दृष्टान्ते साध्यप्रसिद्ध्यभावात्कथं व्याप्ति
ग्रह इत्यत आह। दृष्टेतेवाति। ननु स एव भ्रमावाक्यश्रवणानन्तरं अनुमितिरूपकार्यान्यथानुपपत्त्या व्याप्तिज्ञानं कल्पनीयं इत्यत आह किं
वेति आकांक्षाज्ञानादिसहकारिम। तोवापार्थे वतस्य शाब्दत्वाम्नतानादि विलंबेनापरोक्षबोधविलंबप्रावात्प्राक्स्यापिस्वातंत्र्ये
ण्वप्रमाणमित्याशयः। वैदिकाः। प्राहुः प्रमाणं लौकिकस्त्वनुवादकः। तथाहि यथार्थतात्पर्यकत्वशाब्दप्रमाणे तत्रात
तज्ज्ञानं च शाब्दबोधहेतुः। अत एवान्यतात्पर्यकोऽन्यतात्पर्य भ्रमाद्भवति शाब्दभ्रमः। तच्च तात्पर्यं वेदेन्याप्यगम्यमिति न्यायतस्ता
त्पर्यमवधार्यं भवति शाब्दज्ञानं। लोके च पुमिच्छानियंत्रितताऽसंयं इत्यनुमीयते ततःतथाहि। यथार्थतात्पर्यप्रतीतीच्छयोच्चारणं
यथार्थतात्पर्यकत्वं तच्च यथार्थवाक्यार्थज्ञानस्य सिमितितज्ज्ञानमावरूपकयथार्थवाक्यार्थज्ञानमपि परकीयमप्रत्यक्षमिति तदम
नुमीयते अयं वक्तास्वप्रयुक्तवाक्यार्थगोचरयथार्थज्ञानवान् भ्रमाद्यजन्यस्वतात्पर्यकवाक्यप्रयोक्तृत्वात्। अहमिव। तस्मात्तात्प ६१

प्र.मु.
१६२

र्थस्य वाक्यार्थ घटितत्वं तदनुमानएव बाधियार्थोप्यवच्छेदकत्वयाभावेतेतदनंतरं शाब्दस्यापि संभवत्तसामग्रीकतयातस्माद्
वाक्यप्रत्ययेज्ञायतइत्यनुवादकोलौकिकः शाब्दइतिप्राभाकराः तत्र यत्राश्रु वाक्योच्चरणार्थतात्पर्यकमिदमितिसामान्यतानि
श्चयस्तत्रानुमानसंभवात् ।एवं काद्यायोग्यतासायादि सहकारिसमवहितः शाब्दः सर्वोपिप्रमाणांतरमेवनानुवादकइतितुने
यायकाः ननुनिर्दुष्टत्वस्यागुरुत्वानुमानादेवप्राप्तत्वप्राभिमतवाक्यार्थानुमितिसिद्धिर्भविष्यतीतिभेदत्तमणिकृतः एतेपदार्थाः
परस्परसंसर्गवंतः योग्यतादिमत्पदोपस्थापितत्वादित्यनुमानेयोग्यतानलिंगविशेषणं।लिंगस्यनिश्चितस्यैवनिश्चायकत्वतयायो
ग्यतायास्तुसंशयेपिशाब्दबोधदर्शनात् शाब्दप्रमाणप्रसंगात्कापि चसंशयसाधारणतत्त्वज्ञानमात्रस्यैवहेतुत्वं शाब्दबोधइतिशाब्द
एवपृथक्प्रमाणमितिवदंति।मिश्रास्तु।अनुमानमुद्रयाशाब्दस्यबोधकत्वेपरमान्ययोतिस्वरूपयोग्यंपदार्थकमित्यनुमानयनंकृतिरिति
वस्तुस्तपायोग्यमितिनस्यात्।अनुमानस्यासंभवत्रापिसंभवात्।नचाकांक्षाघटितत्वेनभावात्रानुमितिस्तत्रेतिवाच्यं।आकांक्षा
भ्रमेणानुमितिसंभवात्।विषयावाधाच्चतस्याः प्रमात्वात्।शाब्दप्रामाण्येचस्वभावान्तरताद्दृश्यशाब्दस्यबोधकत्वमितरविरोधं विना
हुः शाब्दबोधेयाद्दृशस्तादृशानंतानुमानमितिनाव्ययासिद्धिः एकपदार्थेपरपदार्थोविशेषणंतत्संसर्गः संसर्गमर्यादयाभास
तइतिशाब्दाचरितः अनुमानेचसंसर्गः प्रकारतयैवभासतइतिमहान्भेदः तस्माच्छब्दोमानांतरमेवेति।अत्रापरे सिद्धिरनुमितौ
प्रतिबंधिकानअथाद्यामितिसिद्धिप्रतिबंधत्वाप्रतिबंधत्वतल्लक्षणविरुद्धधर्मादेवानुमितिशाब्दभेदइति।औतन्यामंतग्रति रा
श्रवणस्यदृष्टत्वगु — दानात्मतार्थेतपरवेसाध्याभावव्याप्यकेइत्यादिमतंतग्रन्थेनबोधितिरेकाद्यादिप्रदर्शनेक्रियतेतत्प्रकृतानुपप
त्तमतः प्रकृतोपयोगितामुपपादयितुमनुमानतत्रैविध्यमाहअनुमानंत्रिविधमितिकेवलान्वयीतिअन्वयस्यानुरवप्रतिप १

त्रिकत्वादन्वयी सर्वमुद्दिष्टः व्यतिरेकस्य न कृत्वेनात् यात्वात्र दानंतर्यं। ननु भयोपेतत्वान्यथात्वमन्वयव्यतिरेकिणः। तत्रतेपुमधी
ध्वसत्तस्य यत्नशतित्वत्संतता भावाप्रतियोगि साध्यकत्वं स्पष्टं। यद्याप्तुतेसिध्यसिद्धिव्याप्यात्वात्संता भावाप्रतियोगित्वंवप्रमेयत्वादौ
नवैतन्नासंभवति प्रमाविषयत्वरूपस्य तस्य नानात्वेनानात्वेनाननुगमादितिवाच्यं प्रमात्वस्यैव परंपरासंबंधेनानुगमकत्वात्
।इत्थंयप्रमेयत्वादिव्यतिरेकित्वमप्रमेयपिकेवलान्वयित्वमेवेतिमतव्यप्रतियोगित्वंवनसत्तानस्यान नियमरूपगोत्वा अव्ययोर
तिव्याप्तिः अन्योन्याभावप्रतियोगिनितदभावाद्व्याप्तेस्याकित्वभाव विरहात्मकत्वमितिदिक्। व्यसत्सपदप्रतीते अविषमा
नसपक्षविपक्षाव्यावृत्तकेवलव्यतिरेकीत्यर्थः। सर्वस्यानुमितेः सर्वतथान्वयासंभवाव्यतिरेकाः सहचारएवाभिमतक्रांतिभावः
अन्वयव्यतिरेकाभ्यामन्वयज्ञानस्यैवव्यतिरेकव्याप्तिज्ञानस्याप्यनुमितिहेतुत्वतया चागृहीतान्वयत्वेसतिव्यतिरेकिसाध्य
कं केवलव्यतिरेकीभ्यामन्वयज्ञातस्यैव व्यतिरेकव्याप्तिज्ञानस्याप्यनुतिलिङ्गाद्यवसेयः। यद्विचान्वयव्याप्तिरेवव्यतिरेकस
हचारेणगृह्यते तदुसुचार्यमतं तदान्वयसहचारमात्रगृहीतव्याप्तिकत्वं केवलान्वयित्वं व्यतिरेकसहचारमागृहीतव्याप्तिका
त्वं केवलव्यतिरेकत्वमितिबोध्यं अन्वयव्यतिरेकिणमुदाहरतीतायुर्येति। तत्रहि। त्रिविधेष्वनुमानेषु मध्ये व्यतिरेकिव्याप्ति
रेकपरामर्शजन्यानुमितौ। तदर्थं व्यतिरेकव्याप्तिज्ञानार्थं। साध्याभावेति। साध्याभावः वह्न्यभावादिः। तस्य व्यापकीभूतोयोभावो
धूमाभावादिस्तत्प्रतियोगित्वं धूमादावित्यर्थः। संयोगसंबंधावच्छिन्नप्रतियोगिताकवह्नित्वावच्छिन्नाभावज्ञानात्समवायसं
बंधावच्छिन्नप्रतियोगिताकवह्नित्वावच्छिन्नतदभावानुमितेरनुदयादाह। स्वसंबंधीति। येन संबंधेन व्यापकता गृहीता तत्संबंधा
वच्छिन्नप्रतियोगिताकाभावः सिध्यतीति। सच क्वचिदन्योन्याभावः क्वचित्संसर्गाभावः इत्याह स्वयं वेति। ननु सहचारज्ञानाभावा

६४२

३ कथं व्यतिरेकव्याप्तिज्ञानं इत्यत आह। अत्र चेति। तथा च व्यतिरेकसहचारेणैव व्याप्तिग्रहणान्न दोषः। ननु साध्यप्रसिद्धिर्व्यतिरे
६३ किण्यपेक्षिता तथा चाभावज्ञाने व्यतिरेकव्याप्तेर्दुर्ग्रहत्वं तस्याः सा च नास्तीति चेन्न। साध्यस्य घटादावेव प्रसिद्धत्वात्। न च
पक्षैकदेशे घटादौ साध्यसिद्धावपि तत्र सिद्धसाधनतापत्तिरिति वाच्यं। पृथिवीतरभिन्ने उद्देश्यप्रतीतेरसिद्धत्वात्। तस्य च दो
षत्वं पक्षतावच्छेदकनानात्व एव। अतएव नित्ये वाङ्मनसे इत्यत्र नित्या वागिति बुद्धेरुद्देश्यायाः सिद्धत्वेनांशतः सिद्धसाधनमि
63 ति। ननु तथापि घटः कथं पक्षः। साध्यस्य निश्चयेन तत्संदेहसिसाधयिषयोरभावादिति चेन्न। सर्वा पृथिवी इतरभिन्ना न वे
ति संशयस्य तत्प्रकारकसिसाधयिषायाश्च घटविषयत्वात्। घटत्वेन विशेषदर्शनं सिद्धिर्वा तेन रूपेण संशयसिसाधयि
षे न भवतः पृथिवीत्वेन तत्र भवत एवेति। ननु पृथिवीतरभिन्ना पृथिवीत्वात् घटवदित्यत्रापि नैवेतरभेदसिद्धेर्व्यतिरेकिवै
यर्थ्यमिति चेन्न। अन्वयव्याप्तेरग्रहे व्यतिरेकिव्याप्तिस्फूर्तिदशायां व्यतिरेक्यनुमितिजननसंभवेन व्यतिरेक्यनुमानस्य
वैनिष्फल्यत्वात्। उदयनाचार्यमतमाह। केचिदिति। अन्वयव्याप्तिरेवेति विशेषाप्रसंगतेव कारेणान्वयव्याप्तिरेव हेतुर्न
तु व्यतिरेकव्याप्तिरिति तत्कथं एवं सति कथं व्यतिरेकव्याप्तिज्ञानाभावे व्यतिरेक्यनुमितिरित्यत आह। नत्विति। कारणमिति॥
प्रमाणाभावादिति शेषः। तथा च व्यतिरेकव्याप्तिज्ञानं कारणमेव न भवतीति न प्रागुक्तानुपपत्तिः। एतेन केवलव्यतिरेकि
नानुमानं व्याप्तिः। विशिष्टपक्षधर्मताज्ञानस्यानुमितिहेतुत्वात्। अत्र व्यतिरेकव्याप्तिस्तु पक्षधर्मत्वात्। न च व्यतिरे
कव्याप्त्यान्वयव्याप्तिरनुमीयत इति वाच्यं। व्यतिरेकव्याप्त्युपन्यासस्यार्थान्तरतापत्तेः अन्वयव्याप्तेरेव गमकत्वात्। अन्वय राम
व्याप्त्यनुहोतस्तया च तदुपन्यासेऽन्वयव्याप्तिमनुपन्यस्य व्यतिरेकव्याप्तेरप्याप्रकालत्वादित्यादि दूषणमत्यन्तमवोदितव्यं। नन्व ६

यथा। स ज्ञानस्यैव हेतुत्वे कथं व्यतिरेकीति व्यवहार इत्यत आह। अन्वेति न तु पृथिवीतरेभ्यो भिद्यते पृथिवीत्वादित्यत्र साध्यस्येतरभे
दस्याप्रसिद्धेः कथं व्यतिरेकसहचारग्रह इत्यत आह। साध्याप्रसिद्धिरिति। ननु घटादौ साध्येन निर्णीते कथं तत्रेतरभेदानुमितिरत आ
ह। पक्षादिति। अवच्छेदकावच्छेदेनानुमितौ सामानाधिकरण्येन साध्यसिद्धेः प्रतिबंधकत्वादिति भावः। केचन। मीमांसकाः। तदपि
वह्निः सत्त्वमतौ। दिवा न भुङ्क्ते इत्यादावित्यादिना मपरः पर्वतेतरे न न तत्पत्ति न तत्पत्तिश्चेतस्य संग्रहः। नन्वेतदाकरज्ञानानंतरं पर्वतेन
त्पतीति ज्ञानस्य तु त्पत्तेन व्यतिरेकिणः संभवति। पर्वतेतरस्य साध्यस्याप्रसिद्धेर्व्यतिरेकव्याप्त्यनिरूपणादिति कथं नार्थापत्तिः
प्रमाणांतरमिति चेन्नाम परः नत्पंपर्वताधिकरणपर्वतेतरानधिकरणत्वे सति साधिकरणत्वात्। पर्वतत्वव। दित्यन्वयव्यतिरेकितो
व पर्वताधिकरणकन्यपरन्तत्पज्ञानजसंभवान्न धर्मित्वेनोक्ति। इदं च प्राचां मतेनोक्तं। नवीनमते तु नित्यविज्ञानमानंदं ब्रह्मे
ति श्रुत्या भागवत्ति नित्यसुखसिद्धौ धर्मस्य कार्यतावच्छेदकं जन्यसुखत्वं वा तरजातिर्वेति वो धा उपायविषयिणी। ग्रामय
श्रुपुत्रहिरण्यादिविषयिणीति तत्र तयोर्मध्ये अत एव। फलज्ञानस्य हेतुत्वादेव यज्ञ्ज्ञानमिति। ज्ञानविषयत्वे सति स्वच्छेतिच्छावि
षयः पुरुषार्थ इत्यर्थः। एतस्यैवोपायातिप्रसक्तत्वादाह। इतरेच्छेति। अत एव कृतिसाध्यताज्ञानस्य कारणत्वादेव वत्तत्वदिष्टेति। दि
ष्टं। छिद्यविषयीभूतं देयस्वकुरेव ताद्रूप्येण ज्ञानादेव सर्पादौ तत्साधनताज्ञानात्। जेन नांतरीयकेति। नांतरीयकं दुःखं देवेष्यामावे
न दिष्टसाधनत्वमिनास्तीत्यपि केचिदाहुः प्रवृत्तिनिवृत्ती इति। अत्र नन्वमान्याहुः। वाह्यवायुसंचारस्यैवावांतरवायुसंचारस्याप्यदृष्ट
वदात्मसंयोगादेवोपपत्तेर्जीवनयोनियत्नो मानाभावः। एवं प्रवृत्त्यभावेनैवोपपन्नो निवृत्त्यावयितथ्या। न च प्रवृत्तिरिव निवृत्तिर्भा
वरूपैव किं न स्यादिति वाच्यं। तथा सति सुषुप्ति [illegible] ति। प्राभाकरमतमाह। कार्यताज्ञानमितिसा

३ चा। चिकीर्षा चा। तद्द्वारा कृतिसाध्यत्वप्रकारकेच्छाद्वारा नैयायिकमतं दूषयति। नत्विति द्वयोरेवेति। इष्टसाधनताज्ञानकृतिसाध्यताज्ञान
योरेवेत्यर्थः। स्वविशेषणेति। स्वंप्रवर्त्तनीयः पुमांस्तद्विशेषणं काम्यकामनानिष्ठे कालप्रोक्तादि: तद्वत्तातद्विद्यमानतेत्यर्थः तेन कदा
६४ चिद्दिदृक्षा सत्वेपि तस्य भोजनेन प्रवृत्तिः। तस्याः प्रतिसंधानं ज्ञानं इति स्वकार्यताज्ञाने हेतुतात्तिगत्ता न विधयात्तथाहि पागोम
त्कृतिसाध्यः कामनाविषयसाधनत्वात्पाकवदित्तो पागोमत्कृतिसाध्य इति ज्ञानात् यागादौ प्रवृत्तिः एवं अहमिदानीं कृतिसाध्य
६४ संध्यावंदनः। संध्यासमयेपेरोचादिमत्वात्कालांतरयत्ततः संध्यावंदनं मत्कृतिसाध्यमिति तद्विशेष्यकज्ञानात्प्रवृत्तिरित्य
र्थः। कृतिसाध्यताज्ञानादिति। कृतिसाध्यत्वमिह उत्पन्नं तरभाविच्छत्वरूपं पाचिवद्दितं तेन कृतिसाध्यत्वतत्त्वरूपयोग्यत्वतत्पालो
पधानं वा नाद्यः। कृतिसाध्यत्वेप्यहो लोपि स्वरूपयोग्यताज्ञानात्प्रवृत्त्यापातात्। नांत्यः फलोपधानस्य तस्य सर्वदुर्ज्ञेयत्वादित्या
दिदूषणमनवकाशं। ननु निरुक्तकृतिसाध्यताज्ञानं पाकासिद्धिदशायां कथं भाविच्छत्तिपाकस्यासिद्धत्वेच तत्र हेत्वभावत्स्यादेन
कृतिसाध्यताज्ञानस्य [illegible] चित्वात्स्यादितिचेन्न। पाकोमत्कृतिसाध्यः [illegible] मत्कृतिं विना ऽसत्वेसतिमदिष्टसाधनत्वा
त्। मन्निमित्तस्वर्गवदित्यनुमानात्तस्य संभवात्। तदपेक्षयेति स्वविशेषणावत्ताप्रतिसंधानजन्यत्वापेक्षयेत्यर्थः। लाघवेन। कार सं ४
णतावच्छेदकलाघवेन। बलवदनिष्टेति। तथा च बलवदनिष्टाननुबंधित्वमिष्टसाधनत्वंच कृतिसाध्यताज्ञाने विषयत
यावच्छेदकमस्तु विशेषणवत्ताप्रतिसंधानजन्यत्वं तु न तथा गौरवादित्यर्थः। ननु बलवदनिष्टाजनकत्वज्ञानं न हेतुः बलवत्यासस
द्दष्टेवकृतरस्यापि दुःखस्य बलवत्वात्क्वचिदल्पस्यापि दुःखस्यैव बलवत्वादननुगतस्य बलवत्वस्य दुर्वचत्वादित्यत आह। बलवदनि राम
ष्टाननुबंधित्वं चेति। इच्छोत्पत्तीति। इच्छोत्पत्तिनांतरीयकं दुःखं तदपेक्षयाधिकं दुःखं तदजनकत्वमर्थः। एतेन मधुविषसंपृक्तान्न ६५

भोजने प्रवृत्त्यापत्तिरयास्ता। इष्टेत्यादि नांतरीयकदुःखातिरिक्तस्य मरणदुःखस्य तेन जननात्। अत्र केचन दूषणमाहुः। सुखमात्रज
नके कर्मणि इष्टोत्पत्तिनांतरीयकं दुःखमप्रसिद्धमिति तत्र प्रवृत्त्यभावप्रसंग इति तदयुक्तं। कष्टं कर्मेति न्यायेनासुखजनककर्मणि
दुःखजनकत्वनियमेनाप्रसिद्ध्यभावात्। मिश्रास्तु इष्टोत्पत्तिनांतरीयकदुःखाजनकत्वयुक्तस्यार्थ इति नाप्रसिद्धिरित्यूचिरे।
ननु एवं सति नरकसाधनत्वेन प्रतीते परदाराभिगमनादौ रागोत्कटान्न प्रवर्त्तेत। इष्टोत्पत्तिनांतरीयनरकदुःखजनकत्वेन तस्य
निश्चयात् इत्यत आह। बलवद्द्वेषेति द्वेषश्च बलवत्त्वं च ज्ञाति ... वि ... द्वेषः अत एव रागांधस्य यदा अग्र्यागमनादिजन्यदुःखे
नतादृशो द्वेषः तदा तद्धेतावपि प्रवृत्तिः साध्यत्वसाधनत्वयोर्विरोधमुपपादयति। असिद्धस्येति। प्राप्ति ... स्यापि पुरुषाभिद्वेषे
षण स्वेन ... इमिदानीं कृतिसाध्यमिष्टभक्षणः प्राणित्वादित्याद्यनुमितिसंभवाद्विषभक्षणसाधारणं स्याद्विशेषणं तत्रापि तत्सिद्ध्य
नजन्यत्वरूपितिबलवदनिष्टाननुबंधीष्टसाधनताबोधाद्यन्यतरलिंगप्रतिसंधानजन्यकार्यताज्ञानं प्रवर्त्तकं वाच्यं। तदपेक्षया बल
वदनिष्टाननुबंधीष्टसाधनताविषयकं कार्यताज्ञानमिति तत्त्वचिंतितदेव सर्वसाधारणकारणत्वेन कल्प्यत इत्यभिप्रायेण प्रा
भाकरमतं दूषयति। भेदमिति। साध्यत्वसाधनत्वयोर्भेदलक्षणावच्छेदेन विरोधेऽप्यवच्छेदकभेदात्सिद्धः पाकः साध्यः साधनमिति
द्वयोर्बाधकाभावादिति भावः। तस्य। मत्कृतिसाध्यत्वस्यानन्विष्टसाधनताज्ञानस्य प्रवृत्तिजनकत्वे भाविनियोगः व राज्यादि दानीं
प्रवृत्तिः स्यादत आह। इदं तु बोध्यमिति। इदं पदार्थमेव दर्शयति। तदानीमित्यादिना स्वमतमुपसंहरति। इत्थं चेति। प्रवृत्तिं प्रति
४२ साध्यत्वधियो हेतुत्वे चेत्यर्थः। इष्टसाधनत्वादित्यादिना बलवदनिष्टाननुबंधित्वकृतिसाध्यत्वयोः परिग्रहः। अत्र चानिष्पत्तेः प्रवृत्त्य
भावादिष्टसाधनत्वस्येष्टसाधनेपि मधुविषसंपृक्तान्नभोजने प्रवृत्तेर्बलवदनिष्टाननुबंधित्वस्य कृतिसाध्येष्टमिमेरुक्तं

मु॰ रणादावप्रवृत्तेः कृतिसाध्यत्वस्य च ज्ञानं प्रवृत्तिं प्रति हेतुः। तच्च ज्ञानं विधित इति बोध्यं। ननु भावियौवराज्यैवालस्य भोजने च तत्र स्वस्य प्र
६५ वृत्त्यभावादिदानींतनकृतिसाध्यताज्ञानादेः प्रवर्त्तकत्वं वाच्यं। तच्च न विधिवाक्यात्तत्र स्वप्रवृत्तेरिष्टसाधनत्वप्रकारकज्ञानस्यैवो
पलेरिति कथं प्रवर्त्तकज्ञानं विधित इति चेत् अत्र वदंति। न विधिः साक्षात्प्रवर्त्तकज्ञानमुत्पादयति किंतु विधिवाक्यादिष्टसाधन
त्वेऽवगते किमिष्टमित्याकांक्षायां स्वर्गकामादिपदसमभिव्याहारादिना विषयत्वेनासिद्धस्य स्वर्गस्य साधनमिति ज्ञानमानुमानिकं
65 मानसं वोत्पद्यते अथ वमपं चेतदृष्टव्यमन्यथा इदानीमिष्टस्य मं दृष्टस्य च प्रवर्त्तकज्ञानविषयस्य विधिपदादनुपस्थित्या प्रवृत्त्य
भावप्रसंगात्। अत एवोक्तं मणिकृताऽपि एवं विधिजन्यज्ञानजन्यज्ञानं प्रवर्त्तकमिति। अत्र भट्टपादाः लोके प्रवृत्तिर्द्विधा स्वेच्छया
परप्रेरणया च तत्रापत्या प्रवर्त्तनायाम् अनुपयोगोऽपि हि नीयप्रवृत्तौ सा प्रयोजिका। आचार्यप्रेरणया इदं करोमीति प्रवृत्तेरा
त्। प्रवर्त्तना च प्रवर्त्तयितुः प्रवृत्त्यनुकूलव्यापारविशेषः स च चेतनस्याभिप्राय एव। अचेतनस्य तु वेदस्याभिधानामकः कश्चित्
धर्मसमवेतः। न च समवायिकारणत्वं कथमद्रव्यस्य शब्दस्येति वाच्यं। एकैकस्यापि द्रव्यत्वाभ्युपगमात्। कारात् तथाऽऽचार्याभिप्रायज्ञाना
त्। यथा शिष्यः प्रवर्त्तते तथाऽभिधाज्ञानाद्विधिस्थ— पेप्रवृत्तिरिति सेव लिङ्। ठ्यि॥ शाब्दी भावना प्रकारान्तरेणाच। सा च लिङः
त्वांशेनोच्यते अर्थभावनाऽऽख्यातत्वांशेन। तदुक्तं अभिधाभावनामाहुरन्यामेव लिङादयः। अर्थात्मभावना त्वन्या सर्वाख्या
तस्य गोचर इति। अभिधाभाव इत्यत्र इष्टभावनाभिधावनार्थात्मकत्वं चार्थगोचरत्वमर्थाश्रितत्वं वा। न च भावनाद्वयस्य
स्य किं भाव्यमिति वाच्यं शाब्दभावनाया अर्थभावनैव भाव्या अर्थभावनायाश्च फलं स्वर्गादि इत्यवेहि। तदुक्तं लिङोऽभिधा सैव च शब्द राम
भावना भाव्या च तस्यां पुरुषप्रवृत्तिः। संबंधबोधः करणं तदीयं प्ररोचनाचांगतयोपयुज्यत इति। अस्यार्थः। लिङोऽभिधा वाच्या। ६

तत्र किं भाव्यं इत्याकाङ्क्षायामाह तं भाव्या चतस्याः प्रतिवेत्तं भाव्यं इत्याकाङ्क्षायां संबंधोत्ति। संबंधबोधः लिङादिना निमित्तस्यार्थः। त
त्वात्तस्य नेनानिवर्त्तमानं पुरुषस्तु तिरुत्तेजयतीति सापि सहकारि अपेक्षेत्याह। पुरोचनेति। इति वदंति। तत्र तार्किकाः प्रकृति
ङ्‌पदप्रवृत्तौ ज्ञानद्वारा प्रयोजकं ननु जनकमेव। भवतु वा तथा तथापीष्टसाधनताज्ञानमेव व्यापारः प्रवृत्तिं प्रतीष्टसाधनता
ज्ञानस्य हेतुत्वकल्पनात् अभिज्ञानस्य तथात्वकल्पने मानाभावात्। प्रागुक्तश्चार्थी भिन्नायां अभिधीयमानाभावाच्च। अत एव
मंडनमिश्राः। एतानेष्टाभ्युपायत्वा क्रियास्वन्यः प्रवर्त्तकः। प्रवृत्तिहेतुं धर्मं च प्रवदंति प्रवर्त्तनामित्यादि नापह्नुत्यनु [illegible] कृतत्वेन
इष्टसाधनत्वमेव प्रवर्त्तकमुक्तं वंतद्दति। अन्ये तु लिङ् निष्ठाभिधेति वाक्यादभिधाज्ञानेऽपि प्रवृत्त्यापत्तिः इष्टसाधनता ज्ञानं विना
न प्रवृत्तिरिति यदि तदा सर्वत्र तदेवास्तु कृतं प्रवर्त्तकान्तरेण। श्रावबोधानंतरभावित्वात् प्रवृत्तौ कचित्प्रवर्त्तनाज्ञानं प्रवृत्तिर्दिष्टसा
धनताज्ञानं इत्यत उगमय्यैस्याकुः। इच्छैव प्रवर्त्तनास्येव विध्यर्थ इति केचिद् चुस्तन्न। इच्छा प्रवृत्तिकारणं न तज्ज्ञानमिति तस्या
विध्यर्थत्वायोगात्। विधिवाक्यानां ज्ञानहेतो। पर्यागित्वादिति संक्षेपः। नन्वेवं विश्वजितायजेतेत्यादौ फलाश्रवणेन प्रवृत्ति
नुपपादतत्र आह। इत्यं चेति। इष्टसाधनत्वादेर्विध्यर्थत्वे चेत्यर्थः। ननु विव्येसंध्योपासनादौ फलाभावान्नेष्टसाधनत्वं विध्य
र्थ इत्यभिप्रायेणाशंकते। नन्विति। तथा सति अर्थवादिकब्रह्मलोकादेः फलत्वे सतीति। इष्टापत्तिमाशंक्याह। काम[illegible]नेति। न
नु तथापि नित्यस्य [illegible] फलस्य [illegible]तिविरोधः इत्याशंक्यार्थवादतयास्तिमात्रे तात्पर्यकल्पनत इत्याह। इत्यं चेति। ननु वेदा म
र्थीनकार्यताज्ञानाधीनप्रवृत्तौ फलं विना प्रवृत्तिरनत आह। नन्विति। स्वेष्टसाधनत्वमिति। प्रवृत्तिं प्रतीष्टसाधनता
ज्ञानस्य हेतुत्वादिति भावः। अत एव कुसुमांजलौ संध्योपासनमफलमपि क्रियते वेदबोधितत्वादिति [illegible] किलाक्षरुसमतमेतन्न तु ६

ल = ५

66

गुरोर्मतमित्यभिप्रायेणैवोचितमाचार्यैः यत्त्वयं ऽपूर्वं स्वतः प्रयोजनमिति प्राभाकरमतं तदपि दूषयति। पदपीति। कामनाभावे
। फलकामनाभावे। इदमुपलक्षणं पुरुषेच्छाविषयो हि पुरुषार्थः न च नित्यापूर्वं कश्चित् स्वर्गादिकामनामन्तरेण कामयते तद्वत्पापि द्र
ष्टव्यं। अत एव नित्यापूर्वं स्वतः पुरुषार्थ इति वा फलं विना न प्रवृत्तिरिति वा वदन् गुरुरपि तत्त्वतुरेवेत्युपहसितम्। ... त्रिसूत्र
न्यायादिति। यथा हि रात्रिसत्रे वाक्यात् नाड्याति गौरित्यादिवाक्यात् पुत्रकर्मणां प्रतीतिसिद्धांति ... य एता रात्रीरुपयन्तीत्यर्थवादेन
तावृतिष्ठेव फलत्वमिति सिद्धान्तितं तथात्रापि अर्थवादिकं फलमित्यर्थः। अन्यथा फलाभावे। तेनो प्रवृत्तिविषयस्य फलत्व... त्वा सा
धनेन। अत एव। अधिकरणत्वादेव। ननु पितरि मुक्ते सति पुत्रकृतश्राद्धादितो दृष्टोत्पत्तिर्न स्यात् दृष्टोत्पत्तौ दोषस्यापि संकारित्वा
त्। अतश्चाह मुक्तेति नित्यस्वत्ते जन्यत्वं हि तस्यापि तुः स्वप्रागभावस्य फलत्वं संभवत्युत्पादयति। एवं प्रसूयतेति। हेतुतापादेनसा
धारणापत्त्वाविवक्षितत्वादिति भावः। इष्टसाधनत्वकृतिसाध्यत्वयोरपि न कार्यत्वं जनमत्वयोदित्यत्रार्थत्वं उपपादयति। अथ वेति
। विशेष्यवतीति। न चेष्टसाधनत्वकृतिसाध्यत्ववत्त्वं वदनिष्टाननुबन्धित्वानां विशेषणविशेष्यभावे किं विनिगमकमिति चेदन्न
भिप्रायः। वृष्ट्या बालत्वेष्टसाधनज्ञानस्य हेतुत्वकल्पनादिष्टसाधनत्वस्य हेतुत्व कल्पनायामादिदोषक एव। विशिष्टेत्यादि रि
तितत्र। इष्टसाधनत्वेन कृतिसाध्यत्वेन ज्ञातेति विषमत्वादो हृत्यनुत्पादादन्वयव्यतिरेकयोर्वृत्तावदनिष्टाननुबन्धित्वेपि समा
नत्वान्नस्यपाकौ विशेषणत्वमानाभावात्। वस्तुतस्तु विशेषवतीविशेष्यभावे विनिगमकाभावेनत्रयं प्रत्येकं वेदाकांक्षा न त्वेवं
प्राप्तित्रयस्यैकाबोनानार्थताः सर्वनामपदे बुद्धिस्थत्ववत्स्वरूपसदेतन्नयामनत्वस्य नियामकत्वात्। प्रतीतिरेको धारणीति भो सम
वेनयात्क्रयात्रयाणाम पितत्ररूपेणेस्यतं त्रोपस्थितयोरिष्टसाधनत्वकृतिसाध्यत्वयोरेवान्वयोनवत्वावदनिष्टाजनकत्वस्येति इ

६६

वनेकदेशान्वयः सर्वेषां स्ववकृपदार्थत्वात्। विधेर्विशिष्टेष्टाभ्यां एकदेशो लक्षणैवेत्यन्येऽस्य बलवदनिष्टाननुबंधित्व ज्ञानस्य प्रतिबं
धकत्वमेवोक्तं ननु बलवदनिष्टाननुबंधित्व ज्ञानस्य हेतुत्वे। नञ्विनिगमनाविरहः। अतएवोभयोः कारणत्वे कारणीभूताभावप्रति
योगित्वेन यद्गुरु ज्ञानस्याभावस्य प्रतिबंधकत्वेन प्रतिबंधकाभावत्वेन यद्गुरु ज्ञानाभावस्य कारणताया आवश्यकत्वात् इति चेन्न।
जनकीभूततज्ज्ञानाविघटकत्वेनैव ज्ञानस्य प्रतिबंधकत्वात्। बलवदनिष्टाजनकत्वस्य विशेषणत्वं द्रूषयति ननु श्येनेनेति। अभिच
रन्। वैरिमरणाभिष्ठुतः। यनस्यानिष्टसाधनत्वमुपपादयति श्येनस्येति। वैधत्वादिति। श्येनेनाभिचरन्यजेतेति विधिनाबो
धनादित्यर्थः। अतएवः। अदृष्टद्वारकविवक्षणादेव। श्येनवाद्बोधधनरकामिति न श्येनस्यानिष्टसाधनत्वमस्तीति न तत्र वि
ध्यनुपपत्तिरिति ये वदंति तेषां मतमाह। केचिदिति। अत्र वेदमस्वरसबीजं। इष्टप्रयोजकत्वस्य बलवदनिष्टाप्रयोजकत्वस्य च विष
यत्वात्तस्य च दृष्टवाध्यस्य वेति ननु तर्हि प्रेक्षावतां कुतस्तत्र न प्रवृत्तिरत आह। तत इति। विध्यर्थस्या साभिप्रायः स चेष्टसाधनता
ज्ञापकः। इष्टसाधनताज्ञानं च प्रवर्त्तकं इत्युदयनाचार्यमतमाह। आचार्यास्त्विति। लाघवादिति। बलवदनिष्टाननुबंधीष्टसाधन
त्वाद्यपेक्षया लाघवादित्यर्थः। अनुमायेति। अत्र च यागो मम स्वर्गकामस्य बलवदनिष्टाननुबंधीष्टसाधनं मत्कृतिसाध्यतया आ
सेनेष्यमाणत्वात् मदन्नपाकवत् कृतिसाध्यतयेष्यमाणत्वमजनवदित्यनुमानमवधेयं। विधिरेवेति। विधिश्चाप्ताभिप्रायस्तज्ज्ञापको वेदमा
नः। कृतिविरुद्धायाः स्वपरित्यादिसत्तेः स्नानकत्वमिस्वाभिप्रायेनाह स्वयंभूरिति। ननु वर्णमात्रस्यानित्यत्वेन तत्सदर्भवेदस्य क
र्थं पौरुषेयत्वमित्यतः किंचेति। वक्ष्यमाणत्वादिति। उत्पन्नः को विनष्टः इत्यनन्तरेनानित्यत्वस्य प्रत्यक्षप्रमाणत्वादित्यर्थः। एतस
मानित्यद्योतक इति पाठः। इदमाचार्यमते चिंतनीयं। अभिप्रायमानविध्यर्थकताः साभिप्रायः। आप्ताभिप्रायमात्ररिति धियदाकुपरिस्र
६

तावपितेन वत्त्वदनिष्टाननुबंधीष्टसाधनतानतुमितयाविधेरिप्रवर्त्तकत्वापत्ते:। अंत्येयत्र कविदामन्वं वत्त्वदनिष्टाननुबंधीष्ट
६७ साधनत्वारोपतत्त्ववा। नाद्यः अनाप्तसाधारण्यात्। अंत्येत्वाद्यवात्त्ववत्त्वदनिष्टाननुबंधीष्टसाधनत्वस्यैवप्रावश्यत्वात्। आप्तत्वाश्र
यत्वाभिप्रायाश्रयस्यवगुरुत्वात्। प्रयत्नाभिप्रायस्यविधार्यत्वेप्रवर्त्तकज्ञानस्यानुमानेन परं पराधीनत्वे नातिगौरवमेवेति। द्वितीयपतना
दौकर्मणोसमवायिकारणत्वा। गत्वादाह। आद्येति। एवंचाद्यपतनात्क्रियाया असमवायिकारणिका क्रियात्वादित्यनुमानेनगुरुत्व
सिद्धिरिति भावः। वेगस्थितिस्थापकेति। अत्र संस्कारत्वं जातो। नित्यसाधारणमानाभाव।। वेगत्वादौतुप्रत्यक्षमेवप्रमाणं। भावनात्व
67 तुस्मृतिकारणतावच्छेदकतयैवसिध्यतीतिध्येय। वेगंतवेगंदर्शयति। यत्रचेति। संस्कारं प्रति निश्चयत्वेन कारणतात्वं दर्शयति नानित्या
दिनाद्रष्टव्येति। स्मरणंप्रत्युपेक्षात्मकविशिष्टनिश्चयत्वेनकारणत्वेलौकेवेसर्थः। अतःसंस्कारइति। अथानुपूर्वस्यपक्षध्वंसस्यतथापारो
त्वाप्रतियोगिभावनयोरकत्रांजनकत्वमित्यस्याप्रयोजकत्वात्। नचानुभवादेःप्रतिबंधकत्वापत्तिरितिवाच्यं। संसर्गाभावत्वावच्छिन्नका
रणतानिरूपितयोगितानिरूपितप्रतिबंधकत्वात्। इदंचसंसर्गाभावत्वेनाजनकत्वात्। नचज्ञानद्वितीयक्षणोत्पन्नसंस्कारेण
तृतीयक्षणेस्मरणोदयात्ध्वंसस्यव्यापारत्वाभावःफलस्याप्राक्कालेनुभवध्वंसाभावादितिवाच्यं। तत्रापिक्षणविलंबेनैवस्मर
णाभ्युपगमादितिचेन्न। ध्वंसस्यनिर्विषयकत्वेनस्मृतेरनियतविषयत्वप्रसंगात्। संस्कारस्यसविषयकत्वमप्यतएवः स्वजन्यध्वंसा
दे:संबंधत्वेगौरवात्घटत्वप्रकारकस्मृतिंप्रतिसमवायेनघटत्वप्रकारकसंस्कारस्यैवलाघवेनहेतुत्वादिति। नव्यमतमाहपरेत्वि
तिसंस्कारस्योद्बोधकानांचकारणत्वेगौरवंइत्यापायः। आकुरित्यनेनास्मरसःसूचितःसचस्मृतिहेतुतानादिमतेस्मृतिव्याप्तिकत्व राम
नाकृतंगौरवात्। तत्रधर्मेयागादीति। आदिनाहोमदानयरिग्रहः। यागात्वंचदेवतोद्देश्यकस्वत्वध्वंसवद्द्रव्यविशेष्यकेच्छात्वं। देवतोद्दे ६७

रूपकत्वं च देवतास्वत्वबुद्धिविषयकत्वं । प्राङ्मयादेवतेति पदे तु तस्येदमित्यारोपज्ञानविषयत्वमुद्देश्यत्वं होमत्वं च प्रक्षेपावच्छिन्नप्रीणनत्वप्र
क्षेपस्याग्निसंयोगानुकूलत्वक्रियानुकूलो हस्तादिव्यापारः । दानत्वं च स्वत्वग्रहणविनाशत्वे स्वसपरस्वत्वजनकत्यागत्वं
प्रतिसंप्रदायः यागत्वं होमत्वादयो मानासप्रवृत्यङ्गा पाञ्जाति विशेषाः । न च स्त्रीशूद्रस्य पित्र्ये दयाया यागत्वं ब्राह्मणाये तथा दानत्वाः स्वत्व
था । धर्माभावो विरुद्धत्वमिति । बहुकालेन नष्टत्वमीति प्रायमपूर्वं तिनाप्रत्तायफलजनानायनसमर्थ इत्यर्थः । नन्वापूर्वं दर्शपूर्णमासयो
रनेकनिधंफलापूर्वकल्पयपूर्वं मङ्गापूर्वं चाति । तथा हि यदाग्नेयोऽष्टाकपालोऽमावास्यायां पौर्णमास्यां चाच्युतो भवति । तावज्ञतावग्नी
षोमीयावाज्यस्यैव नाद्रु । पाष्णु पौर्णमास्याय ज्ञतत्वाभ्यामित मन्त्रीषोमीयमेकादशकपालं पूर्णमासे प्रायच्छत् । ऐन्द्रं दध्यमावास्यायां
ऐन्द्रं पयोमावास्यायामिति पत्तभिर्वाक्यैर्विहितेभ्यः षड्भ्यः आग्नेयादिभ्यः । षदुत्पत्त्यपूर्वाणीति भवन्ति मध्यमापूर्वमितित्रिषड्पूर्वाणावव
कानिसासादवस्वर्गहेतवे । संतु किं पर मापूर्वं णीति चेन्न दर्शपूर्णमासविधेरपूर्वं वायस्थितिविनास्वर्गसाधनत्वावबोधकत्वेन योग्य
तानुपात्तेयपतद्धपादित्याव प्रपकत्वेना घवादे कल्पे वतस्यकल्पनात् पदि चोत्पत्त्यपूर्वं तावेचफलं जनयेषुस्तदा स्वर्गाणां वैयर्थ्या
पत्तिः । फलाभयमाग्नेयादीनामेककर्तृकत्वावधारणानयुगपदसंभवनिश्चयेनष्टत्वा ... तानि कालिकापूर्वीणि कल्प्यन्ते । तागानाचा
नेकत्वेन वर्षिनीसंघातासंभवादाग्नेः पूर्वाणीति । इदं चापूर्वं जाते ... ब्दयज्ञादौ कर्तृनिष्ठमुत्पत्स्यतद्रूपके । प्रोक्ते निष्ठ इति तत्सं
प्रदायः । तत्राद्यपक्षस्य वसाधीयात् । न्यहस्य फलसमानाधिकरणत्वे हि प्रोक्तानां स्वत्राणि ब्राह्मणस्तानि तानि प्रायो विघातस्स्वफ
लसमानाधिकरणस्य वस्त्यादिप्राप्येयपराक्रिं ... देवतास्यात् । प्राभाकरास्तु यागक्रियाः सर्वात्मना ... नेवतस्य तिष्ठित्तु स्वत्वमसपर्वे
ताद्रूपासतीस्वर्गादिहेतुं भके पुयागसंबधिद्रव्यारंभके षु वापरमाणुषु यागकर्तृ यात्मनिवासवस्यापफलमारभत इत्याहुस्वन्नज्ञाने

ष्ठादिरूपस्य पाकस्यास्य यागस्य विशेषगुणान्तरपरिणामञ्च तु स्वर्ग्यानवस्थापित्वानयमात् ज्ञानेच्छादीनां सदानवभवेतावत्सम्पत्तापत्
त्वीकार्ये समानाधिकरणस्वोत्तरवर्त्तिगुणान्तरनाश्यत्वनियमात्। अन्यथाऽऽजगदेव सूक्ष्मरूपतयावसरातिष्ठतीत्येन कुतो नष्ट
त्वध्वंस इत्यतो विस्तरेण। तथा च। ध्वंसप्रतियोगितानि रेकत्र जनकत्वाभावो जलस्य प्रागदीत्या दिनागंडकीवाकुतरस्यापि पवित्र्य
तेन कर्मनाशाजलस्पर्शादिना। तस्य यागादेः तत्त एव नापिट्टः प्रजया पशुभिस्तर्पयतीत्यादिश्रुत्या देवतामीतिविना न फलं
तस्यासत्या फलमिति प्रतिपादनात्तस्याएव व्यापारत्वमिति कृपाविन्मतद्रूषयति। एतेनेति। देवतामीत्यादेः क्षणिकतया कर्म
नाशाजलस्पर्शादिना नाशात्वासंभवात् न फलत्वमिति भावः। गंगास्नानादाविति। देवतायाश्चेतनत्वादिति भावः। चेतनत्वेपि वात
स्यास्तत्प्रीतेर्वा लुदस्यत्वादेव न फलत्वमित्याह। देवताया इति। तत्र। विस्वादेः अनन्तापदिसरायवहरणेनाश्वमादानरकदुःखादीति
। तस्यपूर्वमिति। तस्या वृहलहननादेः। इष्टं चेति। कर्मणां भोगनाश्यत्वेत्यर्थः। अन्यथा। उपलक्षकत्वानंगीकारे। सर्वकर्माणी
ति। सर्वकर्मजन्यादृष्टानीत्यर्थः। भस्मसात्कुरुते नाशयति। श्रुतिदर्शयित्वा स्मृतिमपि दर्शयति। क्षीयंते चेति। तदभिप्रायमेव।
। प्रारब्धकर्माभिप्रायमेव गौरवादिति। दृष्टादृष्टानामनुत्पत्तौ दृष्टप्रागभावानां हेतुत्ववत्वकल्पने गौरवादित्यर्थः। दृष्टं चेति। प्रत्यभि
ज्ञानस्य सजातीयविषयत्वे चेत्यर्थः। इयोरपीति। उत्पत्त्यादिप्रतीतिप्रत्यभिज्ञयोरित्यर्थः। सामान्यत्वाद्वेति। सएवायं गकार इति प्रत्य
भिज्ञया गकारादेस्तावत्कालावस्थानस्यैव विषयीकृतत्वेनोत्तरात्मक प्रत्यक्षादिना नाशेनाशकाभावात् अदृष्टनिष्पत्तिसिद्धिः। न च
प्रत्यभिज्ञात् ज्ञातीयत्वविषयिणी बाधकाभावात्। अन्यथा सर्वत्र क्षणिकत्वाभावे भेदो भेदापत्तेः। न च तारत्वमन्दत्वस्य पवित्र
त्वधर्माध्यासो बाधकः। प्रत्यभिज्ञानस्य नवर्णस्यानित्यत्वसिद्धिः तारत्वादेर्ध्वनिजनकवायुधर्मत्वस्य कल्पनात् तस्योत्रेणावायुधर्मस्य राम

तारत्वादेरपिग्रहणसंभवात् यद्यप्येवंतारः सएवायमित्यादौ तथापिभेदइतिप्रतीतेस्तारत्वमंदत्वयोरविरोधात्
स्वेत्याहुः तत्रतथाप्रसतिकत्वगत्वादेरपिव्यंजकवायुधर्मत्वापत्त्याककारगकारयोरपिभेदोनसिद्ध्ये
दितिवर्णानामपत्तेः वस्तुतस्तुवर्णानित्यत्वपक्षेकण्ठताल्वाद्यभिघातानांककत्वादिकंकार्यतावच्छे
दकंवर्णानित्यतापक्षेतुतत्कसादृश्यकारत्वमितिगौरवात् नचनित्यत्वमतेपिलौकिकविषयतयाक
त्वमेव तदुत्पत्त्यतावच्छेदकमितिगौरवाभावकार्यत्वनिवार्यं कोलाहलप्रत्यक्षस्यासंग्रहप्रसंगात्
नहिकोलाहलप्रत्यक्षंककत्वादिविषयकं श्रवणप्रत्यक्षयोग्यत्वाद्यदाद्युत्पादकस्यापिचप्रत्यक्षत्वेन
वकार्यतावच्छेदकमितितदपिनित्यमेवस्यादिति नचानित्यत्वमतेप्रत्यभिज्ञायास्तत्सजातीयत्व
विषयत्वेननत्सजातीयमितिप्रमात्वेसाधम्येनीतिवाच्यं यत्रप्रत्यभिज्ञायांजातित्वेनगत्वादेर्भाने
नतैवतत्सजातीयोयमित्याकारः यत्रतत्स्वरूपतोभानंतत्रसोयमित्यस्युपगमादिति स्वेदेवोयं

मु॰
टी॰
६९
69

शब्दो द्विविधः ध्वन्यात्मको वर्णात्मकश्च तत्र ध्वन्यात्मकसंयोगजन्याद्यशब्दं प्रति गगनं समवायिकारणं
भेर्याद्याकाशसंयोगो समवायिकारणं भेरीदण्डसंयोगादिः निमित्तकारणम् विभागजन्यध्वन्यात्मका
द्यशब्दं प्रति तु वंशदलाकाशविभागो समवायिकारणं वंशदलद्वयविभागो निमित्तकारणम् वर्णा
त्मकाद्यशब्दं प्रति तु कण्ठताल्वादिनाकाशसंयोगो समवायिकारणं कण्ठताल्वादिना वाय्वादिसंयो
गो निमित्तकारणम् द्वितीयादिशब्दं प्रति त्वाद्यशब्दो समवायिकारणं नच भेर्याकाशसंयोगकण्ठा
द्याकाशसंयोगादीनां शब्दं प्रति कारणत्वे मानाभाव इति वाच्यं भावकार्यस्यासमवायिकारणजन्य
त्वनियमेन तत्कारणत्वस्वीकारात् तादृशनियमे मानाभावे तु मास्तु तेषां कारणत्वम् भेरीदण्डसं
योगादिनिमित्तकारणसहकृतेनाकाशेनैव शब्दोत्पत्तिसम्भवादिति प्रथमादिशब्दादीनां च स्व ६९
कार्यशब्देनैव नाशः चरमस्य तूपान्त्यशब्देनोपान्त्यशब्दनाशेन वा नाश इति मूले तदेवोपपयमित्याद

वित्वादित्रितासिद्धेर्यं दीपकलिकेत्यादेः परिग्रहः नन्वत्रापि व्यक्त्यभेद एव विषयोऽस्त्वितो भावार्थप्रका
७० शावत्तियदीषयंमयाहृतमित्यादिना अत्र च सकलैकत्वस्वभिन्नकत्वैकत्वरूपाविरुद्धधर्माध्यासा।
द्भिन्नभेदप्रत्ययस्य प्रतिबंधकस्य सत्त्वात्तत्र व्यक्त्यभेदो विषयः किंतु तत्सजातीयाभेदो विषय इति भावः
70 किंतु तत्सजातीयाभेदो विषय इति भावः भानुप्रणामस्य परिभाव्य वशात्प्रसार मुक्तावलीकिरणप्रथ।
पितत्प्रदिष्टः सयुक्तिभिः दिनकरेण करेणासौ येनीतः प्रकाशपदवीमसपिपासुदेतत्व मुक्तावलीप्रका
शाय प्राज्ञानतिमिरापहः तेन संतोषमायातु नीलकंठः सतां प्रियः इति मुक्तावलीसमाप्ता ॥ ७०

व्याख्या